वेदान्तविजय
रामानुजदास
विरचित

वे॰वि
१

श्रीमते रामानुजाय नमः॥ द्वैतोपनिषदां सार्धं श्रुतयोऽद्वैतगोचराः । घटकश्रुतिसंयुक्ताः सद्विद्यामनुरुंधते ॥ द्वैतश्रुतिभिश्चिद्
चिदीश्वरभेदप्रतिपादनेन विशेषणविशेष्यभेदः प्रतिपाद्यते घटकश्रुतिभिर्विशेषणविशेष्यवैशिष्ट्यं अद्वैतश्रुतिभिश्चै
तदात्म्यमिदं सर्वमिति कृत्स्नस्यापि भगवदात्मकत्वप्रतिपादनेन सिद्धं विशिष्टाद्वैतं प्रतिपाद्यते तथाहि द्वैतश्रुतयस्तावत्प्र
श्नोपनिषदि पंचमखंडे यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्ये संपन्नो यथा
पादोदरस्त्वचा विनिर्मुच्यत एवं ह वै स पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात्परात्प
रं पुरिशयं पुरुषमीक्षत इति जीव एवाचितः परस्तस्मात्परः पुरुषः स सामभिरुन्नीयत इति च मोक्षे भेदः प्रतिपाद्यते
नेतरेणानयनस्य साम्नां ब्रह्मलोकस्य च स्वरसतो भेदावगमात्॥ ॥कठवल्ल्यां तृतीयखंडे सोऽध्वनः पारमाप्नोति तद्वि
ष्णोः परमं पदमिति ज्ञानेनेदानीं प्राप्यस्य पूर्वसिद्धप्राप्तृभ्यां भेदः स्फुटः ॥ चतुर्थे यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव
भवति एवं मुनेर्विजानत आत्मा भवतीति भगवंतं प्राप्तस्तत्साम्यमुपैतीत्यर्थः पंचमखंडे नित्यो नित्यानां चेतन
श्चेतनानामेको बहूनां यो विदधाति कामान् तमात्मस्थं येऽनुपश्यंति धीरास्तेषां शांतिः शाश्वती नेतरेषामिति॥
मुंडकोपनिषदि द्वितीयखंडे सूर्यद्वारेण ते विरजाः प्रयांति यत्रामृतः स पुरुषो ह्यव्ययात्मा इति पंचमखंडे समाने
वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः यदा प
श्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिं तदा विद्वान् पुण्यपापे विधूय निरंजनः परमं साम्यमुपैतीति
तस्मादात्मस्थं ह्यर्चयेद्भूतिकाम इति च षष्ठे यथा नद्यः स्यंदमानाः समुद्रेऽस्तं गच्छंति नामरूपे विहाय तथा विद्वान्ना

राम
१

वे०वि०
२

3

धेनुस्यादपि न चासौ स्तितिनित्यत्वादेव न च दुःखमिश्रत्वात्पुरुषार्थता तत्र यासति दुःखाभावार्थं प्रवृत्तिरि स्यात्तस्माद्दुःखाभा-
वस्यैव पुरुषार्थत्वावतेः नेतरो स्वरूपात्मके स्वरूपानंदानुभवे जाग्रत्तिमयोरसंभवात् अतश्च तयैव स्वरूपानंदा-
नुभवेन स्वरूपस्य परमप्रेमास्पदत्वमिति मंत्रोपनिषदि प्रथमखंडेपि वेस्येनाम विषमाम्नविज्ञाताः कुमारकाः
एकस्वरूपिव नेदेवः स्वच्छंदोत्र वशानुगामिति द्वितीयखंडेपि विदुर्ब्रह्मणस्तयामत्रैव तेन लयं यांतीति अत्रतामि
लेवलयं यांति सर्वं यः सागरे यथेति पूर्ववाक्योक्तलयस्यैव प्रश्नमभिज्ञानात् जीवब्रह्मणोर्भेदासिद्धेः॥ ॥दहराव-
द्यायां परं ज्योतिरूपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति सुबालोपनिषदि तृतीयखंडे ब्रह्मैव सन्ब्रह्माप्येतीति
एवकार इवार्थः पूर्ववत्स्वाभाविकब्रह्मभावे सत्येवेदानीं ब्रह्मप्राप्तिरभिप्रायत इति तु व्याख्यानमसंगतं ब्रह्म-
भावस्य स्वाभाविकत्वे साध्यत्वायोगात् नन्वप्येतीति लयो हि प्रतिपाद्यते तत्र तन्मनर एवमतो घटध्वंसघटत्वा-
वस्थाप्रहाणेन महदिलयवत् ब्रह्मण एव सतो जीवस्य जीवावस्थाप्रहाणेन ब्रह्मणि लयः प्रतिपाद्यत इति चेन्न
पद्यप्ययमर्थो यादृशमते संभवति तथापि ब्रह्मैव सन्निमस्य प्रयोजनाभावात् नायमर्थो युक्तः तत्रस्य ब्रह्मसा-
रूप्यं ब्रह्मप्राप्तिरित्युभयमिह साध्यत्वेन प्रतिपाद्यते श्वेताश्वतरे प्रथमखंडे पृथगात्मानं प्रेरितारं च मत्वा जुष्ट-
स्ततस्तेनामृतत्वमेतीति ज्ञाज्ञौ द्वावजावीशानीशाविति क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव- राम
एक इति भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतदिति चतुर्थे द्वा सुपर्णा सयुजा सखाया २

मरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यं स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवतीति अत्र एवकारद्वयार्थः परमं साम्य
मुपैतीति पूर्वानुसारात् वाक्यशेषानुसाराच्च तत्र हि नदीसमुद्रदृष्टान्तः प्रतिपादितः न हि तत्राभेदोस्ति किं तु नामरूप
रूपत्वभेदाभाव एवं स्वधर्मानेव विस्फुरेव भूत्वेमांल्लोकानभिजयतीति विस्फुक्रमानक्रमते विस्फुरेव भूत्वेमांल्लोकानभिज
यतीत्यादिवत् न हि तत्र पश्वालंभनादिमात्रात् विस्फुतादात्म्यमुपपद्यते इववद् एवमेवेति नैगंतुकाः पठंति अत्र
थानेरर्थकत्वात् वस्तुतस्त्ववधारणार्थ एवायमेवकारः स्यात् परमसाम्यंश्रुतिरनुगृह्णाति सोसादृश्यरूपविकल्प
यति हि सेनान्यं राजेवायमिति इवस्तिनावकाशो भवतीत्यत्रस्य वधारणार्थ एवकारः सोसादृश्यं द्योतयति ननु ब्रह्मैव भ भवतीत्यत्र ब्रह्मेः
वति न त्वब्रह्म भवतीत्यवधारणार्थः ततश्च काल्पनिकब्रह्मभेदनिरस्तावधारणस्तात्पर्यमिति चेत् तथा सति
ब्रह्मभावः पुरुषार्थो न स्यात् ननु भेददशायामसिद्धस्यानवच्छिन्नानंदब्रह्मभावोऽप्रयोजनकल्पो भवति काल्पनिक
भेदनिवृत्तौ सम्यक् प्रयोजनत्वलाभ इति भेदनिवृत्तेरपि तादर्थ्यात् ब्रह्मभाव एव पुरुषार्थ इति चेत् तत्र केयमप्र
योजनकल्पता किं लब्धेपि तत् प्रयोजनेतत्तोप्युत्कृष्टप्रयोजनेच्छासहत्वं अथवा प्रयोजनत्वबुद्धिः उत प्रयोजनत्व
बुध्यभावः नाद्यः भेदबुद्धेरेव तादृशप्रयोजनेहेतुत्वात् तन्निवृत्तौ तदसिद्धेः कथं भेदनिवृत्तये तत्त्वज्ञाने प्रवृत्तिः प
रमपुरुषार्थोसारकरत्वात् स्वरूपमात्रात् स्वतःसिद्धानंदाद्वैधयिकसुखमत्यल्पमपि हि परमपुरुषार्थः न चो
त्कृष्टसुखत्वेप्यनित्यतया तस्यापुरुषार्थता अनित्यतायाः पुरुषार्थताप्रयोजकत्वाभावात् नित्यसुखविरो

रतिर्थ्युत्पत्ते अस्येति संयोजकस्यापि न पृथक्भावकरणसामर्थ्यमिति प्रतिपादनेन स्वशास्त्रिप्रदस्यापि भगवतः पुनरा
वे०वि० वृत्तौ न सामर्थ्यमिति गम्यते अस्य वाक्यस्याभेदपरत्वे दृष्टांतवैषद्यं न ब्रह्मेत्यादिवाक्यवैयर्थ्यं च षष्ठे अध्याये चतुर्थे ब्राह्मणे
३ ब्रह्मैव सन् ब्रह्माप्येतीति अष्टमे अध्याये द्वितीये ब्राह्मणे ते ब्रह्मलोकेषु पराः परावतो वसंति तेषां न पुनरावृत्तिरिति प
रावतः परवंतः भगवत्परतंत्रा इत्यर्थः तापनीये देहांते तमसः परं धाम प्राप्नुयात्तत्र विरजो नृसिंहो वभासते तत्र
खलु पासते तत्स्वरूपाः सदृशा मुनयः आकल्पांते तत्र तस्मिन्नेवात्मनि लीयंते न च पुनरावर्तंत इति यत्र नृसिंहो वभा
4 सते तद्धाम प्राप्नुयादित्यन्वयः तत्र हेतुमाह तत्र खल्विति परमव्योम्नि द्योतमानं तयोपासत इत्यर्थः यथोपासनं
हि फलमिति भावः सरूपाः सदृशा इति परमं साम्यमुपैतीति श्रुतिप्रतिपन्नं परमसाम्यमुक्तं आकल्पांते सर्वदेत्यर्थः
आकल्पं कार्यलोकविशेषे व्रनसिंहाधिष्ठिते चिरं तमुपास्य कल्पांते परां मुक्तिं प्राप्नुवंतीत्येवं तात्पर्यवर्णनेपि
नृसिंह एव लयश्रवणान्मुक्तौ अभेदसिद्धिरनिवार्या अपि च सर्वत्र मुक्तिगोचरलयपदानां सयथा सैंधवखिल्यइत्या
दिवाक्यप्रतिपन्नार्थपरत्वात् अभेदसिद्धिः तापनीये पंचमोपनिषदि तद्विष्णोः परमं पदं सदा पश्यंति सूरयः दिवीव चक्षु
राततं तद्विप्रासो विपन्यवो जागृवांसः समिंधते विष्णोर्यत्परमं पदमिति ॥ ॥मैत्रायणीयोपनिषदि तस्मिन्नेव यज २४
माना सैंधवघन इव लीयंते एषा वै ब्रह्मैकता नाम त्रिहि सर्वे कामाः समाहिता इति सैंधवघन इति यथा सैंधवघन उ राम
दके प्रास्तस्तत्र लयं प्राप्नोति तत्समानरूपत्तया दुर्ग्रहविवेको भवति रसविशेषेण विवेकुं च योग्यः तद्वत् ब्रह्मणि ली ३

समानं वृक्षं परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीतीति समाने वृक्षे पुरुषो निमग्नोऽनीशया शोच
ति मुह्यमानः जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक इति अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो
मायया संनिरुद्ध इति च पंचमे क्षरं त्वविद्या ह्यमृतं तु विद्या विद्याविद्ये ईशते यस्तु सोऽन्य इति षष्ठे तमीश्वराणां परमं
महेश्वरं तं दैवतानां परमं च दैवतं पतिं पतीनां परमं परस्ताद्विदाम देवं भुवनेशमीड्यमिति स कारणं करणाधिपा
धिपो न चास्य कश्चिज्जनिता न चाधिपः नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् प्रधानक्षेत्रज्ञपति
र्गुणेशः संसारमोक्षस्थितिबंधहेतुरिति च॥ ॥बृहदारण्यके चतुर्थेऽध्याये चतुर्थे ब्राह्मणे स यथा सैंधवखिल्य उदके
प्रास्त उदकमेवानुविलीयेत नाहास्योद्ग्रहणायेव स्याद्यतो यतस्त्वाददीत लवणमेवैवं वा अरे इदं महद्भूतमनंतमपा
रं विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीति किमनेन वाक्येन मुक्तावस्था प्रतिपाद्यते।
विज्ञानघनो जीवः पंचभूतमयं देहं विसृज्य तद्विशरणानंतरमेव महद्भूतं महति भूते परमात्मनि विनश्यति लीनो
भवति देवादिनामरूपग्रहणरहित इत्यर्थः अविलंबप्रतिपादनाय तावन्त्विमुक्तिः जीवविशेषोऽन्तरहत एव शरीरविग्र
हणं भवति तदुत्तरहत एव ब्रह्मप्राप्तिर्भवतीति नविलंब इति भावः देवादिवैजात्यग्रहणात्तत्परमसाम्यापत्तेश्चा
स्यं तत्वे धर्माग्रहणं शरीरादिकृतिपरित्वैव धर्म्मग्रहणं चाभिप्रेत्य तदनुगुणं दृष्टान्तमाह यथा सैंधवखिल्य इति सैं
धवखिल्यः सैंधवघनः लवणपिंडः अस्य प्रासितुः गात्रलयप्रतिपादनेन रूपतो वैधर्म्यग्रहणाभावः प्रतिपा
दितः यतो यत इत्यादिमध्यान्ताचामेषु रसतो वैधर्म्यग्रहणत इति भावः उद्ग्रहणायेव प्रतिपादनेनायुनरा

न्य इत्यादिः स्वे महिम्नीत्युपपादकः सन् प्रतिवचनशेषं यदि वा स्वान्यो ह्यन्यस्मिन् प्रतिष्ठित इत्युवाचेत्यन्वयः अस्मिन्नुपदेशे प्र
यं प्रतिष्ठितशब्दः पूर्वप्रतिष्ठितशब्दसमानार्थः भूम्नोऽन्यः खलु स्वस्मात्स्वन्यत्र प्रतिष्ठितः ननु भूमा यो ऽस्त्यर्थः एवं यत्र ना
न्यत्स्वे महिम्नीति च न तत्समग्राभ्यधिकग्रन्थद्वयं तदूर्ध्वमर्थ उक्तः द्वितीयप्रयोजनायांस एवाधस्तादित्यादिनानुग
वे॰ वि॰ ५ तरमुच्यते वक्ष्यमाणाहंग्रहणोपयोगितया सा सर्वात्म्यमुपपादयति स एवेदं सर्वमितीति एवं भूमानमुपदिश्य परोक्षपारन्तर्
एहेतुभूतं भूमगोचराहंग्रहणोपासनमुपदिशति अथात अहंकारादेश एवाहमेवाधस्तादहमुपरिष्टादहं पश्चादहं पुर
स्तादहं दक्षिणतोऽहमुत्तरतोऽहमेवेदं सर्वमितीति कारः कृतिः अहमिति कृतिः अहंकारः अहमित्युपासनमित्यर्थः एतदु
पाप्यजीवब्रह्माभेदभ्रमं वारयितुमाह अथात आत्मादेश एवात्मैवाधस्तादात्मोपरिष्टादात्मा पश्चादात्मा पुरस्तादा
त्मा दक्षिणत आत्मोत्तरत आत्मैवेदं सर्वमितीति अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति नामरूपव्या
करणस्य जीवानुप्रवेशनिबंधनत्वोपदेशेन जीवप्रचुरत्वात्प्रपंचस्यात्मैवाधस्तादित्युपदेशः एवं चाथातोऽहंकारा
देश इत्यनेन सर्वात्मत्वाहंप्रकारकभूमोपासनं विहितं ॥ १ यदाह कश्चि यत्र नान्यदित्यादि नानिरस्तनिखिलभेदं व
स्तु लक्ष्यते यत्र यस्मिन् वस्तुनि अन्यत् भिन्नं कार्यजातं न पश्यतीत्यादिना नामरूपात्मकभेदप्रपंचप्रमाणस्य निषि
द्धत्वादथ यत्रान्यत् पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पमिति वस्तुनः परिच्छिन्नस्याल्पत्वसंकीर्तनात् यदल्पं तन्
मर्त्यमिति मर्त्यत्वेन नाल्पे सुखमस्तीति असुखत्वेन च वस्तुनः परिच्छिन्नस्यानिंदितत्वाच्च किंच स भगवः कस्मिन् प्रति- राम
ष्ठित इत्यादिना ब्रह्मणोऽप्यधिकरणमस्तीति वेऽसाशंक्य नाहमेवं ब्रवीमीति सहोवाचान्यो ह्यन्यस्मिन् प्रतिष्ठित इति ५

नोपीतिभावः अत्र ब्रह्मैकत्वानुवादेन लयरूपताविधिः प्रतीयते तत्र यं भावः सर्वेषु मोक्षप्रकरणेषु ब्रह्मैकत्वमेव भवती
त्यादिरूपेणाभेदप्रतिपादकत्वेन प्रतीयमानानां वाक्यानां अयमेवार्थ इति॥ ॥भूमविद्यायां प्रथमं तावद्भूमानमुपदि
श्यानंतरं विधीयमानमहंग्रहोपासनं जिज्ञास्यत्वाभिमतभूम्न एव प्रकृतत्वान्न त्वानन्दोचरमेव तत्रमाहमथाभेदादेव भूम्नो
हंग्रहेणोपासनं विधीयत इति जीवब्रह्माभेदशंकोन्मेषनिवृत्तये उपदेशाभेदेन जीवब्रह्मभेदं स्पष्टयितुं जीवोपदेशः
क्तः तदुपदेशेन च भेदस्यावधारितत्वात् अहंप्रकारत्वेपि वा अहंग्रहेणोपासनमिति सिध्यतीति तथाहि सुखं त्वेव विजिज्ञासित
व्यमिति जिज्ञासितयोक्तस्य सुखं भगवो विजिज्ञास इति एतस्य सुखविशेषस्य लक्षणमाह यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमै
व सुखं भूमा त्वेव विजिज्ञासितव्य इती निभूमत्वादौ धर्मपर्यंतमल्पप्रतिसंबंधिनिर्देशात् नाल्पे सुखमस्तीत्यल्पेसु
खत्वं नास्तीत्यर्थः अज्ञानमतोल्पदुःखमिति विलिंदार्थवादः यत्किंचिद्रूपेक्षयावह तस्य तरसाद्वारल्पात्व इति भूमानं भ
गवो विजिज्ञास इति उत्तरमाह यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्य त्स६
द्विजानाति तदल्पं यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यमिति यत्रेति विषयसप्तमी यद्विषये सद्द्वारऽदं तत्रं न जानाति
स भूमेत्यर्थः राजादिमहिमाधीनस्थितित्वस्य प्रजासुरक्षणात् रक्षतीति स भावः कस्मिन् प्रतिष्ठित इति स्वेच्छाधी
नस्थितिरित्याह स्वे महिम्नीति किंचिद्वस्तु कुत्रापि वर्तमानं रूपं तेजनः कुत्रापि विधत इत्यभिप्रायेणैव पृच्छति किम(
न्याधस्मिन् प्रतिष्ठित इति उत्तरस्यावाच्येसेत्तदंतत्वस्य स्वरसतः प्रतीतेः प्रश्न एवापि युक्तः अत्र प्रतिष्ठितवादः से
वं धमात्रपरः सर्वत्वमुत्तरमाह स एवाधस्तात्स उपरिष्टात्स पश्चात्स पुरस्तात्स दक्षिणतः स उत्तरत इति यद्वाक्य

वाधस्तादित्युपक्रमानुरोधेन सर्वगतत्वमेव तदभेदेपि न विरुध्यत इति वा। अस्मिन् हि कंचन पदार्थमवधिं कृत्वा तस्मादधस्ता
दूर्ध्वं चतुर्दिक्षु च यत्किंचिदस्ति तत्तत्सर्वं स एवेति षड्विधवाक्यैः प्रतीयते स एवेदं सर्वमिति त्ववधिभूतपदार्थात्मकत्वमिति सर्वा
त्मकत्वमेवोच्यते तेन तु सर्वगतत्वं सर्वगतत्वमात्रपरत्वेपि स एवाधस्तादहमेवाधस्तादात्मैवाधस्तादिति श्रुतिपर्यायम
वधारणं नूनं जीवब्रह्मभेदः प्रसक्तुं शक्यत इति॥ ॥अत्रोच्यते यदुक्तं प्रकरणमद्वैतविषयमिति तन्न तावद्यत्र नान्यदिति
वाक्यबलादद्वैतविषयतास्य प्रकरणस्य अतिरिक्तनिषेधपरत्वाभावात् यत्र नान्यत्पश्यतीति नान्यनिषेधः प्रतीयते
प्रमाणनिषेधेनार्थात्प्रमेयनिषेधसिद्धिरिति चेन्न अत्र प्रमाणनिषेधेन प्रमेयनिषेधप्रसिद्धावप्यन्यत्वानिषेधे
नाद्वैतासिद्धेः प्रमाणनिषेधोप्यनुपपन्नः त्वन्मते ब्रह्मणोधिष्ठानतया तत्रैव सर्वेषां पदार्थानां प्रतीतेः यत्र तत्समा
नसत्ताकं न पश्यतीति विवक्षायामपि चरमधर्मे व्यावहारिके प्रातिभासिके चातिव्याप्त्या लक्षणत्वानुपपत्तेः किंच य
त्रेत्यादेर्भूम्नः शब्दार्थविवादकत्वं हि स्वरसेन च भूयस्त्वमनेनोपपाद्यते नापि यत्रान्यदित्यादिनाल्पत्वं न हीतरमिथ्यात्वं
भूयस्त्वोपपादकं नापि तदधिकरणकवस्तुसत्त्वं तस्याल्पत्वोपपादकं प्रत्युत विपरीतमेव लोके हि विद्यागुणादिशालि
नं भूयानिति वदन्ति तच्छून्यं चाल्प इति न च यत्रान्यत्वेन किंचिन्न वस्तु न पश्यति स भूमा यत्रान्यत्वेन किंचिद्वस्तु पश्य
ति तदल्पमित्यर्थः भवति च वस्तुपरिच्छेदतदभावाभ्यामल्पत्वभूमत्वोपपादनमिति वाच्यं सर्वज्ञब्रह्मणोन्यत्वेनैव किं
चित्त्वज्ञयोः प्रतियत्तेः वस्तुपरिच्छेदतदभावाभ्यामल्पत्वभूयस्त्वोपपादनाभावाच्च महत्त्वं हि भूमाल्पत्वप्रतियो
गित्वात् तत्त्व वस्त्वन्तरपरिच्छेदेपि गगनादौ दृश्यते दृश्यते च न साधनाकर्मणां भूयानिति कर्माधीनतयात्तस्यानुवादः

6

भेदनिषेधेनात्मनः प्रतिषिद्धत्वं निषिध्यते सर्वाधस्तादित्युत्तरवाक्ये च सार्वात्म्यं प्रतिपाद्यतेऽस्मिन्नो यत्र नान्यदित्यद्वितीयपदे
न लक्षितत्वा द्यथ यत्रान्यदिति भेदस्यानिंदितत्वादन्योऽहमस्मीति भेदनिषेधात् सार्वात्म्यप्रतिपादनाच्चाद्वितीयपदमिदं प्रक।
रणं जडस्य ब्रह्मकार्यत्वेनारंभणाधिकरणन्यायेन ब्रह्मणस्तदात्मकत्वेऽपि जीवस्यानदकार्यस्यातद्देशात्मनिक एव भेदः स्या।
दिति ब्रह्मणः सार्वात्म्यश्रुतिरुन्मत्तप्रलापः स्यादिति जीवस्य ब्रह्माभेदसार्वात्म्यश्रुतिरपेक्षत इति स एव तुल्यलक्षणतया।
हंकारादेशश्च प्रतिपाद्यते न त्वात्मादेशान्वयनेनैवात्मोपदेशासिद्धेः किमहंकारादेशेनेति चेन्न आत्मा ह्यहं प्रत्ययविषयः
कर्ता भोक्तेति लौकिकैर्निश्चीयत इति तत्रैव प्रथममात्मत्वाद्धात्मबुद्धिः स्यात्तदभेदमवगमयितुं शक्नोतीत्याशङ्क्य तत्त्वंपदार्थं
पृथक्निर्दिष्टपत्नेनोत्स एवात्मेति प्रतिपादिते जीवपराभेदं प्रतिपादयितुमिति सार्वात्म्यश्रुतिरपेक्षते यैवाहमात्मानमा
दौ निर्दिशति न त्वहंकारस्य तदवच्छिन्नत्वेनान्यस्य वा भिन्नत्वात् असर्वगतत्वाच्च कथं सर्वगतत्वं सर्वात्मत्वं चेति चेन्न
सोऽहमहंकारत्वात् अहमिति वृत्तिः करणमस्मितालिवृत्त्यन्तःकरणावच्छिन्नचैतन्यमभिधत्ते शोकहर्षभयको
धलोभमोहस्पृहादयः अहंकारस्य हृदयपते जन्ममन्युभ्रूत नात्मन इति स्मृतावपि तत्रैव प्रयोगात्तथा च वा धिव
रिच्छेदात् परिच्छिन्नेन तद्देशात् भिन्नेन च तस्मिन् सर्वगतत्वब्रह्माभेदप्रतीतिर्न संभवतीति दहरपुण्डरीकवेष्टितस्याप
रमात्मनो यावानयमाकाशस्तावानेषोऽन्तर्हृदय आकाश इत्युपाधिकृतात्पत्वनिवृत्तिपूर्वकत्वोपमोपदे
शावदहमर्थस्याप्युपाधिकृतपरिच्छेदस्यास्वाभाविकत्वात् सार्वात्म्यपराहंकारादेशश्रुतिर्न विरुध्यते उत्तरवा
क्ये तु ब्रह्मसमानस्वभावतया तदैक्यमुच्यते न वास्मिन्वाक्ये ब्रह्मणेन सार्वात्म्यं प्रतिपिपादयिषितं किंतु स ए

वे०वि०
६

ऽदुःस्फुरत्तदंप्रतीतेर्नहि लोक तत्परित्तुर्मिथ्यात्वं कस्यापिदृष्टं का विषयः आत्मनित्यत्वप्रतीतिबलादेव च त्वयोन्मत्तप्र
लापनोक्ता तथा च कुतोऽति मिथ्यात्वं कावकाशः किंचैवमात्मादेश एवास्तु किमहंकारोपदेशेन न चाहंपदार्थात्मो
भेदे न प्रतिपादनं प्रयोजनमिति युक्तं भेदप्रतिपादकपदाभावात् न चोभयोपदेशादेवोभयोर्भेदसिद्धिः अहंपदाद
पि सार्वात्म्यानुरोधेन स्वरूपोपस्थितेरेव त्वयावाच्यत्वात् तयास्वरूप एव भेदप्रसंगात् न चाहंपदं शबलेवृत्तं
तत्प्रसिद्धिनिमित्तो घटादिशब्दानित्यत्वस्य घटांश इव स्वरूपे सार्वात्म्यात्वपः उपदेशाभेदादहंपदार्थभेदासिद्धिः प्रति
वाच्यं चैतन्याहंकारोभयविशिष्टक शेवअभयत्र सर्वत्रा ततादात्म्य प्रसंगात् अहंकारप्रवृत्तिनिमित्तत्वेवपर
स्पराध्यासाभावप्रसंगः अहंशब्दस्समानविषयत्वात् अहंप्रतीतेः ननु भूम्नः सार्वात्म्यमुपदिश्यते जीवस्य तदभेदसिद्धये
तस्यापि सार्वात्म्यमुपदिदिक्षुस्तस्य सार्वात्म्योपदेशो लोकतः परिच्छिन्नतया प्रतीतस्य जीवस्य तत्त्वबुध्यनारोहात् तद
रोहाय मध्ये अहंकारउपदिश्यते तदुपदेशो चाहमर्थस्योपदेशाभेदात् न भेदस्य वाच्यत्वात् तस्यापि सार्वात्म्योपदेशेन
स्वरूपपरत्वस्य वाच्यत्वात् अहमर्थोपाधिक एव जीवः न त्वहमर्थ एवेति परीक्षकाणां बुद्धिरूढं निषत्तौ महं
कारोपदेशः सार्थ इति चेन्न आत्माहंकारोपाधिवशात् परिच्छिन्नतया प्रतीयते वस्तुतः स्वरूपतोपरिच्छिन्न
एवेत्युपदेशे हि अभिलषितार्थलाभः स्यात् न च तथोपदिश्यते किन्तु त्रयाणां सार्वात्म्यमुपदिश्यते तत्र तस्य
त्रयाणामभेदप्रसंगः उपदेशाभेदात् भेदश्च त्रयाणामपि प्रसज्जेते परिच्छिन्नस्य सार्वात्म्योपदेशाद्यात्मक
त्वकल्पनमात्मोपदेशमात्रात् संभवतीति किमर्थोऽहंकारोपदेशः पद्धतेमुपाधिकृतपरिच्छेदव्यावृत्त्या

राम
६

नचवस्तुत्वेनतत्परिच्छेदःकर्माधीनस्तन्नपरिच्छेदोवेत्युक्तं॰अन्योह्यन्यस्मिन्प्रतिष्ठितइतिभेदनिषेधेनात्मनःप्रतिष्ठित
त्वनिषेधादपिनाद्वितीयपरतासिद्धौवाच्येमुत्तरपरिसमाप्तिप्रतीत्या॰अन्योह्यन्यस्मिन्नित्यस्यपूर्वशेषत्वस्यास्वरसत्वे
नतस्याभिन्नवाक्यत्वात्एकवाक्यत्वेपिश्रुतमञ्जसान्यत्वंप्रतिष्ठितत्वंवापूर्वोपच्छिन्नमन्यतएवप्रतियोगितयान्वयस्वारस्यात्द्वितीया
न्यपदेशस्याप्यपितस्य चरमश्रुतेनतयाप्रतियोगितयान्वयोस्वरसएवसएवेदंसर्वमितिवाक्यबलादपिनाद्वितीयपरतास
प्रकाशस्यभिन्नेनजडस्वरूपत्वासंभवात्बाधार्थसामानाधिकरण्येसएवास्तिइदंसर्वंनास्तीत्यस्तिनास्तिपदाध्याहा
रप्रसंगः॰किंचसएवाधस्तादित्युपक्रमेषड्विधैर्भेदस्यैवप्रतीतेःसएवेदंसर्वमितिनसर्वतादात्म्यपरमधस्तादुपरि
ष्टादित्याद्येयप्रधानत्वाभावेनतत्स्य वस्त्वैक्यप्रतिपादकत्वासंभवात्अधस्ताद्दर्शनंह्येवहिस्वरसतःप्रतीय
तेएवकारस्सएवायंदेवदत्तइत्यादाविवषष्ठ्यभिमतार्थःसन्नुपरिष्टादित्यादावन्तेइतितस्मान्नाद्वैतपरंप्रकरणंकिं
त्ववधिसापे क्षेणब्रह्मत्ववाचिनाभूमशब्देनोपक्रमात्तस्यजिज्ञास्यत्वाभिधानात्अधस्तादित्यादिनाअन्योह्यन्यस्मि
न्प्रतिष्ठितइतिचभेदप्रतीतेश्चाद्वैतपरमेवेदंप्रकरणंयदुक्तंसार्वात्म्यश्रुतेरन्यतःप्रत्यापत्त्याशंकाव्यावृत्तयेअ
भेदोपदेशायआत्मोपदेशःइतितन्नतादृशाशंकायास्तत्रापिसुलभत्वेनसार्वात्म्योपदेशासंभवेनाभेदबोधकत्वासं
भवात्कथंचाभेदंकंठतोबोधयन्तीश्रुतिःस्वार्थेप्रामाण्यमलभमानास्वसमानार्थालक्षणैःस्वस्याप्यार्थिका
र्थमुपजीव्यप्रमाण्यंलभतेननुसार्वात्म्यश्रुत्याजडवन्मिथ्यात्वप्रतीतिव्यावृत्तयेअभेदोपदेशःकार्यइतिचे
न्नश्रुतंह्येवमेवभगवद्गीतास्वपितत्रतत्रश्लोकमात्मविदितिवाक्यपर्यालोचनयाश्रीनुर्नारदस्यात्मनिसत्त्वबु

एतस्मिन् रेवतीषु वारवंतीयमग्निष्टोमसाम भवतीति

वे०वि० १ 8

तस्यादित्विचार्योत्तरः आनंदमय इति उपक्रांतस्य परामर्शोस्तीति वाच्यं आनंदप्रचुर्यस्यैवाभासात्वलक्ष-
णया आत्मत्वात्ममत्यनिर्विघ्नोपलक्षणायामपि भागत्यागलक्षणास्वीकारे एरे वैतीवाक्यगतप्रकृत-
धर्मिवाचिनेतछटस्य धर्ममात्रपरत्व इव स्क्र इति वाहानेः उपक्रमे आनंदमयस्वारस्यान्नमयादि विकारप्रा-
यपाठेन विकारार्थस्य ब्रह्मणि वर्तितुमनर्हत्वात् आनंदैकरसे ब्रह्मणि तत्प्राचुर्यवाचिनोपि मयटः प्रयो-
गानुपपत्तेः प्रकृतमर्थविरोधिनो लोकात्तो नुवर्त्तते न च प्राचुर्यवाचिमयटः प्रयोगाद्यथा ब्राह्मणमयो ग्राम
इति न चाल्पत्वनिवर्तिलक्षणया आनंदमयशब्दः परमात्मनि भूमश्चारवदिति वाच्यं मनुष्यानंदादेः उत्तरोत्त-
रज्ञानगुणाधिक्यप्रतिपादनेनैव ब्रह्मानंदे तत्सिद्धेः जीवे मुख्यार्थसंभवे लक्षणायोगाच्च न नु जीवो पि
दुःखप्रचुरो नादिश्रुति नानंदमय इति चेन्न अविद्यायामानंदात्मकब्रह्मप्रतिबिंबस्य जीवस्य ब्रह्मा-
धीनाग्निमद्वा एसन्नाकन यानद्विकारत्वात् किंचानंदमयस्य ब्रह्मत्वे ब्रह्मपुच्छं प्रतिष्ठेति निर्दिष्टं ब्र-
ह्मपुच्छत्वं तस्यानुपपन्नं न ह्येकमेव पुच्छं पुच्छवच्च भवति तस्मात्पुच्छपदेनाधारलक्षणया सर्वा-
धारो ब्रह्मैक वाक्यार्थः तथा च सर्वाधारभूतं ब्रह्मास्यानंदमयस्य प्रतिष्ठा पर्यवसितं रूपमिति
ब्रह्मैवोच्यते तत्तदेव ब्रह्मप्रकरणात् ब्रह्मविदाप्नोति परमित्युपक्रमे प्रसन्नेवेन्मादौ तस्यैव प्रतीतेः राम
अत आनंदमयः कर्तृत्वमनुभवगोचरादन्यो जीव एव॥ ॥तयाद्योपे विज्ञानमयः प्राणेषु हृ- १

बाधवतादात्म्यपरोहंकारश्रुतिर्देहरोकाशमहत्वश्रुतिवदितितन्न तत्राकाशवद्देहापरिच्छेदेनात्मयोनवगमा
त्सार्वात्म्योपदेशात् तदवगमस्य आत्मोपदेशमात्रादपि सिद्धत्वात् तस्माद्भूमात्मनोः पृथगुपदेशात्तयोर्भेदा
र्थ एवाहमुपदेशस्य अहंग्रहणोपासनार्थ इति यथा केचिदाहुः पदार्थं महिमेति कृतिः करणं यस्मिन्निति बहु
तस्याहंकारशब्दोऽहमर्थवाचक इति तन्न बहुव्रीहेरयासंभवात् अयं ह्यहंशब्दो नुकरणं चानितिपरमितिगतिसं
ज्ञकः अतो गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेरिति प्रागेव सुबुत्पत्तेर्भवतोऽनुत्तरपदेन तत्
पुरुषः बहुव्रीहिस्तु सुबन्तापेक्षो विलंबितः किं च बहुव्रीहिर्न घञः अधिकरणस्य सुतरामेव महमुपदेशस्याह
मात्मनो भेदतात्पर्यनिरासेनाहमर्थस्यानात्मत्वं निरस्तं॥ ॥यदाहुः तैत्तिरीयके ब्रह्मविदाप्नोति परमिति सूत्रस्य
यो वेद निहितं गुहायां परमे व्योमन्निति तस्य तु अनुप्रवेशेनाहंप्रत्यये प्रकाशमानत्वं प्रत्यक्तमुक्तं तस्य देहादिसा
धारणात् न ह्यात्मत्वं प्रत्यगात्मानं स्थूलसूक्ष्मतरसूक्ष्मतमोपाधिविवेकेन पंचकोशानवतार्य दर्शि
यतो श्रुतिः विज्ञानं यज्ञं तनुते कर्माणि तनुतेपि चेति श्रुत्या केन विज्ञानमयस्याहंबुद्धिविषयस्याहं
कारस्य निखिलकर्मकर्तृत्वमुक्तं तस्यापि योपाधिमद्रूपांतराभिप्रायेणाह अन्योन्तर आत्मानंदमय इति
अतो न कर्ताहमनुभवगोचर एव जीवः ननु आनंदमयो न जीवः किं तु ब्रह्मैवाभ्यासपदादिभ्य आनंदमया
दन्यस्यानिर्देशादानंदमयस्यैव प्राकरणिकत्वादिति चेन्न नहीदं प्रकरणमानंदमयपर्यवसितं तदुप
क्रमोपसंहारयोरानंदमयाप्रतीतेः न च रसं ह्येवायं लब्ध्वानंदी भवतीति तैत्तिरीयके प्राकाशानंदो।

वैलक्षण्येन सुखेन बोधयितुं प्राणमयाद्यंतरात्मपरंपरामुपदिश्यानंदमयात्मानं तमस्मादंतरात्मनोऽनुपदेशात्तमंतरात्मप
रंपरामुखेन प्रतिपिपादयिषितं ब्रह्मानंदमय इति स्वरसतः प्रतीयते अतो महाप्रकरणाविरोधः अन्नं न चैवं मयाविद्यायाम
प्यात्मोपदेशस्य प्राणपर्यंतत्वप्रसंगः वागादिष्वपि वास्ति भगवः प्राणान्न भूय इति अन्नमय स्पदो वाव प्राणो भूय इति श्रुति वचन
वे०वि० ८ २४ स्य चादर्शनादिति वाच्यं एष तु वा अतिवदति यः सत्येनातिवदती तितु शब्देन प्राणातिवादिनोपि सत्यातिवादिनः प्रकर्षाव
गमात् अतिक्रांतस्योपास्य वस्तुनः वागादिलक्षणस्य वागादिष्वनुक्तस्यातिवादित्वस्य सवाक्यशेषावपत्रपन्नेवं सत्वान एवं
विजानन्नतिवादी भवतीत्यनेन प्राणे प्रतिपादनात् आत्मोपदेशस्य तत्पर्यंतत्वं मन्यमानः शिष्यो भूयो न पप्रच्छ आ
चार्यस्तु प्राणमपि सातिशयं जानन्नेष तु वा अतिवदतीत्यादि उपदिदेश न चैतत्तादृशउपदेशोऽस्ति सर्वपर्यायसाध
रणप्रष्टोपदेशाणवांतरात्मांतरोपदेश इति श्रोतुमप्पयत्र यामहे न च पृष्ट पृष्टवतोरभेदायोगः त्वन्मते जीव
ब्रह्मणोरत्यंतभेदाभावात् कथंचिद्भेदस्य सिद्धांतेपि समानः आनंदप्राचुर्यविशिष्टं प्रतिधर्मिस्वरूपस्य ब्रह्मव
विशिष्टस्य वा पुच्छत्वसंभवात् एतेन सर्वपर्यायसाधारणेन पूर्वतनानंदमयोपदेशप्रघोषत्वात् तस्यैष एव शारी
र आत्मेत्यस्यात्मांतरोपदेशापरत्वमिति स्वतंतनु तस्यैष एव शारीर आत्मेत्यत्र षष्ठ्या भेदप्रतीतेः स एवांतरात्मा
तरोपदेश इति चेन्न परेतरोत्तरस्य पूर्वपूर्वशारीरत्वाभिधानात् सिद्धांते यद्यपि ब्रह्मण एव सर्वत्र शारीरत्वम
त्याय योजनास्ति तथापि नेतनांतरात्मांतरोपदेशासिद्धिः शिरः पक्षादिमत्तया शारीरत्वेन प्रतिपादि रामू ८
तस्य शारीराधिष्ठानाकांक्षायां तस्माद्वा एतस्मादात्मन आत्मपत्र तस्माद्वा एतस्मादित्येतावता प्रकृत

यंतर्योगितिरिक्तमंतःकरणरस्याहंकारातिरिक्तं ज्ञानात्मकं जीवस्वरूपं दर्शयितिस्त्र कारो घ्यत्र अनुभवविषयातिरिक्तं जीवस्य ब्रह्मात्मकं
रूपं न च षट्प्रमाणक प्रतिपाद्यं स वा अयं पुरुषो जायमानः इत्यादिना जन्मजरामरणाद्यनुभवस्यावतः अत्र अनुभवगोचरस्यैवोपन्यासादि
त्यात्राकस्सुषुप्त्युत्क्रांतिकालयोः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद प्राज्ञेनात्मनान्वारूढ उत्सर्जन्यातीत्यादिना सुषुप्ति
एः प्राज्ञशब्दनिर्दिष्टहार्दस्य स्वरूपांतरनिर्देशाद्योपि विज्ञानमय इत्याद्यसंगोदासीनजीवस्वरूपपरमिति सुषुप्त्युत्क्रांत्योर्भेदेने
ति॥ ।।एवं तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीतीति भोक्तारं जीवं दर्शयति तिन त्वयमन्यः परमात्मन एवानुज्ञानंद
र्शयति जीवस्य तु पिप्पलं स्वाद्वत्तीति भोक्तृत्वमेव दर्शयतीति चेन्न एवं सति ब्रह्मवेद ब्रह्मैव भवतीति वाक्यशेषावगतस्य विदुषो
ब्रह्मभावस्यापक्रमगतस्यैकविज्ञानात्सर्वविज्ञानप्रतिज्ञानस्य च बाधप्रसंगात् भोक्तृभोक्त्रोर्भेदाय्यागात् किं विषयानर्हं स्वाद्वत्तीति
श्रुतिरिति चेत्सा हि ब्रह्मस्वरूपस्य सतो जीवस्य बुद्ध्युपाधिरूपेण भोक्तृत्वमनुभवसिद्धमनुवदति स्वरूपेण तस्यैवाभोक्तृत्वं दर्शयितुं
अनत एवायं मंत्रः पैंगिरहस्यब्राह्मणे एवमेव व्याख्यातः तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्त्वमनश्नन्नन्योऽभिचाकशीतीति ज्ञः तावेतौ स
त्त्वक्षेत्रज्ञाविति ननु तत्रापि सत्त्वशब्दो जीवे क्षेत्रज्ञशब्दः परमात्मानमभिदधातीति चेन्न तदेतत्सत्त्वं येन स्वप्नं पश्यत्यथ
योयं शारीर उपद्रष्टा तया व्याख्यातत्वात् ननु तत्रापि स्वप्नद्रष्टृत्वं तदुपद्रष्टृत्वात् जीवेशाविवेकाविति चेन्न येनेति करण
तृतीयांतपदोक्तस्य तदेतदिति परामर्शात् जीवस्यैव स्वप्नद्रष्टृत्वात् शारीर इत्यात्मन्युपजीवि प्रसिद्धेः शारीरत्वं द
न तस्यैवाभिधेयत्वात्॥ ।।अथवा प्यनेनासामपि श्रुतीनां न जीवान्यार्थभेदे तात्पर्यं न पाहि आनंदमयस्यैव ब्रह्मत्वेन
विज्ञानमयातिरेके जीवस्य प्रतिपादनान्नांतःकरणमत्रार्थः अन्नमयादिषु पर्यायेषु पक्षाद्यवयववत्त्वः प्रा
धान्यस्यावयवानामेव प्राधान्यं प्रतिपादितमितः पुच्छं प्रतिष्ठा इति प्राधान्यमवांतरप्रकरणविच्छेदं ब्रह्मविदाप्नोति पर
मिति प्रक्रांतस्य सत्यं ज्ञानमिति लक्षितस्य ब्रह्मण आत्मनः आकाशः संभूत इति कारणत्वमभिधाय तमेवात्मानं जीव
प्राधान्य स्य च प्रतीतेरानंदमयपर्यायेपि आनंदमयस्यात्मत्वात्प्राधान्यप्रतिपादितत्वं स्वरसतः प्रतीयमानं पुच्छब्रह्मणः = २

वे॰वि॰
९

कारत्वेकथंचिद्विकारस्य हस्तपर्वणोनैवर्णनमात्रमेवब्रह्मणोप्युत्तरक्षणसत्तायाः पूर्वक्षणसत्ताधीनत्वापाच्चानंदवि
कारत्वंसुलभमेव नचैतस्मात्तोदुःखाद्यपश्चसंगः मयटः प्रकृत्यर्थातिशयमात्रवाचित्वात्सचातिशयः क्वचित्तस
मानाधिकरण्यविजानीयापेक्षयायथाब्राह्मणमयोग्रामइति क्वचित्स्वाश्रयोत्तरगतसजातीयापेक्षयायथातेजःप्रचु
रोगभस्त्विमानिति इहचदुःखसंबंधस्यब्रह्मणिबाधितत्वात्तज्जीवगतसुखमेवप्रतियोगि अतएव मयडभिप्रेतो
जीवानंदादुत्कर्षश्चानंदवल्ल्यामाख्यायते हेत्वंतरमप्याह सूत्रकारः तद्धेतुव्यपदेशाच्चेति कोह्येवान्यात्कः
प्राण्याद्यदेषआकाशआनंदोनस्यादेषह्येवानंदयातीति प्रकृतमानंदमयंपुच्छलिंगान्नेनेतरछ्वेदनपरा
मत्रूपजीवानामानंदहेतुत्वंव्यपदिश्यते अतश्चानंदयितृत्वात्तज्जीवादन्यएवानंदमयः परमात्मेति विज्ञाय
नइति एवंश्रुतिन्यायैरानंदमयस्यब्रह्मत्वावरूपणावेसमानंदमयाधिकरणंदूषयतांशंकरादीनांब्रह्मविद
चार्यद्रोहादन्यत्किमपिप्रयोजनंनवीक्षामहे अहोनुखलुश्रौतेरपवर्गानुयोज्यता यद्येवंशंकेतोऽप्यहंमर्थमे
दगमकत्वाप्रतीतावपित्वदर्थयोपविज्ञानमयः प्राणेषुहृद्यंतर्ज्योतिरितिश्रुतिमुदाहरंतिजीवस्यहृदया
नभेदसिध्यर्थंतदुदाहरणंनिष्प्रयोजनंतत्रकस्यापिविप्रतिपत्यभावात्तज्जीवेविज्ञानमयशब्दप्रयोगात्
स्वाभिमतविपरीतार्थसाधिकाचेयंश्रुतिः ननुविज्ञानमयशब्दोयस्मिन्नात्मन्यएवांतर्ज्योतिःशब्देनस्वप्र राम
कानुभावपरेणोपस्थाप्यतेविज्ञानमयस्यस्वप्रकाशानुभवासंभवात् इतिचेत्तर्हितस्समग्गुपपादितंसामाना ९

स्य ब्रह्मणः परमात्मनोऽसिद्धेः आत्मशब्दस्य संबंधिशब्दत्वेन समभिव्याहृताकाशाद्यन्नमयपर्यंताधिष्ठातृत्वला
भार्थत्वयाऽऽ मयेऽप्युक्तन्यायस्य तस्यैवाधिष्ठातृत्वेनात्मतया सिद्धत्वात् स एव यः पूर्वस्येत्यनूद्य प्राणमयादिशरीरेष्वधिष्ठा
तृत्वेन विधीयते स एवाधिष्ठात्रधिष्ठेयभावः षष्ठ्यर्थः शारीर इत्यत्राधिष्ठातर्येव शैषिकोऽणस्वसंबंधो भेदेऽपि तद
धिष्ठातृत्वं हि स्वेच्छाधीनतत्प्रवर्तकत्वमतः शारीरोपदेशेन न भेदसिद्धिः भेदाभावेऽप्यधिष्ठातृत्वोपदेशस्येश्वर
स्वारस्येऽप्येवमेवार्थो युक्तः शारीरोपदेशस्योपसर्जनतयाऽन्तरात्मोपदेशस्य प्राधान्यस्य च प्रतीतेः किंचा
नंदमयपर्यायशेषभूतस्य श्लोकस्य ब्रह्मपरत्वात् तद्वदानंदमयस्य ब्रह्मत्वसाधकत्वं तत्तत्पर्यायस्थश्लो
कानां तत्तत्पर्यायस्यावयविपरत्वात् मनोमयपर्यायश्लोके मनोमयपरत्वं न दृष्टमिति चेन्न मनसि म
यनिवृत्तेः श्रुतिपाठनात् प्रकारांतरसंयुक्तमेव न च पुच्छवाक्यश्लोकयोर्ब्रह्मणः साम्श्लोकस्य पुच्छपरत्वं तदपेक्ष
इति वाक्ये नर्त्तेदिति पर्यायप्रधानपरामर्शिना श्लोकस्यानंदमयविषयत्वप्रतिपादनात् किं चास्मिन्नानंदम
येऽस्मादन्निरिक्तानां प्रियादीनां शिरः प्रभृतित्वेनुरूपणात् पुच्छापि तथैव युक्तं सोऽकामयतेत्यनंतरवाक्ये
तस्यैवेन प्रकृतत्वात् ब्रह्मैव परामृश्यते स च पुच्छलिंगेन निर्देशादानंदमयानिर्देशात्मयट्छैव एवं श्रुति।
स्वारस्यसिद्धमानंदमयस्य ब्रह्मत्वं सूत्रकारोप्याह आनंदमयोऽभ्यासादिति आनंदमय इत्यत्र विकारार्थे
मयडिति प्रलपतो जिह्मं सूत्रकार एव लुनाति विकारशब्दान्नेति चेन्न प्राचुर्यादिति असंभवाच्चानादेर्जीवस्य वि

त्वसंभवात् यदुक्तं येनेति तृतीयान्तोपपन्न इति तत्र किं तयोरन्यः पिप्पलं स्वाद्वत्तीति सर्वभिन्नकान्तसन्तान्तसत्वान्तरमेव
तदेतत्तत्सत्त्वं येनेत्यस्त्रोपद्रिरूपतेऽनन्तरे द्वनायः द्वा सुपर्णेत्यत्र जीवपरमात्मप्रतिपादनाविरोधात् अस्मत्तटहि द्विती
यः पक्ष इति चेत् सम्यगभ्यस्त स्वयमविमलो ह्यहं मंत्रः येन पिप्पलान्येव स्वप्नदर्शनरूपे भोगे करणत्वान्न कर्तृत्व
रूपे मनसश्च करणत्वं तत्रापि नित्यमेव यत्रेदमुच्यतेऽहमर्थो नात्मा सुषुप्तिमोक्षयोरननुवर्तमानत्वात् आत्मन
श्च नित्यत्वादिति तन्नाहमर्थस्य सुषुप्तिमोक्षयोरनुवर्तमानत्वात् न च सुषुप्तावनुवर्तनोत्तदानीमहमनुभव
प्रसंगः इष्टत्वात् अत एव नाहं खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीत्युच्यते यदि चाहमर्थस्याप्र
काशः एवस्मात्तदानाहमस्मीत्येव निर्दिश्येत न त्वयमहमस्मीति अयमिति मनुष्यत्वादिपरं मनुष्यत्वादिरू
पेण स्वात्मानं न जानातीत्यर्थः यथा कश्चिद्द्वाऽस्माल्लोकात्प्रेत्यात्मानं वेदायमहमस्मीति किं
च योऽहं वैनमग्निं सावित्रं वेद स एवास्माल्लोकात्प्रेत्यात्मानं वेदायमहमस्मीत्यादौ न च किमपि ना
वेदिषमामप्यहं नावेदिषमिति सुप्तोत्थितपरामर्शदर्शनात् तदाहमनुभवाभवः शंकनीयः तथा सति सं
विद्ज्ञानयोरपि प्रकाशाभावप्रसंगात् एतेन प्राज्ञेनात्मनासंपरिष्वक्तो न बाह्यं किंचन वेद नान्तरमिति श्रु
त्या सुषुप्तावहमर्थाप्रकाश इति निरस्तं न च मोक्षेऽहमर्थानुवर्तौऽज्ञानदुःखादेरनुवृत्तिप्रसंगः संविद
नुवृत्तावपि तथाप्रसंगात् यच्चाहंशब्दप्रत्यभिज्ञानोऽहंकार एवाहमर्थ इति निश्चीयते स च देवांतहितो
भगवता परिगणितः महाभूतान्यहंकारो बुद्धिरव्यक्तमेव चेत्यारभ्य एतत्क्षेत्रमिति वचनात् निर्ममो निर

धिकरणं [illegible] विज्ञायतेनेनेतिविज्ञानमित्यंतःकरणमर्थ्यकेनविज्ञा
नपदेनतदुपहितस्वरूपलक्षणयासामानाधिकरण्यमितिचेत्‌विज्ञानशब्दापिविश्रुतिपद्यमानमह
मर्यात्मत्ववादिनंप्रत्येनचक्षुरेरनुग्राहकत्वमतावत्वस्कंतस्कंइयंश्रुतिर्ज्ञानगुणकत्वंज्ञानात्मकत्वंचाहसु
षुप्त्युत्क्रांत्योर्भेदेनेत्यत्रापिकर्तृजीववैलक्षण्येनप्रतिपाद्यते जीवविलक्षणपरमात्मपरत्वमेवषष्ठेवृ
पाठकसोच्यतेतच्चपाराशर्यविजयेस्पष्टमभिहितंअस्माभिस्तत्रैवद्रष्टव्यंदासुपैतीतिश्रुतिरपिनजीव
स्यभोक्तृभेदप्रमाणंआत्मपरमात्मपरत्वात्नचतयोर्भेदेब्रह्मवेदब्रह्मैवभवतीतिश्रुतिविरोधःनसुभेदेवे
दनसाध्यइत्यनुन्मनोब्रवीतिएवकारवलात्तत्रसादृश्यमेवविवक्षितमित्युक्तमेवअतोनिरंजनःपरमंसाम्य
मुपैतीतिश्रुतिसमानार्थतयासम्यगेवक्रियतेनचैकविज्ञानेनसर्वविज्ञानप्रतिज्ञासंभवःसिद्धांतएवतत्र
संभवस्यमतांतरेत्तदसंभवस्यचसद्विद्याविजयेउपपादितत्वात्पिप्पलादनंचनांतःकरणस्यतस्यैवसंसार
प्रसंगात्किंतुतदवच्छिन्नस्यात्मनएवजीवस्यभोक्तृत्वमनुभवसिद्धमितिहित्वयाप्युच्यतेततश्रुततोन्यत्वे
नप्रतिपाद्यमानंब्रह्मैवस्यात्ननतुजीवःपैंगिरहस्येसत्वक्षेत्रज्ञोःजीवपरएवसत्वमस्त्वीतुजंतुश्चित्त्वभिधान
तजंतुश्चचेतनःप्राणीतुचेतनोजन्मीजंतुजन्यशारीरिणइतिपाठात्तदेवज्ञोपीश्वरएवपोस्यात्मनःकारयि
तातंदेवक्षंप्रवदंतशक्तिमानवचनात्शारीरकतयातस्यश्रुतिसिद्धत्वात्अतएवब्रह्ममीमांसायाःशा
रीरकत्वप्रसिद्धिरपिउपद्रष्टृत्वमपिईश्वरस्यैवजीवस्यद्रष्टृमात्रत्वात्तदध्यक्षत्वरूपोपद्रष्टृत्वस्यब्रह्मत्वे

वे॰वि॰
११

12

दात्मापन्नोहमनुभवगोचरस्तस्यैवलयः स्यच्चाजाग्रतोवस्तुष्वावव्यहमाकारधीःस्यात्तथात्वे चाहमिस्म।
भिमन्यमानएवास्वाप्समिति परामृश्येतिप्रसंगः तस्मानुभवनियमात्‌जाग्रतितदनुभवतया निर्णीतं चैतन्यस्य त
दापिसत्वात्तन्नचानुभवस्मरणयोर्विषयाधिकरणंपरत्वेतहानाकृतागमोवा तदापिसूक्ष्मरूपांतःकरणवच्छि
न्नचैतन्यस्य सत्वात्तावतैवाप्तिप्रसंगपरिहारात्तन्नु किं सूक्ष्मत्वं कारणात्मतापत्तिरितिचेत्ताकिं कारण
मेववर्तते उत कार्यमपि स्याद्येनांतःकरणस्यत्वद्वितीयेनजाग्रदवस्थातोविशेषइतिचेन्नसूक्ष्मतायाअ
निर्वचनीयतात्तन्नचतत्रप्रमाणाभावः सतोसतोवोत्पत्त्यनुपपत्त्याऽसदेवेदमग्रआसीदितिश्रुत्यास्याच
कार्यमात्रे तस्याव रूपाभ्युपेयत्वात्‌अनभिव्यक्तरूपत्वस्यैवासच्छब्दार्थत्वात्तुच्छत्वेऽग्रासीदितिविरो
धादितिमंत्रोच्यतेन तावत्भेदकल्पनागौरवं प्रामाणिकत्वेनादोषत्वात्तन्नचभेदेप्रमाणाभावः तथाहिस
त्योपाधिकभेदस्याभ्युपगमादात्मनतत्रकस्यचिद्वस्तुविशेषस्य प्रतिबिंबोत्पत्तिवत्कल्पनं भेदस्य तादृश
न्यकल्पनं तत्प्रतीतेः भ्रमत्वकल्पनंद्वयोरहंप्रतीतिविषयत्वकल्पनमप्रतीतिपत्वभेदकल्पनंचेतिमह
दिदं गौरवंयच्चज्ञानविषयत्वात्‌अहमर्थस्यात्मभेदसमर्थनं तदपि न प्रयोजकत्वात्तन्नचज्ञानविषयत्वा ५४
संभवः स्वप्रकाशमात्रात्समवेतजन्यज्ञानविषयत्वाद्घाममहंजानामीतिप्रतीत्यनुपपत्तेः अभेदेपि
विषयत्वसमर्थनात्तन्नचज्ञानसामग्रीविरहः मनःसन्निकर्षसत्वात्तन्नच संयोगासंभवः स्वस्वसं राम
बंधविशेषस्यसामग्रीत्वोपपत्तेःतत्संयोगस्याप्यव्यवतित्वंवात्मत्वांशात्प्रत्यदेवतत्सन्निकर्षो ११

हंकार इत्यादि श्रुचहेयत्पायमुपदिश्यते अतो नात्मा भवितुमर्हतीति ॥ ननु बुद्धेरात्मभिन्नत्वेनेन त्वदभिमत
संविदोपि बुद्धिपर्यायवाच्यमहत्तत्त्वानतिरेकप्रसंगात् अध्यवसायात्मकधीपदकरणत्वमात्रेण तत्र बुद्धिश
ब्द इति चेत्तर्हि नात्मनि देहेहमभिमानात्मककार्यकरत्वात्तत्राप्यहंकारशब्द इति भामंगः अभूततद्भावार्थच्वि प्र
त्ययमुत्पाद्याहंकारपदमुत्पादनं संभवात् यच्चेदमुच्यते अहमनुभवविषयस्यात्मत्वे प्रतिशरीरं दुःखादि
धर्मिणस्तस्य भेदस्यावश्यकत्वे गौरवं तद्व्यतिरिक्तस्य तु भेदे प्रमाणाभावात् लाघवं न चात्मयोर्न्यकल्पना
गौरवं तत्राप्यन्तःकरणात्मभेदस्वीकारात् अहमनुभवगोचरस्यात्मत्वे हि विचारः नैवमहमनुभवगोच
रस्य ज्ञानाश्रयत्वानुभवविरोधः ज्ञानाश्रयस्यात्मत्वनियमस्याहंकप्रमाणाभावात् आत्मगत्वेन बु
ध्यादीनां रूपादिवदनात्मधर्मत्वात् किंच मामहं जानामीति ज्ञानविषयत्वमहमर्थस्यानुभूयते तच्चेन
स्वसमवेतजन्यज्ञानविषयत्वेन निरवयवात्मन्याप्यवृत्तिसंयोगासंभवेन ज्ञानसामग्र्यभावात् ।
नाप्यहमर्थधर्मीनित्यज्ञानमस्ति आत्मातिरिक्तनित्यज्ञाने प्रमाणाभावात् न च विषयस्य स्वप्रकाशत्वं
संभवति किंच स्वमयीतो भवतीति श्रुतौ लयः श्रूयते न च ज्ञानस्यैव लयः यच्चेत न पुरुषः स्वपितिनाम
ति प्रक्रांतपुरुषप्रतियोगिकत्वात् न च जीवस्य स्वरूपेण विलयोस्ति प्रत्यभिज्ञाविरोधात् कृतहानादिप्र
संगात् सत्संपत्तिविरोधाच्च उपाधिलये जीवस्य तदभिमानिनो विलयो भवति सत्संपत्तिवाक्यानुसारेण ।
पुरुषलयवाक्यस्य तथैव वर्णनात् न रस्थोपाधेर्विलये श्रुपहिते लयबुद्धिदर्शनात् सउपाधिर्जीवत्व

वि॰वि॰
१२
13

देवोत्वस्यानुपपत्तेः कार्यस्यकारणाभेदे चासतउत्पत्त्यसंभवात् सदेव सोम्येदमग्र आसीदिति श्रुतिर्निर्दिष्टसद्रूपेमानं तस्य
कार्यावस्थाग्रहणपरत्वोपपत्तेः अनभिव्यक्तस्वरूपमसत्शब्दार्थ इति सुक्तं तथा च कार्यं एवोपपद्यते कारणस्या
वस्थाविशिष्टरूपेणाभिव्यक्त्यभावात् तस्मात्तस्य यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वान्यत्रायतनम
लब्ध्वा बंधनमेवोपाश्रयत एवमेव खलु सोम्य तन्मनो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा प्राणमेवोपाश्रय
ते प्राणबंधनं हि सोम्य मन इति मनसो व्यापारोपरममात्रं भवति न मनसो लयः अतो सानसंकोचः एव विवक्षि
त इति किंचाहमर्थस्यात्माभेदे ईश्वरस्याहंबुद्ध्यभावप्रसंगः श्रूयते हि हंताहमिमास्तिस्रो देवता इति स्मर्यते चाहं
कृत्स्नस्य जगतः इत्यादि किंचात्मानं चेद्विजानीयादहमस्मीति पूरुषः किमिच्छन् कस्य कामाय शरीरमनुसंज्व
रेदिति निष्कृष्टात्मविषयं ज्ञानमहंत्वप्रकारकं न याभिलयंतीभ्रांतिरहमर्थस्यानात्मत्वे विरुध्यते अनात्मन्येव
न दोषाय वक्तुं देहोहमिति योद्विजन्यनात्मन्यात्मविज्ञानं शब्दो वाभ्रांतिलक्षण इति स्थितं तत्र हि दोषवंभ्रां
तत्वापादकत्वमुक्तं तत्र भ्रांतिलक्षण इत्युक्तवान्तरा देहोहमित्यत्र बुद्धिरपि विवक्षिता उत्तरत्रात्मविज्ञानमित्युक्तः।
त्वात् सा च बुद्धिरहमिति शब्दसमानविषया अहमिति बुद्धिरेव सैवोत्तरत्रात्मविज्ञानमित्युच्यते इति स्वरसतः
प्रतीयते किंच विरजा विपाप्मा भूयासं ब्रह्मलोकमभिसंभवानीत्यहमर्थसंबंधितया मुक्तिरभिलप्यते तस्मादहमर्थ
एवात्मा अत एव द्वितीये स्तोत्रे पादत्राध्यायेत्र देहोहमिति दोषवदनात्मन्येवेत्युक्तं तत् अनात्मन्यात्मविज्ञा राम
१२
ने शब्दो वाभ्रांतिलक्षण इति अहमिति शब्दो न दोषाय इत्युक्त्वा शब्दो वाभ्रांतिलक्षण इत्यत्रापि स एव विवक्षितः प

जन्मं मनोजन्मामिति वा कल्पं तन्नित्यमेव ज्ञानं किंचिदात्मगोचरमात्मसमवेतमिति वा कल्प्यतां सर्वमपि तत्कुत्र
ष्टोपेक्षया अयमेव अहमर्थगोचरज्ञानाश्रयत्वमहमर्थस्य हि प्रतीयते न चांतःकरणस्य स्वगोचरत्वस्याश्रय
त्वमिष्यते चैतन्यविषयत्वांगीकारेपि न तस्याहमर्थाश्रयत्वसंभवः तेन ग्राह्यमाकारांतरमिमं गीकृत्य तद्विष
यत्वमेव प्रतीयत इति वाच्यं तत्र च यदुक्तं एव दोषः सात्त्विकधर्माभावः यच्च जीवस्य सुषुप्तौ प्रमाणत्वे लयोऽहमभि
मानगोचरोपाधित्वयादेव वाच्य इति तन्नाहमभिमानगोचरस्य शरीरनाशेपि जीवनाशाव्यपदेशात् अतो नाह
रत्वत्वहमेवं संप्रत्यात्मानं जानात्यपत्यहमस्मी मुक्तमनुष्यवान् ह्यभिमानाभावरूपज्ञानसंकोचावस्था
याएव लयशब्दतिविषयत्वसंभवे अंतःकरणस्याहमर्थत्वकल्पनासंभवात् यच्च सुषुप्तावहमर्थस्य सत्वे सप्र
काशेतेति तन्न इष्टत्वात् न चाहमित्यभिमन्यमान एवास्वाप्समिति परामर्शप्रसंगः [illegible] ऽस्मा
स्वरूपस्यैव स्वाभिमतिरूपतया तदाश्रयत्वाभावात् न चाहमित्यभिमतिरासमिति परामर्शप्रसंगः ज्ञानत्वस्याहं
त्वप्रकारकत्वस्य च त्वद्रूपाप्रकाशरूपत्वात् कथमन्यथा ज्ञानमनुभवन्नेवाहमस्वाप्समिति परामर्शप्रसंग इ
त्वया परिहार्यः अहमर्थस्य परामृश्यते अहमस्वाप्समिति अतस्तत्सद्भावमात्रमपि कं किंचानुभवस्मरणयो
वैय्यधिकरण्यं कृतहानाकृताभ्यागमप्रसंगश्च न च सत्स्वरूपेण परिहारः तस्य सुषुप्तौ प्रकाशमानत्वे तत्र
स्मृतिप्रसंगात् अप्रकाशमानत्वे तदध्यासस्यैवासिद्धेः सत्स्वरूपं चक्षुरादिरूपं यदुक्तं तत्त्वभूषणमेवेति तत्त
किमुच्यते निर्वचनीयाय दुपपादनाय सत्स्वरूपं कल्पयसि अनुपपादकं च तत्कार्यस्यैव सत्वे सत्त्वा

मा१

ऽस्मिन्नर्थे निवर्त्तते इत्युक्तौ तीत्यर्थः कर्त्ता वोद्धा विज्ञानात्मा पुरुष इति इममेवमुक्तं यत् मिताप्य कर्तृत्वादिकल्पनात् यद्व
तस्मादेवं विद्वान् जीवन्नस्येत्प्रेवचलेतन् इत्यत्र यथा विज्ञत्वे प्रचलनत्वे सत्यपि तत्प्रयोजकत्वेनोक्तत्वेन सिद्धस्योत्मा
वि॰वि॰ २३ रस्याभावादिवन्नात्र प्रयोगः एवमिहापि भगवति संकल्पप्रयोजकस्य सम्यसंकल्पत्वस्य प्रवृत्तिप्रयोजकस्याप्र
तिहतत्वात्क्लिन्नस्य जीवस्याभावादिवन्नात्र प्रयोगः यदा तस्य प्राप्तिः यत्रैतत्र कर्णा वपि हाग्निनिदग्धमिव नदग्ध
मिवाग्नेरिवज्वलनादि वेष्टणो नीसत्रयथा प्रसिद्धे धर्मादि वप्रयोगः एवमिहापि वेधर्मं च प्रागुक्तमस्य प्र
14 यत्नादिकं च उपक्रमे उभौ लोकावनुसंचरतीत्यभिधानेन कर्तृत्वनिषेधासंभवादेवमेवार्थस्य वाच्यत्वात् स
समानः सन्निति बुद्धिवैशिष्ट्याभिधानात्तदौपाधिकमेव कर्तृत्वमस्योच्यत इति चेत्तत्र तस्य तत्प्रतिपादकत्वासं
भवात् यदाहुराकरः समानः सदृशः सन् केन सन्निहितत्वात् हृदयेन हृदि तिष्ठच पुंडरीकाकारो मांसपिंडः
तात्स्थ्यात् बुद्धिर्हृत् तत् किं पुनः सामान्यं स्वच्छत्वमहित्ववच्छिवैतन्योनुपलब्धिः ज्ञवभास्यावभासकयोर्विवेक क॰६
तोनुपलब्धिः प्रसिद्धा आलोको ह्यवभास्येन सदृशो भवति यथा रक्तमवभासयन् रक्तसदृशो रक्ताकारो भ
वति तथा पीतं लोहितं वावभासयन् आलोकस्तत्सदृशो भवतीति तन्न हृच्छब्देन मांसपिंडस्यैवोपस्थापना
त्मुख्यार्थबाधकाभावेन लक्षणानुपपत्तेः तत्र च न बुद्धेः सन्निधिः तस्मात्समानः साभिमान इत्यर्थः॥
यत्तु भगवानपि केवलात्मकेन निर्देशं निषेधतीति तन्न तथैवास्यांतःकरणतादात्म्याध्यासनिबंधनतमा राम
त्मनः कर्तृत्वमिति केवलशब्दतात्पर्यमिति तन्न भ्रममित्वंप्रकरणेनैव तत्र भ्रमनिरोधात् त्यागोद्दि २३

यत्नोस्ति परः कोयिमतः पार्थिवसत्तम तदैवाहमपंचान्योवक्तुमेवमपीष्यते अन्यपरत्वाद्योन्यपरः अन्यपरत्वादेवेज्ञा
त्मपरः यदि वस्तुतोमदन्यः ज्ञानस्वरूपात्मतो विलक्षणः स्यात्तदानीं ह्येषोहमहं ज्ञानाकारः अन्यस्तद्विलक्षणः अज्ञा
नाकार इति किंशात्मानिर्देष्टुं शक्येत सर्वः ब्राह्मणएपदत्रियवादिर्नात्मवैलक्षण्येन निर्देश्यानिमितं ब्राह्मणादीनां शरी
रगतत्वादिति भावः देहात्मवैलक्षण्यस्यह प्रतिपिपादयिषितत्वात् अत्रात्मनां स्वरूपतो वैलक्षण्ये सति एको ह
मित्येताहशोऽहमपंचान्यः अथ मन्यासि हा इतिवक्तुं शक्यत इत्यत्राह मेवाहमर्थ इत्युक्तं यदा समस्तभूतेषु मानैको
व्यवस्थितः तदा हि कोभवान् सोहमित्येतद्विफलं वचः एकः एकरूपः समस्तभूतेष्वात्मन एकरूपस्यैव विद्यमान
त्वाद्देवादिभेदस्य तत्रासिद्धेः कोभवान् देवो वा ब्राह्मणो वा क्षत्रियो वेति वचः सोहं देवोहं मनुष्योहं ब्राह्मणोहं क्ष
त्रियोहमिति वचो — विफलमित्यर्थः सोहमिति विज्ञेः निषेधस्य विफलत्वोक्त्या अहमिति वचः सफलमिति सि
द्धं साफल्यं चात्र यथार्थत्वमतः सिद्धमहमर्थस्यात्मत्वं ॥ ॥यदप्याह आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषि
ण इति श्रुतिरेवमनस्तादात्म्यापन्नस्यात्मनो भोक्तृत्वमाह मनस्तादात्म्यस्यैव मनोयोगवान् समसमानः सन्नुभौ
लोकावनुसंचरति ध्यायतीव लेलायतीवेति श्रुतिरप्यत्र मानं इत्यत्राह स्वामिध्यात्वयोगेन केवलात्म भगवानपि के
वलात्मनि कर्तृत्वं निषेधयति तत्रैवं सति कर्तारमात्मानं केवलं तु यः पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मति।
रिति श्रीभागवते भगवद्वचनं शोकहर्षभयक्रोधलोभमोहस्पृहादयः अहंकारस्य दृश्यन्ते जन्म मृत्यु
श्च नात्मन इति ॥ ॥उक्तेऽर्थे श्रीशैद्विपसाधारणयोगस्यैवमनसासंभवात् ननात्मेन्द्रियेति श्रुतिरत्रप्रमाणं ध्या
यतीवेत्यत्रैव वक्ता वात्स्यार्थः मुक्तमिवेति वत्स्वहितं चिन्तयन्तकालेनि चिन्तयति तं शाक्रोति स्वहितं च रत्नका

स्मिन्नेव कर्तारं चद्रूपत्नीत्यर्थः । अयं प्रकरणपर्यालोचनसिद्धोऽर्थः तदपर्यालोचनेऽपि एवं सति केवलमिति पदाभ्यां पंचानां
करणत्वसत्त्वेऽपि तदनुष्ठानिरपेक्षो जीवात्मा न कर्तारं यः चद्रूपत्नीति प्रतीयते एवं च तात्विकार्थे प्रापातार्थे च कर्तृत्व
तै०टि० २५ स्यनाहंकारोपाधिकत्वं यथोपि पञ्चनागवतवचनं तत्र जन्म मरणं सूसरीरसंबंधवियोगावेवन चात्मनि तन्नि
षेधः आकारः इत्यूपंत इति च लोकसिद्धानुवादता प्रतीयते न चाहंकारसंबंधित्वया लोकसिद्धोयमर्थः अन्नाद
25 मिति कृतिरहंकारः देहात्माभिमानः तत्संबंधित्वे च लोकसिद्धमेव तत्त एव शोकादिदर्शनात् एवं च कामो
कार्षीन्मन्युरकार्षीन्नमो नम इति वचनादध्यात्मनिबंधनोयं व्यपदेशः एवं भूमविद्यायां जीवशभेद इति पन्नः
॥ ॥तैत्तिरीये सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति तस्माद्वा एतस्मादित्यानमयादन्योन्तर आत्मानंद
मयः रसो वै सः रसं ह्येवायं लब्ध्वानंदी भवति एष ह्येवानंदयातीति ब्रह्माभेदस्यैव मोक्षत्वे रसं लब्ध्वानंदी भव
तीति साध्यसाधकभावकीर्तनं यो बाधितार्थमानं दाश्रयत्वं वचनोपपद्यते तथा यदाह नवीनः सोऽश्नुते सर्वान् कामान् सह ब्रह्मणे
त्यत्र सह श्रुतिः ब्रह्मणो सहत्वं दर्शयंतीन भेदं दर्शयतीति ब्रह्मणा सहार्थत्वायोगात् सहत्वं हि ब्रह्मणः पुत्रेण स
हागतः पितेत्यत्रेव प्रधानक्रियानुकूलतज्जातीयक्रियाकर्तृत्वेन किंवा पत्न्या दृष्टवानुज्ञामात्रेणाद्यः ब्रह्म
णापि भोगप्रसंगात् न द्वितीयः ईश्वरस्य प्राणिमात्रभोगेनुज्ञादातृत्वेन मुक्तौ तस्य विशिष्यनिर्देशो वैयर्थ्यात् ब्र राम
ह्मणः सहत्वे [illegible] भ. त्येन सह भुंक्ते राजेत्यत्र भृत्यस्येवाप्राधान्यमात्ररूपकमिति तस्य सर्वशेषित्वमपि भज्येत २५

पुरुषश्चाथ त्रिविधः संप्रकीर्त्तित इति फलसंगकर्तृत्वत्यागमुक्त्वा न देवयज्ञदानतपः कर्मेत्यारभ्य यस्तु कर्मफलत्या
गी स त्यागीत्यंतेनोपपाद्य कथं कर्तृत्वस्य त्यागः कृतिपरित्यागे कर्मणएवानिष्पत्तेः नापि तद्बुद्धिपरित्यागः विषयाधी
नत्वात् बुद्धेस्तस्मिन् सति तत्त्यागायोगात् इत्याशंक्य स्वतंत्रकर्तृत्वबुद्धिपरित्याग एवात्र विवक्षित इत्यभिप्रायेण पंचैतानि
महाबाहो कारणानि निबोध मे सांख्ये कृतांते प्रोक्तानि सिद्धये सर्वकर्मणां अधिष्ठानं तथा कर्त्ता करणं च पृथग्विधं वि
विधाश्च पृथक् चेष्टा दैवं चैवात्र पंचमं शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः न्याय्यं वा विपरीतं वा पंचैते तस्य हेत
व इति यस्मात् स्वाधीनत्वमुक्तं संख्या बुद्धिः यथावस्थिततत्त्वविषया वैदिक्यानुध्यानुसंहितेति निर्णयेऽधिष्ठानं
शरीरं अधिष्ठीयत इति कृत्यल्युटो बहुलमिति कर्मणि व्युत्पत्तेः मघवन्मर्त्यं वा इदं शरीरमात्तं मृत्युना तदेतदशरीर
स्यामृतस्यात्मनोऽधिष्ठानमिति च वैदिकप्रयोगः कर्त्ता जीवः करणमिंद्रियाणि विविधाश्च पृथक् चेष्टाः पंचात्मा
वायुरभिधीयते एवं चतुर्णामुपादानं दृष्टांतार्थं लोकसिद्धत्वात् पाविधानासंभवात् दैवमिति विधिः देवपरमात्मा
अंतःप्रविष्टः शास्ता जनानां य आत्मानमंतरो यमयतीत्युक्तं नियंतृत्वं विवक्षितं तद्विपरीतदर्शिनं निषेधति त
त्रैवं सति कर्तारमात्मानं केवलं तु यः पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिरिति एवं सति परमात्मा
धीने कर्तृत्वे सति तत्र कर्मणि आत्मानं जीवात्मानं केवलं कर्तारं अनन्याधीनकर्तारं यः पश्यति स
दुर्मतिः विपरीतमतिः अकृतबुद्धित्वात् अनिष्पन्नयथावस्थितबुद्धित्वात् न पश्यति न यथाव

णाग्रहणे तु ब्रह्मणेति समभिव्याहारात् समस्तवस्तुपरिग्रहेपि न दोषः कृत्स्नस्यापि वस्तुजातस्य तदीयत्वात् यामुनेनाभो
ग्यत्वात्सर्वत्वस्य च निरस्तत्वान्निरतिशयत्वस्यापि नलत्वात्प्रसंगात् किंच वैषयिकसुखे सुखस्वरूपत्वे नैरपि काम्यमान
वे०वि० त्वान्न तस्य इहालाभादल्पमेव फलं प्राप्यते किंच लोके यदल्पत्वं काष्ठाभूतं सुखं तत्र यत्सुखस्वरूप
२५ मभिव्यज्यते न देवात्रेति प्रभूतं वैषयिकसुखान्मोक्षसुखमल्पमेव स्यात् प्रभूतसुखाभिव्यक्तस्वरूपम
पीहेति कथमल्पत्वमिति चेत्तत्स्वरूपतारतम्यासंभवेनाल्पसुखात् प्रभूतसुखस्य काम्यत्वं सुखस्याल्पत्वेपि सु
खस्वरूपत्वे तरतम्यभेदेविनि तद्भावात्मुक्तौ पुरुषार्थत्वं कथं स्यादिति एवं च स्वरूपानंदस्यैव पुरुषार्थ
त्वं वदतां आनंदस्य स्वतो ब्रह्मात्मनोऽन्यत्वं न किंचित्प्रयोजनं पश्यामः तत्र हि श्रोत्रियस्य चाकामहतस्येति निरति
शयानंदस्य मुक्तप्राप्यत्वमुच्यते एवं भेदश्रुतिभिर्भेदः प्रतिपन्नः पृथक् च तय आंतर्यामिब्राह्मणे सोवाल्यायां तत्
त्र हि कृत्स्नस्यापि वस्तुनः स्वस्वस्थित्यादेर्भगवदधीनत्वमवगतं आसां च घटकत्वं भेदाभेदश्रुत्योर्विरोधेन तात्प
र्यं भंजनात् श्रुतिभिः खलु श्रुतिभिर्वैशिष्ट्यं प्रतिपादयंतीभिर्भेदश्रुतीनां स्वरूपभेदे तात्पर्यं अभेदश्रुतीनां विशिष्ट
द्वैते तात्पर्यमिति अवगम्यते ॥ एवमादिभिश्च श्रुतिभिरन्याभिश्च सजातीयविजातीयभेदः प्रतिपन्नः स्वगतभेद
श्च सत्यं ज्ञानमनंतं ब्रह्म विज्ञानमानंदं ब्रह्म अंतःप्रविष्टः शास्ता जनानां यः सर्वज्ञः सर्ववित् परास्य शक्तिर्विवि राम
धैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेत्यादिभिः प्रतिपाद्यते मुक्तिदशायामपि भेदश्च वर्णितः भेदश्रुत २५

तस्माद्ब्रह्मणा सहत्वायोगात्तत्सहयोगेत्तीयानापि सर्वान्कामानिति सर्वज्ञाद्बहुवचनाभ्यां मुक्तावनात्मभेदसि
द्धिः तयोरल्पत्वनिवृत्तिमात्रपरत्वात्तत्त्वमतेऽपि सर्वज्ञात्स्या संकुचितवृत्तेरसंभवात्सर्ज्ञ नादीनां जीवेषु बाधि
तत्वात्पृथक्जनानां तत्र तत्र क्रमेण सर्वैः कामैरमरवधूपरिरंभणादिभिरभिव्यंजयन्सुखं तदभिप्रायेण वा सर्वा
न्कामानितित्तीयाचेत्स्वयंभावे सः ब्रह्मस्वरूपेण मुक्तः सह युगपत्परमात्मानमनुभवतीत्यर्थः तथा च स्मृ
तिः सोऽश्नुते सकलान्कामान्क्रमेण सुरर्षभाः विदितब्रह्मरूपेण जीवन्मुक्तो न संशय इति॥ ।उच्यते
अत्र हि भोग्यसाहित्यमेव विवक्षितं गुणानां भोक्त्रनुभाव्यत्वधर्म्यार्थप्राधान्येन निर्देशः सहशब्दस्य
यौगपद्यार्थत्वमनुपपन्नं तदानीं तस्य बाधितत्वात् तत्त्व बहुत्वे सत्येव हि यौगपद्यसंभवः सहप्रयोगेनायत्ति
तेऽस्यंभावेत्तत्तीयाऽस्वंभावानुपपत्तिश्च ब्रह्मविद्याविनयत्वोक्तसर्वज्ञाद्बहुवचनाभ्यामपि भेदः सि
ध्यति सर्वज्ञाद्बहुवचनयोरनन्त्यादेव बहुत्वकपरिहारासंभवः किंच कामानिति काम्यमानत्वं तत्वगम
ते काम्यमानत्वं चानंदाभिव्यक्तिमात्रस्य घटत्वात्तस्यापि स्वतः काम्यत्वप्रसंगात् किंतु प्राप्ताप्राप्तविवेकेन सुख
रूपवृत्तेरेव वा तद्विशिष्टानंदस्य वा काम्यमानत्वात् न तत्प्रमुक्तौ वृत्तिप्रसंगे संसारस्तदवस्थः सुखरूपवृत्ता
वानंदाभिव्यक्तिर्भवति घटाकारवृत्तौ चैतन्याभिव्यक्तिमात्रं स्वतः आनंदाभिव्यक्तेरेव काम्यमानत्वान्न चाद्वैतह
निः स्वरूपभेदानंगीकारादीत्यादिव्याहतभाषणानां व्याहृतिरेवोत्तरं सिद्धांते तु सर्वान्कामानिति भगवद्बहु

ति॥ य इदं मध्वदं वेद आत्मानं दैवमंजसा ईशानं भूतभव्यस्य न ततो विजुगुप्सते एतद्वै तदिति स्वप्नांतं स्वप्नमध्यगतं प
दार्थं [illegible] जागरितांतं जागरितमध्यगतं पदार्थं एवं द्वौ कैरूपादिकमेवं द्वेधा विभज्य दर्शितं तं महांतमित्य
वे०वि० न्वयः अनेन किमत्र पारिशेष्यतः इत्येतत् विवृतं यो मध्वदं कर्मफलभोक्तारं जीवं लिंगमन्यत् प्रछादयतः इदमात्मानं दु
२६ दंशादेरपि लिंगमन्यत् प्रछादयः यद्वा मध्वदं निरतिशयानंदत्वं एवंविधं भूतभव्येशानं परमात्मानं वेद स ततो
भूतभव्यात् न विजुगुप्सते भगवदात्मकतया सर्वेषां स्वोपादेयमेवेति भावः एतद्वै तत् पूर्ववदेव यः पूर्वं तपसो जातम
27 द्भ्यः पूर्वमजायत गुहां प्रविश्य तिष्ठंतं यद्भूतेभिर्व्यपश्यत एतद्वै तदिति यः परमात्मा पूर्वं सर्गादिकाले तपसः संक
२७ ल्पाज्जातं चतुर्मुखं अद्भ्यः अबुपलक्षितभूतेभ्यः पूर्वमजीजनत् करणकलेबरयोगेन हृदयगुहां प्रविश्य भूतैः स
ह तिष्ठंतं चतुर्मुखमपश्यत् भगवानेव पूर्वं चतुर्मुखं सृष्ट्वा स्वानुग्रहलब्धज्ञानशक्तिविशेषेण भूतैः स्वकार्यभूतभु
वनादिभिः सह तिष्ठंतमपश्यदित्यर्थः एतद्वै तत् पूर्ववत् या प्राणेन संभवत्यदितिर्देवतामयी गुहां प्रविश्य तिष्ठं
ती या भूतेभिर्व्यजायत एतद्वै तदिति परदेवतारूपा अदितिर्दितिर्नाशः दो अवखंडने इति धातोः दितिर्यस्या
तीत्यादिना इकारादेशः प्राणेन जीवेन हृदयगुहां प्रविश्य तिष्ठंती संभवति तद्द्वारा स्थूलावस्थाभाक् भवति।
भूतेभिर्भूतैश्च स्थूलावस्थाभाक् भवतीति विशिष्टोपादानत्वमुक्तं एतद्वै तदिति पूर्ववत् अरण्योर्निहितो राम
जातवेदा गर्भ इव सुभृतो गर्भिणीभिः दिवेदिवे [illegible] २६

योव्यावहारिकभेदःसवयाइतिनिरस्तःघटकाशतयाकाशयस्यपृथिवीशरीरमित्याद्याःएवंचनिवृत्तिदीश्वरभेदेभगवत
श्चिदचिद्विशिष्टैचावगतेनस्यापिकस्यचिन्नाइत्त्वबुद्धिंनिवर्त्तयेविशिष्टाद्वैतंश्रुतिपादयन्नद्वैतंकथं नयः नया
हिकठवल्यांचतुर्थखंडेयदेवेहतदमुत्रयदमुत्रतदन्विहमृत्योःसमृत्युमाप्नोतियइहनानेवपश्यतिमनसैवेद
माप्तव्यंनेहनानास्तिकिंचनमृत्योःसमृत्युंगच्छतियइहनानेवपश्यतीत्यत्रखंडादौपराञ्चिखानिव्यतृणत्स्वयं
भूस्तस्मात्पराङ्पश्यतिनांतरात्मन्कश्चिद्धीरःप्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्नितिजीवात्मस्वरू
पंप्रतिपाद्यतमेवार्थंपराचःकामाननुयंतिबालास्तेमृत्योर्यंतिविततस्यपाशंअथधीराअमृतत्वंविदित्वाध्रु
वमध्रुवेष्विहनप्रार्थयंतेइतिविरक्त्युत्तरग्रंथेनब्रह्मस्वरूपंप्रतिपाद्यतेप्रतीचोज्ञानोपायःकइत्यत्राहयेनरूपंर
संगंधंशब्दान्स्पर्शांश्चमैथुनान् एतेनैवविजानातिकिमत्रपरिशिष्यतेएतद्वैतदिति एवंविभागःप्रत्यक्पदा
नुसारात्कृतःस्वयमेवहिप्रत्यक्त्वात्मांतरमपिस्वापेक्षयापरागेवकर्तृत्वमपिभगवत्परमेववाक्यांतरात्मप
दानुसारात्प्रत्यक्शब्दस्तदंतर्यामिपरःयेनैकेनैवानंतोजीवलोकोरूपादिकंजानातितदधीनोजानातिकिमत्र
रूपादिसकलदर्शनहेतुभूतेस्मिन्विद्यमानेकिंपरिशिष्यतेतत्प्रसादेनदुर्विज्ञेयमपिज्ञातस्यातएवेत्यर्थःकिंत
द्दृशंवस्त्वित्यत्राहएतद्वैतदितिरूपादिसकलदर्शनहेतुभूतंवस्तुननुतद्विष्णोःपरमंपदमितिनिर्दिष्टमित्यर्थः
शंकरेणाप्येवमेवव्याख्यातंस्वप्नांतंजागरितांतंचोभौयेनानुपश्यतिमहांतंविभुमात्मानंमत्वाधीरोनशोच

द्रष्टावगमात् ईशावास्ये यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति सर्वभूतेषु चात्मानं ततो न विजुगुप्सते यस्मिन् स
वे॰वि॰ र्वाणि भूतान्यात्मैवाभूद्विजानतः तत्र को मोहः कः शोकः एकत्वमनुपश्यत इति यस्मिन् यदा तत्र तदा एकत्वमनुप
१७ श्यतः सर्वव्यापके एकत्वे पश्यतः सर्वव्यापकं वस्त्वन्तरं नास्तीति पश्यत इत्यर्थः बृहदारण्यके चतुर्थे आद्ये चतुर्थ
ब्राह्मणे इदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमानि भूतानीदं सर्वं यदयमात्मेति सर्वदेवतानान्नाद्वि भूतानामात्म
त्वं तत्तुल्यत्वं वा कावकाशः इति भावः तत्रैव यत्र हि द्वैतमिव भवति तदितर इतरं जिघ्रति तदितर इतरं पश्यति तदितर
इतरमभिवदति तदितर इतरं शृणोति तदितर इतरं मनुते तदितर इतरं विजानाति यत्र वा अस्य सर्वमात्मैवाभूत्
28 तत्केन कं जिघ्रेत् तत्केन कं जिघ्रेत् तत्केन कं पश्येत् तत्केन कमभिवदेत् तत्केन कं शृणुयात् तत्केन कं मन्वीत तत्केन कं
विजानीयात् येनेदं सर्वं विजानाति तं केन विजानीयात् विज्ञातारमरे केन विजानीयादिति यत्र यदा द्वैतं भवति
द्वैतबुद्धिर्भवति स्वतन्त्रबुद्धिर्भवति तदा इतरः स्वतन्त्रः इतरेण स्वतन्त्रकारणेन इतरं स्वतन्त्रं जिघ्रति केनेति वा
ह्यमाणं वा इतरेणेतरेण आहार्यं स्वतन्त्रोऽहं स्वतन्त्रकारणेन स्वतन्त्रं वस्तु जिघ्रामीति बुद्धिर्भवतीति तात्पर्यं एव
मुत्तरत्रापि योज्यं यत्र यदा अस्य ज्ञातुः सर्वमात्मैवाभूत् तत्र तत्केन ज्ञातमभूदिदं वाक्यं इतरमिथ्यात्वपर
मिति पक्षे यदा द्वैतबुद्धिर्भवति तदा इतर इतरेण इतरं जिघ्रति यदा सर्वमात्मैवेत्यद्वैतबुद्धिर्भवति तदा सर्ववस्
निवृत्तेः केन कं जिघ्रेत् कारणाभावात् ज्ञेयाभावाच्चेति नार्थः सर्वमात्मैवाभूदित्यस्याभेदपरत्वे अपि चिद्दृशो वा राम
धात्वाधार्यपरत्वे चिद्दृशो वा धात्र यदा द्वैतबुद्धिर्भवति तदा इतरो अहमितरेण इतरं जिघ्रामीति बुद्धिर्भवति य १७

ईड्यो जैगिवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः एतद्वै तदिति अनेन गुहां प्रविश्य स्थितो द्रष्टा उच्यते अन्तर्यामि
त्वं वा गर्भिणीभिः सुभृतो गर्भ इवारण्योर्निहितो जातवेदा अरण्योश्चोग्निः जागृवद्भिरवहितैर्हविष्मद्भिरप्रम
त्तैः सोमादिहविर्युक्तैर्मनुष्येभिर्मनुष्यैर्दिवेदिवे तत्तत्स्वर्गादिकमुद्दिश्य ईड्यः दिने दिने स्तुत्य वरः एतद्वै तत् पू
र्ववत् यतश्चोदेति सूर्यो अस्तं यत्र च गच्छति तं देवाः सर्वे अर्पितास्तदु नात्येति कश्चन एतद्वै तत् इति तदस्तं ब्रह्मरुद्रा
दिः कोपि नात्येति तिरस्कृत्य तदयातन्नियाम्यत्वात् एतद्वै तत्पूर्ववत् यदेवेह तदमुत्र यदमुत्र तदन्विह मृत्योः स मृ
त्युमाप्नोति य इह नानेव पश्यति मनसैवेदमाप्तव्यं नेह नानास्ति किंचन मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति
अंगुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति ईशानो भूतभव्यस्य न ततो विजुगुप्सते एतद्वै तदिति एवं सर्वप्रपंचा
धिष्ठात तथा वर्तमानं वस्त्वेवामुत्र मुक्तं प्राप्यं च परं मुक्तेति तादृश्यपि रे करूपायतनापयस्त स्यात्मा उपस्यभेदं प
श्यति स पुनः संसारी भवति मनसैव ज्ञानेनैव इदं वस्त्वाप्तव्यं इह प्रपंचे नानाभूतं तेन विनाभूतं किमपि स्व
तंत्रवस्तु नास्ति अयमर्थः यस्मिन् सूर्य उदेति यत्र चास्तं गच्छति तं देवाश्चार्पिताः सर्वे तदु नात्येति कश्चनेत्य पृथ
क्सिद्धवाक्यमानत्यन्तानान्यत्र कुत्रचित्तादृशाशंकावकाशः इति भावः पद्माम मनसैवेदमाप्तव्यमिति
भगवत्प्राप्तिसाधनस्य उक्तत्वात् मोक्षसाधने यो नानात्वं पश्यति कर्मतोन्यस्य वा साधनत्वं पश्य
तीति भावः एतद्वै तत् पूर्ववत् एतद्वै नचिकेतस्य पासोदेवतान्तरं वक्ष्यशंकानिरासाय ब्रह्मदारएपके नेह
नानास्ति किंचनेति वाक्यमपि उक्तार्थकं तत्रैव यस्मिन् पंच पंचजना आकाशश्च प्रतिष्ठित इत्यस्य पाक्

नार्थमेवाद्वितीयपदप्रयोगः एवमद्वैतश्रुतयो विशिष्टाद्वैतं प्रतिपादयंति॥ ॥नन्विममौपनिषद्राद्धांतमसह
मानामिथ्यावादिनः शुद्धाद्वैतमाचक्षते तन्न यदि प्रपंचो मिथ्या दृश्यत्वात् जडत्वात् परिछिन्नत्वात् आवर्त्तमानत्वा
त् शुक्तिरूप्यवत् न चाप्रयोजकत्वं दृग्दृश्ययोः संबंधानुपपत्त्याध्यासिकसंबंधस्य वाच्यत्वात् ज्ञाननिवर्त्यत्वा
वे॰वि॰ १८ न्मिथ्यात्वानुपपत्तिरपि मा तेन च जीवस्य ब्रह्मणोऽन्यत्वात् कथमद्वैतसिद्धिरिति वाच्यं जीवः परमात्माभिन्नः आ
त्मत्वात् परमात्मवत् न चाप्रयोजकत्वं भेदस्य दुर्निरूपत्वादिति तथोपनिषदमपि स्वोत्प्रेक्षितार्थे पातयंत इवा
हुः सत्यज्ञानादिवाक्यं अखंडार्थलक्षणवाक्यत्वात् प्रकृष्टप्रकाशश्चंद्र इतिवाक्यवत् एवं तत्त्वमसीत्यप्य
खंडार्थसमानाधिकरणवाक्यत्वात् सोयं देवदत्त इतिवाक्यवत् समानमेकमधिकरणमर्थो यस्येति हि सामाना
धिकरण्यमुच्यते अतः सत्यं ज्ञानमनंतं तत्त्वमसि अयमात्मा ब्रह्म इत्यादौ स्वरूपस्यैव लक्षणात् अतः सत्यादिवाक्ये
न स्वगतभेदोनतत्र प्रतिपाद्य इति॥ ॥अत्रोच्यते मिथ्यात्वं स्वाभावाधिकरणे प्रतीयमानत्वं प्रपंचस्य देवदत्ता
तरनिष्ठत्वस्यैकेनाभ्युपगमात् सिद्धसाधनं नन्वन्यथाख्यातिरसंभवात् भ्रमानुरोधात् स्वात्मनाभावसा
मानाधिकरण्यमेव मिथ्यात्वं वाच्यं अन्यथाख्यातिश्च विषयेंद्रियसन्निकर्षाभावादनुपपन्ना न हि शुक्ता
विदं रजतमिति ज्ञानदशायां रजतत्वमिंद्रियसन्निकृष्टं तस्मादनिर्वचनीयमेव रजतं तत्रोत्पद्यत इति चे
न्न तत्र सामग्र्यंतरस्यैव कल्पनीयत्वात् यथा च भूतले घटाभावं पश्यामीत्यनुभवे सत्यपि त्वयाङ्गीकृतं प्र राम १८
त्यक्षकारणाभावात् अभावाख्यं प्रमाणांतरमंगीक्रियते इंद्रियान्वयव्यतिरेकयोः स्वाधिकरणग्रह

म३

गाः५

दाद्वैतबुद्धिर्भवतितदाहंतमोहमितरेणेनतंजिघ्रामीत्यपिबुद्धिर्नभवतीत्यपिनार्थः यत्रत्वस्यसर्वमित्यादिदोषनादवस्थान।
मद्वैतज्ञानिनोपिमिथ्याज्ञानेनब्रह्मणोन्यमेवगंधंतथाभूतेनैवघ्राणेनजिघ्रामीतितत्राह पंचमेध्यायेसप्तमेब्रा।
ह्मणे ऽदृष्टोद्रष्टाऽश्रुतः श्रोताऽमतोमंताऽविज्ञातोविज्ञातानान्योतोस्तिद्रष्टानान्योतोस्तिश्रोतानान्योतोस्ति।
मंतानान्योतोस्तिविज्ञातेतिअत्रादृष्टोद्रष्टाइतोन्योनास्तीतिएवंयोजना अनेनान्यस्यपरत्वनिषेधसिद्धेश्चिदचिद्वैशि
ष्ट्यमपिनान्यस्येतिफलितंनारायणोपनिषदिद्वितीयखंडे ब्रह्मानारायणः शिवश्चनारायणः शक्रश्चनारायणः का
लश्चनारायणो दिशश्चनारायणो ऊर्ध्वंचनारायणो ऽधश्चनारायणो ऽन्तर्बहिश्चनारायणः नारायणएवेदंसर्वंयद्भू
तंयच्चभव्यंनिष्कलोनिरंजनोनिर्विकल्पोनिराख्यातः शुद्धोदेवएकोनारायणोनद्वितीयोस्तिकश्चिदितिनद्वितीयः
एतादृशोद्वितीयोनास्तीत्यर्थः तत्रैवब्रह्मानारायणः शिवश्चनारायणः शक्रश्चनारायणो दिशश्चनारायणो विदि
शश्चनारायणो ऽधश्चनारायणो ऊर्ध्वंचनारायणः मूर्तामूर्तंचनारायणः अतश्चेतश्चनारायणः सर्वंऋषयोनाराय
णः नारायणएवेदंसर्वंयद्भूतंयच्चभव्यंअव्यानिष्क्रोनिष्कलोनिरंजनोनिराख्यातोनिर्विकल्पोनिरंजनः शुद्धोदेवए।
न८ कोनारायणोनद्वितीयोस्तिकश्चिदितिनद्वितीयइतिपूर्ववत्॥ ॥उत्तरतापनीयेऽप्येवमेवाद्वयोह्ययमात्माएकल
एवेत्यादि अद्वयः स्वतुल्याद्वितीयरहितः॥ ॥नवमनस्यास्तिद्वैतसिद्धिरात्मैवसिद्धोद्वितीयइति अद्वितीय।
शब्दस्यसद्वाद्वितीयराहित्यएवस्वरसः नत्वेवमपिप्रयोगात्तद्वितीयनिषेधमात्रेण द्विवक्तायांहिद्विती
यंनेत्येवोक्तेनतत्त्वद्वितीयइति अन्योपसर्जनतयाप्रतिपादनेप्रयोजनाभावात् तस्मान्निःसमत्वप्रतिपाद

शापस्थितेरावश्यकत्वात् न च परोक्षाकारांशस्य साक्षिरूपत्वमेव उत्पत्तिप्रतीतेरर्थोऽत्वनुपाधित्वग्रहात् व्यभिचा = ५

ज्ञातयोः सन्निकर्षत्वकल्पनया वा विशिष्टप्रत्ययः तदेहापितत्यात् किंच शाब्दप्रत्यक्षापरोक्षत्वे तो व्यभिचारः शाब्द
स्यत्वेनापरोक्षत्वविशेषणे तद्विशेष्यकत्वाये त्वया कुतो लाघवं स्यात् वा विशेषणसन्निकर्षः कारणं सत्तु प्रमाया
वे॰वि॰ मेव न तु भ्रम इति कल्पनेन लाघवात् जन्यप्रत्यक्षत्वं कार्यतावच्छेदकं न तु प्रमात्वपर्यन्तं गौरवादिति चेन्न
१९ भ्रमे व्यभिचारो यस्य त्वया लोके सामान्येन कारणत्वग्रहासंभवात् न च भ्रमः साक्षिरूपत्वान्न जन्य इति वाच्यं लो
के प्रमायामिव भ्रमस्याप्युत्पत्तिप्रतीतिः सामान्यकारणत्वग्रह यत्रिवंचिद्व्यभिचारे ज्ञानाभावात् सामान्येन का
20 रणत्वग्रह इति वाच्यं तथा सति चक्षुःसंयोगान्जन्यप्रत्यक्षत्वावच्छेदेन कारणत्वे निर्णीते भ्रमस्थले
कारणबाधेनान्यथाख्यात्यसंभवे निर्वचनीयोत्पत्तिसिद्धौ न भ्रमरूपसाक्षित्वा उत्पत्तिप्रतीतेरर्थो
त्वनुपाधिकत्वे सिद्धे जन्यप्रत्यक्षत्वाभावात् व्यभिचारग्रहनिवृत्तौ तदवच्छेदेन कारणत्वग्रह इति।
अपि च रजतसर्पाद्यनन्तकार्यानन्तानन्तकारणनिरूपितकार्यतावच्छेदकतया [illegible] रजतत्व।
सर्पत्वाद्यनन्तधर्मेषु प्रातिभासिकातिरिक्तत्वविशेषणं दातव्यं [illegible] तत्कारणाभावेपि तदुत्पत्तेः [illegible] स४
स्मिन् सन्निकर्षजन्यतावच्छेदके प्रमात्वविशेषणमेव लघुतमं यदि च रजतत्वादिकं व्यावहारिके [illegible] देव
तदेव च तन्नत् कार्यतावच्छेदकं न च तत्र विशेषणं देयमिति चेन्न तदापि [illegible] पूर्वमिदं कार्यं कार्यतावच्छेदकं का राम
रणतावच्छेदकं चांगीकार्यमेवेति गौरवान्न युक्तिः किंच घटज्ञानवदेव रजतज्ञानं [illegible] रजतज्ञानं नष्टमिति १९

स१

णोपदर्शयः पररूपामीतिप्रतीतिः स्यात् तावन्मात्रादिति कल्पनेन तथेहापि दोषस्यान्यस्य वाकारणं नरस्य कल्पनीयत्वात् यदि रज
तेपररूपामीत्यनुभवानुसारेण तद्ज्ञानस्य प्रत्यक्षत्वं तर्हि भावइष्यते तदा ग्रभावोपलब्धेः प्रत्यक्षत्व बहिर्भावांगीकारस्तव
विरुद्धेन घटाभावं पररूपामीत्यनुभवस्य तत्रापि सत्वात् वस्तुतस्तु नात्र प्रत्यक्षसामग्रीविरहः विशेष्यसंनिकर्ष
स्यैव विशिष्टप्रत्यक्षे हेतुत्वात् न च विशेषणसंनिकर्षस्याकारणत्वे [illegible] भीषाछन्नकुंडले कुंडलीति बुध्यापत्तिः तत्रापि त
त्र कुंडलसंयोगमादाय संयोगीति प्रत्यक्षापत्तेः न च संयोगप्रत्यक्षे प्रतियोगि द्रव्य प्रत्यक्षस्य तत्संनिकर्षस्य वा हेतुत्वा
त् तदभावान्न तदभाव इति वाच्यं ममापि तुल्यत्वात् कुंडलीति प्रत्यक्षस्य संसर्गविधया संयोगप्रत्यक्षत्वात् न हि त्वेषण
कतत्संसर्गकत्वद्वितीयबकौदासीन्येन इंद्रियसंयोगावच्छेदेन समवायस्य हेतुत्वाच्च किंच कुंडलीति प्रत्यक्षे कुंडल
स्य कुंडलत्वप्रतिविशेष्यतया तत्संनिकर्षाभावात्कथमिदमापादनं न च कुंडलत्वाप्रकारक कुंडलप्रकारक कुंड
लिप्रत्यक्षापत्तिः इंद्रियसंयोगस्य द्रव्यप्रत्यक्षत्वेन कारणत्वात् न नु संयुक्तसमवायाभावात्कथं द्रव्यजातिप्रत्यक्ष
ल६ मितिचेत् गुणकर्मादिग्रहाव्यापकत्वात् संयुक्तसमवाये प्रतित द्रव्यजातिप्रत्यक्षत्वे कार्यतावच्छेदकं नापि द्रव्यसम
वेतप्रत्यक्षत्वं तद्रूपग्रहणानुपपत्तेः अतः संयुक्तसमवेतप्रत्यक्षत्वं संयुक्तसमवायजन्यतावच्छेदकं तथा च भ्रमस्थले
रजतत्वस्य संयुक्तसमवेतत्वाभावात् न तत्प्रत्यक्षतासंभवः न त्वतीतस्यामतादिविशिष्टप्रत्यक्षप्रसंग इति
चेन्न संयुक्तसमवायो हि स्वप्रतियोगिप्रत्यक्षे कारणं स्याम रूपाभावद्ग्राप्य न तादृशसमवायः न नु जन्यप्रत्यक्ष
मात्रे विषयसंनिकर्ष एव कारणं लाघवात् एवं च तत्तत्संनिकर्षस्य कारणत्वात् विशेषणसंनिकर्षाभा
वे कथं तत्प्रत्यक्षमिति चेन्न प्रत्यभिज्ञाप्रत्यक्षे व्यभिचारात् यदि च तत्र संस्कारसहकारात् स्मृतिसहकारा

स्यपदार्थवाक्याज्जानन्नस्त्वं पदार्थं जानामीत्यनुभवतोऽपरोक्षतो जानामीत्यनुभवप्रसंगइति चेन्न काशी
स्थपदार्थगोचरवाक्यजन्यज्ञानस्यैव स्वयंप्रकाशस्य काशीस्थं पदार्थं जानामीति ज्ञानरूपतया ज्ञानप्र
वे॰वि॰ त्यासत्तिजन्यत्वाभावात् अनुव्यवसायो गीकारेपि कवीनामोऽत्र लौकिकज्ञानसिद्धये संज्ञायाद्यर्थं च ज्ञानप्रत्या
२० सत्तेः स्वीकार्यतया तदनुरोधात् दोषविरोधाः सहकृतज्ञानप्रत्यासत्तिजन्यप्रत्यक्षे शुक्तिलादौ रूप्यिवीव
वदभिव्यंजकाभावात् प्रसक्तात्वं नोपलभ्यत इति कल्पनं तान्नच संज्ञायादेर्ज्ञानाभासत्वं तवैव पुरुषाभा
२५ सत्वात् ज्ञानत्वेनानुभवात् अन्तरावहित्वयापि ज्ञानाभासत्वमुच्यते न नु घटाभासत्वं न च ज्ञाने ज्ञकृतका
रणभावात् अज्ञानत्वं कार्यानुसारेण कारणस्य कल्पनीयत्वात् अन्यथा चक्षुर्जन्यत्वाभावेन स्पर्श
नस्य ज्ञानत्वापरोक्षत्वयोरभावप्रसंगात् अभावज्ञानस्यापि प्रत्यभासत्वप्रसंगेन प्रमाणांतरकल्पनानुपप
त्तेश्च अयं दोषस्तवैव दुष्परिहरः सर्वेषामपि परोक्षार्थानां सदभिन्नतया प्रतीयमानत्वेन सत्त एवाप
रोक्षत्वेन सन् घट इति प्रतीतिवदपरोक्षो घट इति प्रतीतेरावश्यकत्वात् प्रमात्रभेदाभावात् ममापरो
क्ष इति प्रतीत्यभावेपि सत्प्रतीतिवदपरोक्षप्रतीतिः स्यात् ननु ज्ञानस्य प्रत्यासत्तित्वे पर्वतो वह्निसाक्षा
त्कारप्रसंगइति चेन्न प्रत्यक्षसामग्रीतः अनुमितिसामग्र्याः प्रबलत्वान् नचैवं संज्ञायोतरप्रत्यक्षानुपप राम
त्तिः समानविषये प्रत्यक्षसामग्र्याः बलवत्वात् न चैवं पर्वतो वह्निमानित्यत्र प्रसंगः उपनयसामग्रीतोऽनु २०

प्रतीतेरर्थविषयत्वं कथं कल्प्यते सविशेषेऽहीत्निम्यापादित्विचेन्न तन्मायस्याज्ञानवत्तारात्राद्यविषयत्वं हि सन्या
पःशाद्रस्यमारोपयता न प्रतीतिस्तन्व्यारोप्यः अपिच सर्वो ध्वस्त इत्यत्र हि विशेष्यान्वयबाधोऽत्र पक्षे विशेषणसं
बंधध्वंसमन्नन्वयाज्ञानौ तिनिवृत्त्योर्बाधो दृश्यते नाप्यर्थीति निवृत्तीतस्मात्तज्ज्ञानोक्तेरावरूपकत्वात्प्रमा
विशेषणं दातव्यमेवेति किं चाविद्यावृत्तिपक्षे साक्षान्यैवेति तस्याः सन्निकर्षजन्यत्वाभावात् प्रमाविशेषणं
दातव्यमेव इदमाकारवृत्त्यवच्छिन्नचैतन्यमेव रजतावभास इति पक्षेपि तद्वृत्तेर्जन्यत्वात् रजतसंनिकर्षज
न्यत्वाभावाद्विशेषणं देयमेव ननु तद्विषयकज्ञानं हि न सन्निकर्षजन्यं न चेदमाकारवृत्ती रजतविषये
ति चेदुच्यते घटं जानामीति तावत् ज्ञानेऽर्थविषयता प्रतीतिसिद्धा सा किं चैतन्यगताऽत वृत्तिगता नाद्यः व
तेः सविषयत्वे मानाभावेन निर्विषयत्वप्रसंगात् अथ यस्मात् चैतन्यविषयता हि चैतन्याभेदः स च न भासते घ
टो ज्ञानमित्यननुभवात् किं तु वृत्तिगतमेव सविषयत्वं भासत इति तन्न वृत्तेर्हि तद्विषयता तदभिन्नचैतन्या
वच्छेदकत्वमेव न त्वेदं वृत्तेरप्यस्त्येव रजतावभासकचैतन्यावच्छेदकत्वात् न त्वन्यदेव वृत्तौ सविषयत्वमि
ति चेन्न सुखं जानामि ज्ञानं जानामि रजतं जानामीति प्रतीत्यभावप्रसंगात् तस्मात्तदवभासकचैतन्याव-
च्छेदकत्वमेव वृत्तौ सविषयत्वमिति वाच्यं तथा चेदमाकारवृत्तेरपि रजतविषयत्वात् न तत्सन्निकर्षाभा-
वेन तद्ज्ञानासंभवात् प्रमाविशेषणं तस्मिन्नपि पक्षे दातव्यमेव अस्तु वा विशेषणं संनिकर्षोपि जन्य
प्रत्यक्षमात्रे कारणं तथापि न दोषः ज्ञानप्रत्यासत्तेर्विशेषणे सत्त्वात् ननु ज्ञानस्य प्रत्यासत्तित्वे काशी

स्थितिश्चेत्तर्हि वर्तमानकालावच्छिन्नात्मा तं न तत्कालीनप्रत्यक्षे सहकारितयाग्रहमाणोघटादेर्ग्रहणमिति चेन्नतयैं कालोपनये
पि तत्रान्यप्रत्यक्षेण वर्तमानत्वाग्रहात् यतो यस्मिन् काले यत्र प्रमातापादनमात्रं तन्निद्रियो वसुकं प्रत्यक्षापाद
वै०वि० २२ नसंभवः स कालः स्वावच्छेदेन तत्र तद्विशेषणतया ग्राहको नेन्द्रियादिहेतुः न चानुमितिकालस्तादृशः ननु तथापि कालघटि
तव्याप्तिग्रहेण यत्रेदानीं वह्निमानित्यनुमितिस्तत्र वह्निप्रत्यक्षापत्तिरिति चेन्न तादृशकालप्रयुक्तवर्तमान
कालावच्छिन्नविशेषणतया ग्राहिताकप्रत्यक्षानुप्रत्यक्षसामग्रीतो बलवत्वस्य विवक्षितत्वात् यद्वा साक्षात्का
22 रत्वसंदेहयोग्यप्रत्यक्षसामग्रीतोऽनुमितिसामग्री बलवती उपनयाप्रयेत्साक्षात्कारत्वसंदेहयोग्यः
यत्साक्षात्कारत्वबुद्धियोग्यप्रत्यक्षसामग्रीतोऽवाच्छुषत्वादिबुद्धियोग्यप्रत्यक्षसामग्रीतो योग्यसंनिकर
र्षग्रहप्रतिबंधकदोषाघटितोपनीतप्रत्यक्षसामग्रीतो वानुमितिसामग्री बलवती वक्तव्यत्वात् यत्र प्र
त्यक्षानुमितिसामग्रीद्वयसमावेशो साक्षात्करोमीत्यनुभवस्तत्र प्रत्यक्षसामग्र्या अनुमितिप्रतिबंध
कत्वं यत्र तत्समावेशोऽनुमिनोमीत्यनुभवस्तत्रानुमितिसामग्र्याः प्रत्यक्षप्रतिबंधकत्वं च कल्प्यते फ
लबलेन प्रतिबंधकानुगमस्यादोषत्वात् यत्तु प्रत्यक्षमात्रप्रयोजकदोषाघटितोपनीतप्रत्यक्ष
सामग्र्ययेत्तयानुमितिसामग्री प्रबलासंशयोत्तरप्रत्यक्षमेव साध्यरूपस्य तत्र सत्त्वस्य बाधस्य राम
हासाधारणदोषस्य सत्त्वात् पर्वते तदभावात् व्याप्यभ्रमरूपविशेषदर्शनस्यानुमितिसाधारणत्वा २२

मितिसामग्र्या बलवत्त्वात् न चैवं संशयोत्तरप्रत्यक्षभ्रमाभावप्रसंगः दोषाघटितोपनीतप्रत्यक्षसामग्रीतोनुमि
तिसामग्र्याः प्रबलबलत्वात् न चैवं पर्वते वह्निभ्रमानुमित्यनुपपत्तिः ज्ञानप्रत्यासत्तेर्ज्ञानाभाववत्तित्वाप्यपरामर्शादेः प
दोषसाहित्यादिति वाच्यं दोषघटितान्योपनीतप्रत्यक्षसामग्र्या एव बलवत्त्वकल्पनात् न न्वेवं यत्र सौरभ्याप्य
चंदनत्वभ्रमस्तत्र सौरभविशिष्टोपनीतप्रत्यक्षापत्तिः न चेष्टापत्तिः तत्र प्रत्यक्षत्वेनानुभवसिद्धेः तत्र प्रत्यक्षत्वस्य मा
नांतरासंभवनिबंधनतया मानांतरसंभवे तज्जन्यत्वस्यैव वाच्यत्वादिति चेन्न घटद्रव्यपदेन जाते विवक्षितत्वा
तन्नन्वेवमपि यत्र दूरस्थरूपे रूपामत्वनीलत्वसंदेहानंतरं रूपामत्वव्याप्यत्वमालसमवायभ्रमात् रूपामत्वानुमिति
स्तत्रोपनीतरूपामत्वविशिष्टप्रत्यक्षापत्तिः न चेष्टापत्तिः प्रत्यक्षत्वानुभवाभावात् प्रमाणांतरसंनिधानाच्चेति चेन्न
स्वद्रव्यपदेन द्रव्यजातेर्विवक्षितत्वात् नन्वेवमपि यत्राङ्गुल्यग्रस्थे घटे मणिकसंदेहे घटत्वव्याप्यभ्रमात् घ
टत्वानुमितिस्तत्रोपनीतघटत्वविशिष्टप्रत्यक्षापत्तिरिति चेन्न चाक्षुषत्वेन प्रत्यक्षविशेषणात् नन्वेवमपि
यत्र पर्वताग्रवर्तिनि घटे पाषाणघटसंदेहानंतरं पाषाणत्वव्याप्यपर्वताग्रसंबंधभ्रमात् पाषाणत्वानुमितिः त
त्रोपनीतपाषाणत्वविशिष्टप्रत्यक्षापत्तिः न चेष्टापत्तिः प्रत्यक्षत्वाननुभवात् प्रत्युतानुमितित्वस्यैवानुभवादि
ति चेन्न तत्र यदि प्रत्यक्षत्वं नानुभूयते किं त्वनुमितित्वमेव तदा प्रतीत्यनुरोधेन चाक्षुषत्वावयवरूपविशेषभ्रमः
एवद्रव्यजातिप्रत्यक्षे दोषः ननु व्याप्यभ्रमसामग्र्यामितिकल्पनाया वर्तमानकालीनत्वेन विशेषणानवगाहि
विशिष्टप्रत्यक्षसामग्रीबलवती न तु वर्तमानकालावच्छेदेनैव वह्नेः प्रमत्वे पर्वते स्यात् प्रत्यक्षसामग्र्याः सत्वा
त्तेनुमितिसामग्री बलवती अतोऽसंनिकृष्टस्य वह्नेर्वर्तमानकालावच्छेदेन प्रत्यक्षासंभवात् पर्वते वह्नि

त्तिचेन्न त्वन्मतेपि संशयानंतरपुरुषधर्मस्थलेऽनिर्वचनीयोपस्थितिसामग्र्याः अनुमितिसामग्रीप्रतिबंधकत्व
स्यकल्पनतयागौरवस्य तुल्यत्वात् यत्तु विशेषदर्शनसामग्र्याः प्रतिबंधकत्वेनुमितेस्यापुरुषत्वमानुमित
र्थासिसाधयिषाविरहसहकृतार्थसामग्रीप्रतिबंधकत्वस्य तत्रैव सिसाधयिषासहकृतानुमितिसामग्र्या
वे०वि० ग्र्यप्रतिबंधकत्वस्य च कल्पनतयातिगौरवमिति अथवा यत्र मानांतरं नास्ति यत्र च तत्संभवेपि प्रत्यक्षत्वम
२२ नुभूयते संशयोत्तरप्रत्यक्षत्वादौ तत्रैव ज्ञानस्य प्रत्यासत्तित्वं कल्पितेन तत्र वह्निज्ञाने मानांतरसत्वात् प्रत्यक्ष।
त्वाननुभवाच्च न तत्र ज्ञानस्य प्रत्यासत्तिता न तु ज्ञानस्य प्रत्यासत्तित्वेऽनुमानं प्रमाणांतरमेव न भवेत् वन्ह्या
23 दिज्ञानस्य मानसत्वसंभवात् तस्मात् मानांतरसत्वात् वन्ह्यादिज्ञानेन प्रत्यक्षतामिमनुपपन्नेन चानु।
मितित्वानुभवात् प्रत्यक्षत्वाभावः अनुमितेः प्रत्यक्षविशेषत्वसंभवात् न च प्रत्यक्षत्वाननुभवात्सम
त्वाभावानुभवाद्वा प्रत्यक्षत्वाभावः कविकाव्यादिमूलभूतज्ञानेपि तथात्वप्रसंगादिति चेन्न उच्यते
अनुमितिरूपकार्यानुसारेण तावत् व्याप्यपरामर्शत्वेन हेतुतावच्छेदकत्वेन तस्यैव प्रत्यासत्तितयापि जन
कत्वे गौरवं अपि च सिसाधयिषायां सत्यां तत्र तया प्रत्यक्षप्रतिबंधः संप्रतिपन्नः तत्रानुमितेः प्र राम
त्यक्षांतर्भावि सिसाधयिषयानुमितिप्रतिबंधाभावाद्यानुमितिभिन्नप्रत्यक्षत्वं सिसाधयिषाप्र २२
तिबध्यतावच्छेदकं वाच्यं अनुमितेः प्रत्यक्षांतर्भावे तु प्रत्यक्षत्वमेव प्रतिबध्यतावच्छेदकमिति

तस्मादत्रपतत्प्रत्यक्षयोः कथंचिदत्रापि संभवेऽपि तस्य वह्निभ्रमं प्रति दोषत्वे मानाभावादिति तत्र सौरभव्याप्यद
र्शनवे[illegible]भादशायां चंदनत्वभ्रमात् सौरभप्रत्यक्षभ्रमो जायते इत्यवच्छेदकभ्रमो दोष इति सिद्धं तथा च व्याप्य
दर्शनदशायामप्यनुमितिर्न स्यात् अवच्छेदकदर्शनस्य तत्प्रत्यक्षमात्रप्रयोजकदोषसत्त्वात् न चेष्टापत्तिः भ्रम
स्थलेऽवच्छेदकदर्शनकालीने व्याप्यदर्शनेनानुमितेः स्वीकर्तव्यत्वात् तदुक्तप्राबल्यप्रयोजकस्य तत्रा
पि सत्त्वात् कल्पितप्रयोजकमात्रानुसारेण प्रमास्थलेऽनुमितिर्भ्रमस्थले प्रत्यक्षमेवेति वैषम्यकल्पनस्यानुचितत्वा
त् पक्षसंशयानन्तरप्रत्यक्षसामग्रीतोऽनुमितिसामग्री प्रबलेति तत्संशयोत्तरपुरुषप्रत्यक्षोपपत्तिरिति तदपि न
संदिग्धवह्नेः पर्वते भ्रमप्रत्यक्षापत्तेः असंदिग्धपुरुषत्वे सन्निकृष्टे पुरुषे व्याप्यदर्शनादनुमित्यापत्तेश्च यदप्य
सन्निकृष्टस्थविशिष्टप्रत्यक्षसामग्रीतोऽनुमितिसामग्री बलवतीति न पुरुषप्रत्यक्षं वह्निप्रत्यक्षाभाव
असिद्धः न च घटे पच्यमानत्वेन भाविरक्तिमानुपपत्तिः अवर्तमानविशेषणकप्रत्यक्षसामग्रीतोऽपि बल
वत्त्वादिति वदपि न एवमपि कस्यचित् पुरुषतादात्म्यारोपानुपपत्तेः किंच सौरभव्याप्यदर्शनेऽपि सौरभेऽनुमितिर्न
स्यात् सौरभस्य वर्तमानत्वात् अद्वयत्वाच्च यदपि च भ्रमजनकसन्निकर्षीनाश्रयविशेषणकप्रत्यक्षसा
मग्रीतोऽनुमितिसामग्री बलवतीति न पुरुषभ्रमाभावोपपत्तिः सौरभ्याप्रत्यक्षोपपत्तिश्च तत्संयुक्तसम
वायस्य गंधाग्राहकत्वात् एवं पर्वते न वह्निप्रत्यक्षापत्तिरिति तदपि न पर्वते वह्निभ्रमानुमित्यनुपपत्तेः
ननु तात्त्वस्य प्रमासत्त्वेऽनुमितिसामग्र्या निरुक्तप्राबल्यस्य कल्पनत गौरवात् न तावत्प्रमासत्तिर

वे०वि० २३

24

वत्वप्रकारिकानुमितित्वेनियमः तथाचाप्रामाण्यत्वेनव्यतिरेकव्याप्तिज्ञानादप्रसिद्धप्रामाण्याभाववत्वप्रकार
कानुमितिरविरुद्धा तर्हि यत्रवन्ह्यभावस्तत्र धूमाभाव इति व्यतिरेकव्याप्तिज्ञानाद्वन्ह्यभावाभाववत्वप्रकारिकानु
मितिः स्यात् न तु वह्निमत्वप्रकारिकातच्चेष्टापत्तिः इष्टतावच्छेदकाप्रकारकत्वेनवह्न्यर्थिप्रवृत्त्यनुपपत्तेरिति चेन्न
वह्निमानित्यनुमानान्तरात्प्रवृत्तेः नचान्वयव्यतिरेक्यनुमितेर्वन्हौ वह्नित्ववन्ह्यभावाभाववत्वोभयप्रकारक।
त्वापत्तिः इष्टापत्तेः नच पृथिवीत्वादिना इतरभेदानुमानं न स्यात् भेदस्य तादात्म्याभाववत्वाभावादिति वाच्यं
तादात्म्याभावेन भेदानुमानसंभवात् नच तन्निरूपितव्याप्तिज्ञानस्य तदनुमितिहेतुत्वात् व्यतिरेकव्याप्ति
ज्ञानादनुमित्यसंभवः प्रमेयत्वेन व्याप्तिज्ञानादनुमित्यदर्शनेन व्यभिचारज्ञानविरोधिव्याप्तिज्ञानस्य हे
तुत्वस्य वाच्यतया व्यतिरेकव्याप्तिज्ञानस्यापि तादृशत्वेन हेतुत्वात् न च व्यतिरेकिणि साध्यसंदे।
हस्य साध्याभावव्याप्यसंदेहरूपत्वाद्धेतुनिष्ठव्यापकाभावनिरूपितव्याप्यरूपत्वात् व्यभिचारसं
शयाद्व्याप्त्यग्रहादनुमितिर्न संभवतीति वाच्यं पक्षीयसत्त्वस्याप्रतिबंधकत्वादन्यथानुमानमात्रो
च्छेदापत्तेः किंचानुमितेर्मानसत्वेपि न हानिः अनुमितित्वानपायात्तत्तज्ज्ञानानामनंतानां कारणा
नामभावेप्यपूर्वमिथ्यावस्तुसन्निकल्पनापेक्षया साक्षित्वपायस्त्वात् वस्तुतस्तु स्मृतिः प्रत्यक्षमेतित्रिह राम
मनुमानञ्चेत्येयमितिप्रमितिविभागः अयं ते प्रत्यक्षमनुमानं च शास्त्रं च विविधागमं वयं सुविदितं। २३

लाघवं किंचानुमितौ प्रत्यक्षत्ववमानसत्वलक्षणजातिद्वयकल्पने गौरवं यदुक्तं केचिदनुमितेरुपनीतान्तरवैल
क्षण्यमुभयसिद्धं तथा चानुमितित्वस्य हेतोरप्रत्यक्षानुत्पत्तिरनुमितिसामग्र्याः प्रतिबंधकत्वात् तत्रानुमितिसा
मग्री प्रतिबध्यतावच्छेदकमुपनीतप्रत्यक्षत्वे नत्वनुमितिभिन्नत्वविशिष्टं तस्मिन्गौरवात् तथा चानुमितिसामग्र्यानुमितेः प्रतिबं
धासंभवात् अनुमितिः प्रत्यक्षभिन्नेत्यनुमानं प्रयोगीति तन्न तयोर्हि वैलक्षण्यमनुमितित्वतदभाववत्वात् तस्या दर्शना
त् तथा चानुमितित्वाभावविशिष्टप्रत्यक्षानुत्पत्तिरनुमितिसामग्र्याः सत्वात् यत्र श्रूयते अनुमितित्वस्यानुभवत्वव्याप्य
प्रत्यक्षत्वव्याप्यमानसत्वव्याप्यत्वकल्पनापेक्षया लाघवादनुभवत्वव्याप्यत्वमेव कल्प्यतामिति तन्न प्रत्यक्षत्वव्या
प्यत्वाभाववमानसत्वव्याप्यत्वाभावकल्पनापेक्षया तदुभयव्याप्यत्वकल्पनस्यैव लघुत्वात् केचित्तु अप्रसि
द्धाभावसाध्यके अयं वह्नित्वाभाववान् वह्निर्नोष्ण्यकौ न दाहसमर्थप्रवृत्तिजनकत्वादित्यादि व्यतिरेकिण्यप्रस्य
पूर्वोक्तात्तथा उपनयासंभवादनुमानं पृथक् न च साध्यस्याप्रसिद्धत्वात्तद्विशिष्टानुमितेरसंभवः पक्षविशे
षणिकायास्तस्याः संभवात् ननु साध्यांशे सा अवच्छेदकप्रकारकव्यतिरेकव्याप्तिज्ञानं हि साध्यतावच्छे
दकप्रकारकानुमितौ कारणं तथा चाभावसाध्यके घटप्रमाणाभाववादेः साध्यतावच्छेदकत्वात् प्रमा
णाभावाभाववत्वे तद्व्यतिरेकव्याप्तिज्ञानमेवोपकारकं स्यात् न त्वप्रामाण्यत्वेन प्रकृते चाप्रामाण्याभावाप्र
सिद्धेस्तादृशव्यतिरेकव्याप्तिज्ञानासंभवान्नानुमितिरिति चेन्न तद्रूपेण व्यतिरेकव्याप्तिज्ञानं तद्वच्छिन्नाभा

वे०सि०
२५
25

चारोपस्याभावधीहेतुत्वानंगीकारात्तदंगीकारेप्यारोपहेतूपस्थितेःसत्वामपितद्धेतुदोषाभावात्नतादात्म्या
रोपःदोषस्यफलकल्प्यत्वात्किंचप्रतियोगितावच्छेदकस्यसप्रकारकतयोपस्थितस्यभावेग्रन्योन्याभावप्रतीतेःस
र्वत्रदर्शनात्उपसर्जनतयोपस्थितस्यप्रतियोगितावच्छेदकस्यसर्वत्रारोपोवाच्यःकिंचप्राधान्येनोपस्थितस्यारो।
पनियमेघटत्वात्यन्ताभावघटान्योन्याभावयोर्युगपत्प्रतीतिनियमापत्तिःप्राधान्येनैवघटत्वोपस्थितेःतन्नि
यमाभ्युपगमेभूतलनिष्ठयोंघटान्योन्याभावघटात्यन्ताभावयोंकिमपराद्धंतदुभयारोपेचदोषादेवमवश्यं
किंचैवंसंविद्विरोधंवदन्परोद्देकांगतिंयास्यसितत्रह्यन्यथाख्यातिरेवगतिःतत्राप्यनिर्वचनीयोत्पत्तिर्यदोष
तेतदाप्रतीतिर्वस्त्ववच्छिन्नाधिष्ठानकत्वाद्भ्रमोनुपपन्नःइदानींतदवच्छिन्नाभावेनाधिष्ठानाभावेध्या
सासंभवात्तदवच्छिन्नाधिष्ठानकत्वाभावेचतदभिन्नसत्ताकत्वाभावेनतादात्म्याभावात्सामानाधिकरण्य
प्रतीतिरनुपपन्नानतुशुक्तिरजतसंसर्गस्यशून्यतयासंनिकर्षाभावादपूर्वतयाज्ञानप्रत्यासत्तिविरहाच्चत
त्प्रतीतेरसिद्धेर्नान्यथाख्यातिसंभवःनैवंसत्यस्यैवरजतत्वसंसर्गस्यज्ञानेनप्रत्यासन्नस्यप्रतीतिसंभवात्।
ननुसत्यस्यैवप्रतीतौकथमन्यथाख्यातिःतत्राविद्यमानस्यसंसर्गस्यतत्रप्रतीतिरन्यथाख्यातिरितिचेत्
केयंतत्रप्रतीतिःनतावत्तत्रविद्यमानस्यप्रतीतिःतत्राविद्यमानस्यतत्रविद्यमानत्वाभावात्नापितत्रवि।
द्यमानतयाप्रतीतिःसंसर्गविशेषणप्रतीतेःशुक्तिविशेष्यकरजतत्वविशेषणकप्रतीतौरजतत्वसंस

राम
२५

कार्यधर्मसिद्धिमभीप्सतेति प्रमाणविभागो मनुनास्य ततः ज्ञानत्वदनुसारान्नज्ञानस्य प्रत्यासत्तित्वानुमितिजनकत्वेति
पत्तुपत्रपदनुभूतत्वेतत्रैवज्ञानं प्रत्यासत्तिर्भवदुपि भेदस्य यापूर्वं दंडिनिदंडज्ञत्वयाऽयज्ञानेपि वस्तान्सन्निकर्षस्य
तदंडवैशिष्ट्यानुभवप्रसंगादिति नत्वदयुक्तं बाकोदिमूलगंतोत्मैवज्ञकज्ञानं शक्तियोगिविशिष्टाभावप्रत्यक्षादी
नां विशेषणोपनयमात्रेण दर्शितिनत्वज्ञानमात्रस्य प्रत्यासत्तित्वकल्पनान्न चैवमुक्तातिप्रसंगः तत्र तत्रावच्छे
दकः ज्ञानदोषोऽस्येत्यादीनामन्वयव्यतिरेकाभ्यां सहकारित्वकल्पनात्सामान्यरूपेणैकमात्रात्कार्यानुम
तिस्थले विशेषकारणकल्पनस्यायुक्तत्वात् पक्षोक्तमन्यथा स्यादितिमतेरजतएव प्रवृत्तिस्यात् नन्वयुक्तो
ज्ञानस्य स्वविषये प्रवर्तकत्वात् ननु न रजतं विषयः किंतु शुक्तिरेवेति चेन्नान्याकारज्ञानमन्यालंबनमिति
संविद्विरोध इति तन्न रजताकारज्ञानस्यानुत्पालंबनत्वात् विषयएव प्रवर्तकत्वात् न च संविद्विरोधः ज्ञा
काराद्वारेण प्रकारविवक्षायां सप्रकारकज्ञानासिद्धिप्रसंगात् विषयविवक्षायामपि तद्यथाऽस्मन्मात्रवि
षयत्वं तत्सिद्धं एवं च न संविद्विरोधः नवाप्रवृत्त्यनुपपत्तिः यत्रेदंतावच्छेदकवैशिष्ट्यसंविषयीकियते तत्र
ज्ञानस्य प्रवर्तकत्वात् ननु इदं रजतमिति ज्ञाने हि पुरोवर्तिनो रजतत्वविशिष्टाभेदं विषयीकरोतीति न
रजतत्वसंसर्गो रजतमिति स्मृतौ उपसर्जनस्य तस्यारोपासंभवात् स्वातंत्र्येणानुपस्थितस्याप्यारोपे
संसर्गाभावधीनिवामकप्रतियोग्यारोपसमये तादात्म्यारोपप्रसंग इति चेत् तत्त्वपाभया

पूर्वानुभवजन्यत्वात् तस्य च देशान्तरे वैचित्र्यत्वात् भ्रान्त्यनुपपत्त्यान्यत्र सत्त्वं सिध्यति भिन्नविषययोरपि समानप्रकारके ६४

स्य सत्त्वात् यद्वा विषयित्वमेवावस्यानच समूहालंबनासिद्धिः विषयितानां समूहालंबने एकतापन्नानां ज्ञानेकत्वमपरेषां निवं
धनत्वात् समूहाभावश्चैककालावच्छेदेनैकज्ञानगततया एवं च संसर्गस्य सत्त्वेपि विशेष्यासंसर्गीप्रकारकत्वात्तत्र
न्यथाख्यातिसिद्धिः यत्तु विशिष्टज्ञानं विशेषणविशेष्ययोरुभयसंसर्गविषयमभेदज्ञानं च स्वप्रकारभूतधर्मद्वयाश्रया
वे०वि० २५ भेदविषयमिति नियमात् कथं नासत्ख्यातिरिति तन्न तादृशज्ञाने प्रमेयमानाभावात् विशिष्टज्ञानत्वं तु सप्रकारकत्वमेवेति
न तदनुपपत्तिस्तत्र मानेन त्रिकप्रतीतस्य रजतस्यान्यत्र सत्त्वं विना नान्यथाख्यातिः सिध्यति तत्र न भ्रांत्या बाधेन वा सिध्य
26 ति तयोरिह सदसद्भावमात्रविषयत्वात् न च भ्रान्तेः पूर्वानुभवात् भ्रान्त्यनुपपत्तेः न चासत्त्वे निषेधायोगात् त्रैकालिकनिषे
धविषयस्य च तत्र सत्त्वायोगात् बाधानुपपत्त्या तत्सिध्यति तत्र रजतस्याप्यनुभूयमानत्वात् त्रैकालिकत्तदभावस्य।
ए०५ वासिद्ध्या यातात्सदसद्विलक्षणस्य त्रैकालिकाभावेपि सत्त्वोपपत्तेः शुक्तिचेत् रजतत्वस्य वस्तुतो प्रतीयमानतया
तस्यान्यत्र सत्त्वेप्या पूर्वरजतानुभवस्यैव मानत्वात् रजतस्य तत्र प्रतीयमानत्वेपि शुक्तिप्रवृत्तिप्रयोजिकारजतबुद्धि
स्य विषयारजतबुद्धित्वात् संप्रतिपन्नवत् इत्यनुमानेन तल्ले तद्विषयत्वकल्पने लाघवं तत्र रजतस्य विषयमा
नत्वेपि शुक्तिप्रवृत्तिप्रयोजि... सर्वैरुपलंभेन सामग्र्यभावाच्च न तत्र रजतसंभवः वह्निभ्रमादौ च दाहादिप्रसं
गइत्यादितर्कसहकृतेनान्यवसत्त्वसिद्धेः ख्यातिबाधान्यथानुपपत्तिश्चात्र मानं ख्यात्यनुपपत्तेः सत्त्वासिद्धिः वा।
धान्यथानुपपत्तेस्तत्रासिद्धिः न च तत्र सत्त्वप्रतीतिबलात् त्रैकालिकाभावस्यैवासिद्धिप्रसंगः दोषजन्यत्वेन निषे राम २५

गः सत्य एव संसर्गमर्यादया भासेतेतस्य च संसर्गस्य युक्तिलक्षण एव विशेष्ये अविद्यमानत्वादन्यथाख्यातिरिति चेन्न समूहाल
वनमात्रस्य भ्रमत्वप्रसंगात् घटपटसमूहालंबने हि घटरूपविशेष्ये अविद्यमानपटत्वसंसर्गविषयमिति उच्यते विशिष्टज्ञा।
नेतावद्विशेषणविशेष्यसंबंधानां भासमानत्वा सर्वलोकप्रसिद्धा दृष्यन्त्वा एवं समूहालंबने विशेषणादिव्यवस्थाद्यप
नेकिंचित् प्रत्येव किंचिद्विशेषणं नान्यत् प्रतीतिरूपमपि व्यवस्था सर्वलोकप्रसिद्धा नापन्हवमर्हतीति तत्र घटपट।
समूहालंबने घटविशेष्यकत्वावच्छेदेन घटत्वविशेषणकत्वं तत्संबंधसंसर्गकत्वं च पटविशेष्यकत्वावच्छेदेन
पटत्वविशेषणकत्वं तत्संबंधसंसर्गकत्वं चेति न काचिदनुपपत्तिः अन्यथा परोक्तसमूहालंबनेत्वापि भ्रमत्वस
दुर्वारत्वात् अतिरिक्तविषयितापदे तु सैव विशेषणविशेष्यसंसर्गनिरूप्या घटविशेष्यिका घटत्वविशेषणिकात
त्संसर्गिका चेति तत्र विषयितांशे एव विशेष्यता विशेषणता च एवं च विषयितांशे प्रति विशेषणविशेष्ययोस्ता
दृशस्वभावनिबंधन एव परस्परविशेषणविशेष्यभावव्यपदेशः सा च विषयिता समूहालंबने नाना तत्र यत्र विष
यितायां येषां विशेषणविशेष्यसंसर्गाणां निरूपकत्वं तेषामेव दमस्य विशेषणमित्यादिरूपेण परस्परसंबंधित्वं ना।
न्येषां यत्र ज्ञान विषयितायां विशेष्यत्वनिविशेषणसंबंधो निरूपकः सा न्यथाख्यातिः ननु सिद्धांते ज्ञानेरेकस्य ज्ञा।
नमेकमेव विषयिताभेदाद् वस्तानभेदव्यपदेशो वाच्यः तत्र विषयिताभेदे कथं समूहालंबनमेकं विज्ञानं उच्य
ते प्रसरणात्मिकावस्थाए का ज्ञाने का व्यपदेशप्रयोजिका न च परोक्ते प्रसरणाभावः तत्राप्यांतरस्य प्रसरण।

सत्तांगीकारे गौरवं प्रामाणिकगौरवस्यादोषत्वात् सर्वप्रतीतीनां बाधितार्थविषयत्वकल्पने एव च गौरवं एतेनानिर्व
चनीयः स भेदो घटादौ उत्पद्यते तत्प्रतीतिरेव सामानाधिकरण्यव्यवहारनिमित्तमिति निरस्तं किंच विशेषण
वे०वि० २६ द्वयसंसर्गस्यैव सामानाधिकरण्यप्रतीतिनिबंधनत्वस्य नीलमुत्पलमित्यादौ दर्शनात् इहापि स एव वाच्यः तत्राप्य
भेद एव निमित्तमिति चेत् तथापि विशेषणस्यैव तद्वत्भेदाभावरूपत्वात् संसर्गस्य सामानाधिकरण्यव्यवहारनिमित्तत्वा
27 नपायात् तस्य भेद इति नामकरणमात्रेण न तत्कार्यसिद्धिः तथा सत्यपां वह्निनामकरणे ततो दाहप्रसंगात् भेदाविरो
धित्वात् अभेद इति नाममात्रमेव अंगीकृतो हि घटस्य सद्वैलक्षण्यमंगीकुर्वतां सद्भेदः यदप्याहुः बाधान्यथानुपप
त्ते रजतस्य सद्वैलक्षण्ये प्रमाणमिति तत्र किं रजतस्य सद्वैलक्षण्यं विना नेह रजतमिति निषेधो नुपपन्नः उत नेदं र
जतमिति निषेधो वा नेदं रजतमिति नाद्यः देशांतरनिषेधस्य देशांतरसत्वेन विरोधाभावात् न द्वितीयः तादृशस्य बा
धस्यासिद्धेः न तृतीयः इदंपदार्थगतरजतान्यत्वस्य रजतसत्वेन विरोधाभावात् न हि घटस्य पटान्यत्वं पटसत्व
विरोधि इदं रजतमेव न सदिति प्रतीतिः साधिकास्यात् सा तु नास्त्येव न नु बाधायोग्यत्वं सत्वं तत् कथं बाधे
स्यादिति चेत् कोत्र बाधः यदयोग्यत्वं सत्वं किं प्रतिपन्नोपाधौ निषेधः उत स्वाधिकरणे निषेधः नाद्योपि किं
प्रतिपन्नोपाधिरधिकरणं नपाप्रतिपन्नमुत्ताधिष्ठानमात्रेपि प्रतिपन्नेधिकरणे क्वापि निषेधायोग्यत्वं
द्वी२ सत्वमुत प्रतिपन्नेधिकरणे क्वचित् निषेधायोग्यत्वं नाद्यः तस्य लोकरीत्या सोचस्वच्छपदार्थत्वाभावात् लोके राम
हि गेहे देवदत्तो वर्तत इति ज्ञानानंतरं गेहे भ्रांत्या देवदत्तः प्रतिपन्नस्तत्र नास्त्येवेति प्रतीतौ सत्यामप्यावणे सोस्ती २६

धप्रतीत्यपेक्षया तस्माद् दुर्बलत्वात् । अन्यथा तत्त्वापि निषेधस्य सत्यत्वं रजतस्य मिथ्यात्वं च कथं सिद्ध्येत् यदुक्तं त्रैकालिकाभावस
त्वेपि सदसद्विलक्षणत्वप्रतीतियोग्यत्वेऽपि अपघात इति तन्न वक्ष्यमाणदूषणगणग्रासात् तस्मात् त्रैकालिकनिषेध एवात्यन्ताभ
त्वे प्रमाणं क्वचिन्मदीयमिदं रजतमिति भ्रमानन्तरं गेहं गतस्य तत्रैव दर्शने सति इदमेव रजतं मया पूर्वं भ्रमेणात्र दृष्टमस्यत्वया
सातमिति प्रतीतिः अनुमानं वा चैत्रं धेनुमुपास्तीत्यादिप्रतीतिः अधर्मे धर्ममिति या मन्यते तमसावृता इति स्मृतिः अनामर्थ
ख्यातौ प्रमाणं अनिर्वचनीयख्यातौ अनात्मत्वानिर्वचनीयख्यातौ नमानं च भ्रमविषयरजतस्य सद्वैलक्षण्ये प्रमाणाभावात् ॥ यदाहुः
सद्रजतमिति प्रत्यक्षं तत्र मा तेतत्र न तावत् रजतस्वरूपमेव सत्त्वसत्त्वरूपस्य रजतपर्यायत्वेनाप्रसिद्धेः सत्ताजातेः सर्वत्रासिद्धेश्च
तत्प्रतिपिक्षसत्तायां मानाभावात् बाधायोग्यतायाः सत्तायामात्मनोऽन्यत्र मानाभावात् तस्मादधिष्ठानसत्ताकत्वं नाद
त्यमेवेदं ज्ञानं विषयीकरोति न सा च भिन्नत्वे सत्यभिन्नसत्ताकत्वस्य तयासद्द्रे घटितत्वात् न सदन्यद्रजतं प्रत्यक्षविषय इति
तन्न सद्रजतमित्यत्र सदभेदस्य सत्त्वसंसर्गस्य वा रजते प्रतीतेः भिन्नस्याभिन्नसत्ताकत्वस्य क्वाप्यसिद्धेश्च न च ब्रह्मण एव
सत्तारूपत्वात् तदादाय भिन्नयोरभिन्नसत्ताकत्वसंभवः सर्वेषां सर्वतादात्म्यप्रसंगात् न च घटाद्यवच्छिन्नसत्तैव स्वरूपे सत्ता
तया शुक्त्याद्यवच्छिन्नसत्तैव रजतादेः सत्ता अतो नातिप्रसंगः इति वाच्यं तथा सति घटप्रकारात् दृश्यापारसादिप्रकाराप्रसंगस्य प्र
गेवोक्तत्वात् किं चोक्तन्यायेन घटः सन्निमन्त्रापि सद्रूपप्रतीतेर्मिथ्यात्वानुमानेऽसिद्धसाधनं अपि च सद्रजतमिति प्रतीतेः स
त्ताधर्मविषयः सा च त्वयाप्यभ्युपगता चेत् तन्यातिरिक्ता विद्यमानत्वेव सत्ता विरुद्धयोरेकार्थत्वात् बाधायोग्यत्वं वा विषयो
स्तु न्यासान्मनोऽन्यत्र सत्त्वे प्रमाणाभावस्याप्रसिद्धेः घटः सन्निति सत्सामानाधिकरण्यप्रतीतेरेवमानत्वात् न च ब्रह्मणोऽन्यत्र

वे॰वि॰
२७
28

परस्यैव नेदं रजतमिति निषेधः अतो रजतमासीदिति प्रतीत्यभाव इति चेन्न भिन्नत्वे सत्यभिन्नसत्ताकत्वस्य निषेधासंभवात्
किंच शुक्तिगतत्रैकालिकाभावविरोधात् न तत्र प्रतियोगिसंभवः न तु प्रतियोगिसत्तयैव विरोधात् सद्भूतलत्वाद्रजतस्य
नाभावविरोध इति चेन्न लाघवेन प्रतियोगिनैव विरोधात् घटाद्यभावानां प्रतियोगिनैव विरोधात् तत्रापि प्रतियो
गिसत्त्वस्य त्वया निरासात् अधिष्ठानात्मिकाया घटादेः सत्तयैवाभावो विरुध्यत इति यदि तदा इहाप्यधिष्ठा
नात्मिकया रजतसत्तया विरोधादेवेनाभावसंभवः किंच प्रतियोगितदभावयोः सत्त्वासत्त्वमवश्यानुपप
त्तिः यच्चेदमुच्यते अन्यथासिद्धविधिनिषेधप्रसक्ताप्यो रजततदभावयोरा बन्धकत्वे रजतस्येव तदभा
वस्य बाधाभावात् सत्त्वमिति तत्र यद्यभावबुद्धिर्बाधः तदा रजतबुद्धिरपि बाधः प्रसज्येत यदि च विरुद्धैकत्व
भावस्याभावस्य बुद्धिर्बाधः यदि वा अभावत्वेन बुद्धिस्तदा घटाभावभ्रमानन्तरं घटबुद्धिर्बाधो न स्यात् एतेन त्रै
कालिकाभावधीर्बाध इति निरस्तं घटस्य भूतले त्रैकालिकत्वाभावात् यदि च यथार्थज्ञानेनाभावबुद्धिर्बाध
स्तदा उत्तरभावि घटाभावभ्रमेण घटप्रमाया बाधः स्यात् यदि चाभावप्रमा बाधः तदा प्रमात्वं यद्यबा
धितार्थगोचरत्वं तदात्माश्रयः यदि तत्संसर्गवति तत्प्रकारकत्वं तदा तस्य विधिनिषेधयोस्तुल्य
त्वात् कथं बाध्यबाधकभावः यदि च ज्ञानेन निवृत्तिर्बाधः तदा उत्तरकालसत्त्वाभावेपि स्वकालेसत्त्वा
भावः कुतः नहि मुद्गरनिवर्त्यस्य घटस्य स्वकालेप्यसत्त्वं दृष्टमिष्टं वा प्रत्युत निवर्त्यत्वानुपपत्तात्तत्पूर्वं। राम २७

तिसत्वेप्रतीयेतलोकव्यवहारानुसारादेवास्माकमपिनननु सच्छब्दार्थः तन्मतेथनाप्तवाक्यादिनाक्वचिन्नवृद्ध्या।
णाप्रतीतेसन्निनत्रानिषेधसंभवात् नद्वितीयः कश्चिन्निषेधायोग्यस्याप्यन्यत्रनिषेधयोग्यत्ववत् प्रतिपन्नाधिकरणे
कश्चिन्निषेधायोग्यस्याप्यन्यत्रकचित् प्रतिपन्नाधिकरणेनिषेधसंभवान्नद्वितीयःअधिष्ठानेकिंत्वमेधर्मिसत्ताध्यस्यमा
नाभिन्नमध्यासाधिकरणं नाद्यः पूर्वोक्तरीत्यालोकरीत्यादिविरोधेनाधिकरणेनपात्रमविषयेनिषेधायोग्यत्वस्यसत्
रूपत्वाभावात् नद्वितीयः अध्यस्यमानाभिन्नस्याध्यासाधिकरणत्वासिद्धेः स्वाधिकरणेनिषेधोबाधइत्याद्यद्वितीय
व्यसिद्धेरेव एतेनविमतंसदन्यत् बाध्यत्वात् व्यतिरेकेणात्मवदित्यनुमानमपिनिरस्तंसाध्यसाधनयोः पूर्वोक्तवि।
कल्पैर्ययायोगमर्थान्तरत्वादिदोषसत्वात् नचख्यातिबाधान्यथानुपपत्तिः शुक्तिरजतस्यसदसद्विलक्षणत्वेमानंतत्रा
प्यांसत्वासत्वयोरेवसिद्धेः नन्वसत्वेनविरोधात्सद्रूपत्वानसंभवतोप्यधिष्ठानसत्तैवसद्रूपतयाबाध्यत्वात्सद्विलक्षणत्व
ण्यसिद्धिरितिचेन्नख्यातिबाधयोरन्यत्रसत्वेप्युपपत्तेः एवमनिर्वचनीयो नैनाकिंचित्साधकंबाधकानिरूपा। स्प ६
सितपात्रिबाधानंतरमयीहपूर्वंरजतमासीदितिधीप्रसंगः अनिर्वचनीयरजतस्यतत्रसत्वात् ननुनेदंरजतमितिज्ञानेस
तीदंरजतमितिज्ञानासंभवान्नोक्तप्रतीतिसंभवइतिचेन्नाभिन्नत्वेसत्यभिन्नसत्ताकत्वमिदंरजतमितिसामानाधिक
रण्यप्रतीतेर्विषयइत्युक्ततयाभेदप्रतीतेराभासमानाधिकरण्यप्रतीत्यविरुद्धतयातत्प्रतीतेरप्यनयापप्रसंगात्
नादात्म्यसामानाधिकरण्यप्रतीतौसंसर्गमर्यादयाभासतइत्युक्तावपिनसप्रकारकभेदज्ञानंनिष्प्रकारकभेदर
ज्ञानस्यविरोधिनापिनिष्प्रकारकाभिन्नसत्ताकत्वज्ञानस्यतन्निदंरजतमितिसामानाधिकरण्यप्रतीतिर्विष

नादृश्यरजतत्वासंसर्गाग्रहात्तु दृष्टरजतारजतयोर्भेदाग्रहाद्वा यदि प्रवृत्तिस्तर्हि अनिर्वचनीयख्यातिर्दत्तजलांजलिः
स्यात् ननु शुक्तिरजतं सत्यरजततादात्म्येनोत्पद्यत इति तत्तादात्म्याग्रहात्तत्र प्रवर्तत इति चेन्न सत्यरजतावच्छिन्नस
दधिष्ठानकत्वाभावेन तत्तादात्म्यासिद्धेः अभेदस्य वा निर्वचनीयस्योत्पद्यत इति चेत् किं तेन तस्य इष्टसाधनत्वाव
च्छेदकत्वेनाग्रहात्तत्र इहेऽपि प्रवृत्त्यनुपपत्तेः ननु सादृश्यज्ञानात् प्रवर्तत इति चेत् तथा सति प्रवृत्तौ कारणांतरक
ल्पनागौरवं किंच सादृश्यज्ञानात् प्रवृत्तौ शुक्तिरजतसदृशीति ज्ञानादपि प्रवृत्त्यापत्तिः भेदज्ञानान्न प्रवर्तत इति
चेत् तर्हि भेदाग्रहः सादृश्यज्ञानं च प्रवर्तकमिति युक्तं स्यात् तथा च नानिर्वचनीयसिद्धिः शुक्तावेव रजतसादृश्यज्ञाना
त् इष्टाग्रहाच्च प्रवृत्त्युपपत्तेः ननु अनिर्वचनीयमेवेष्टसाधनं तत् समुत्पद्यते तदेवेष्टसाधनं तज्ज्ञानादेव प्रवृत्तिरिति चे
त् न तथा सति संप्रतिपन्नेष्टसाधनतायां यज्ज्ञानं प्रवृत्तिकारणं तथा संप्रतिपन्ने तस्येह कारणत्वं परित्यज्य का
ल्पनिकस्य ज्ञानं प्रवृत्तिकारणमिति कल्पनीयं ततो वरं सन्निकर्षकारणतां परित्यज्य क्लृप्तस्यैव दोषस्य भ्र
मकारणतारूपधर्मकल्पनं अविद्यावृत्तिपक्षे तदपि क्लृप्तमेव पक्षांतरेऽपि परोक्षान्यथाख्यातौ दोषस्य
कारणत्वं क्लृप्तमेव किंच अनिर्वचनीयपक्षे अपूर्वरजतं तत्र इष्टसाधनत्वं तज्ज्ञानस्य प्रवर्तकत्वं स्वाभा
वसामानाधिकरण्यं सत्ताभेद इत्यादीनि बहूनि कल्पनीयानि किंच ज्ञानकारणाभावाच्च न प्रत्यक्ष
भ्रमसंभवः नहि ज्ञानात् प्राग् विद्यमानेनार्थेन सन्निकर्षसंभवः तदभावे च प्रत्यक्षानुत्पत्तिरेवमेवाम
नन्वविद्यावृत्तिरेव हि भ्रमः नांतःकरणवृत्तिः अतो न सन्निकर्षापेक्षेति चेदविद्यावृत्तेरपि साक्षात्का

कालेसत्त्वमेवसिध्येत्तज्ज्ञाननिवर्त्यस्यसद्विलक्षणत्वनिर्बंधोपिनिर्निबंधनः यदिचमिथ्यात्वबुद्धिर्वाधस्तदास्वसमानाधिकर
णात्यंताभावप्रतियोगित्वंमिथ्यात्वमितितदभिमतत्वात्त्रैलोकिकेसत्त्वदनवगमात्तनवाधसिद्धिः स्वसमानाधिकरणात्यंता
भावप्रतियोगिनोबुद्धिर्वाधइत्युक्तावपिवाधासिद्धिः परस्परवाधप्रसंगश्चापिच यदिरजते प्रातिभासिकसत्त्वंत
दभावेव्यावहारिकसत्त्वंपारमार्थिकसत्त्वंवाव्यावहारिकसत्त्वाभावात्पारमार्थिकसत्त्वाभावाद्वासदसद्व्यवस्थे
त्युच्यते तदायदिव्यवहारदशायामवाध्यत्वंव्यावहारिकसत्त्वं व्यावहारिकसत्त्वं प्रतिभासदशायामवाध्यत्वं
प्रातिभासिकत्वमित्युच्यतेतदारजततदभावयोः सत्त्वद्वयमप्यवर्जनीयं प्रतिभासदशायांव्यवहारस्यव्यवहार
दशायांप्रतिभायाश्चरजततदभावयोस्तुल्यत्वात् तुल्यज्ञानेतराबाध्यत्वंव्यावहारिकसत्त्वंतदितरवाध्यत्वंप्रा
तिभासिकसत्त्वमित्यपिनवाध्यत्वस्यस्वाधिकरणनिष्ठात्यंताभावप्रतियोगित्वात्मकत्वेब्रह्मज्ञानेतरविशेषणानर्थ
क्यात्तस्यप्रतियोगितदभावयोस्तुल्यत्वाज्ज्ञाननिवर्त्यत्वात्मकत्वेनतेनभावाभावयोरविरोधसिद्धिः कालतोह्रस्वदीर्घ
भावस्याविरोधाहेतुत्वात्तथासति ध्वंसप्रागभावात्यंताभावान्योन्याभावैः प्रतियोगिप्रतियोगितावच्छेदकयो
रविरोधप्रसंगात्सत्ताभेदमनादृत्यसत्त्वमिथ्यात्वाभ्यामेवविरोधपरिहारेऽस्माकमप्यपः स्वाधिकरणवत्यभाव
प्रतियोगित्वेनैवाभावसामानाधिकरण्यरूपाविरोधसमर्थनात्॥ ॥किंचतूलकारणाभावान्नरजतो
त्पत्तिसंभवः ननुसत्यरजतेयत्कार्यतावच्छेदकंरजतत्वंतत्तदिहास्तीतिकथमसंभवइतिचेन्नर्हियदेवस
त्यरजतगतंरजतत्वंतदवच्छेदेनइष्टसाधनत्वग्रहइति प्रातिभासिकरजतेप्रवृत्तिर्नस्यात्तच्छुक्तिरजते

जतावभासकचैतन्येनप्रमातृचैतन्याभेदस्याविशिष्टत्वात् इदमवछिन्नचैतन्यस्यरजतावछिन्नचैतन्यस्यभे
दमंगीकृत्यइतरेषांरजतावछिन्नचैतन्यभावत्वमित्युक्तोइदंरजतयोस्तादात्म्यभंगः॥ ॥किंचरजतेसतिकथंत
वे॰वि॰ त्तदभावः॥ ॥अत्राहुर्नवीनाः रजतेसत्यपिअधिकरणधर्मावछिन्नरजताभावोनविरुद्धःनचाभावःप्रति
२९ योगिसमानस्वभावःससंबंधिकपदार्थस्यसंबंधिसमानस्वभावत्वात् ततःकथंप्रातिभासिकरजतेसति।
प्रातिभासिकस्तदभावइतिवाच्यंअभावस्यप्रतियोगितावछेदकसमानस्वभावत्वात् अन्यथाऽप्रतिप्रति
30 तत्प्रपंचाभावस्यवास्तवत्वानुपपत्तेः अतस्तत्त्वावेदकत्वमौत्सर्गिकं अतश्चसत्वमेवप्रतियोगितावछेद
कत्वाद्यभावानभ्युपगमेयस्यकदापिरजतेनास्यैवतस्यानाप्तवाक्यात्मदीयमिदंरजतमितिज्ञानेऽप्याप्तवा
क्यान्मदीयंरजतमिदंनभवतीतिज्ञानेप्रमाणस्यात् नचतत्रमदीयत्वस्यैवनिषेधःतस्यतत्रसत्वात्प्रतियो
गिविशेषणत्वानुभवात् अतएवनरजतत्वस्यनिषेधःमदीयत्वाभावाद्वारजतत्वाभावाद्वाऽप्राप्तेनेत्य।
मुक्तमितिजिज्ञासाभावप्रसंगाच्चयत्रविशिष्टाभावत्वात्स्मर्यज्ञानंश्रोतुस्तत्रतस्यैवावरूपकत्वात् अथवाप्र
तियोगितावछेदकस्यप्रतियोगिसंबंधोपेक्षितःनतद्धर्मत्वमपिअन्यथाघटत्वघटरूपादिनिषेधायोगात्
ऽस्तिचरजतेऽधिष्ठानसत्तावैशिष्ट्यप्रतियोगिसमानस्वभावंअतःप्रतियोगितावछेदकसमानस्वभावो राम
रजताभावःपरमार्थइतितन्नतत्रकिंप्रमाणमात्रस्यतत्त्वावेदकत्वमुत्सर्गः उतप्रतेःनाद्यःतावतास्ता २८

ररूपत्वेनतदपेक्षायोग्यात्तदभावेचान्यथाख्यातिपक्षेपितथासुवचत्वात्किंचैवमविद्यावृत्तिरन्यथाख्यातिरूपेति
स्प२ कुतोनकल्प्येततथासत्यर्थापत्तिकल्पनगौरवंनभविष्यतिन्नचस्यात्साक्षेपत्वंभ्रमःसंचानादिरित्तिनसन्निकर्षापि
क्षेतितत्वइदमाकारवृत्त्यवछिन्नचैतन्यस्यैवरजतावभासकत्वाभिधानात्तद्धेतोर्भ्रमजन्यतयारजतसन्निकर्षावतूपभा
वात्तदनभिव्यक्तचैतन्याभेदेनाभिभासमानतान्तस्यचेदमाकारवृत्त्यवछिन्नचैतन्याध्यासादेवसिद्धेरजताकारवृत्ते
नपेक्षणात्तरजतावभासस्यान्यथासिद्धेर्नसन्निकर्षापेक्षेतिचेत्तद्यद्येवंतद्विषयप्रत्यक्षस्यतत्सन्निकर्षजन्यत्वम
नादृत्यान्यथासिद्धिरवलंव्यतेतर्हिदोषेणान्यथासिद्धिरस्तुनियमसंकोचस्योभयत्रतुल्यत्वात्किंचपर्युदायत्तेरज स्प६
तेतत्रपत्तिचतत्सुभयंप्रतीयेतननुप्रतीयेतेवरजतज्ञानमुत्पन्नंनष्टमितिसविशेषणेहीतिन्यायेनसाक्षिणउत्प
त्यसंभवेनतत्प्रतीतेरजतविषयत्वादितिचेन्नप्रतीतेरख्यातिपक्षत्वादितिप्रागेवाभिधानात्तथाह्यथाइदंरजतमि
तिप्रतीतेरवाधितेशुक्तित्वमेवविषयइतिगंगापदवत्ख्यातिप्रसंगात्तत्राप्यविषयत्वांगीकारेपिस्वर्गो
ध्वस्तइत्यपिप्रतीतेःसत्वात्इहापिरजतमुत्पन्नंनष्टमित्यपिव्यवहीयेतकिंचचाकचक्यदर्शनानंतरंप्रा
संगादिनाकिंचित्कालविलंवेनरजतभ्रमेसत्तिपूर्वमेवात्ररजतंस्थितंइदानीमयादृष्टमितिप्रतीतिर्द
स्प२ रूपेतेतत्रकथमर्थापत्तिःप्रतीयेतन्नापिचाविद्यावृत्तेरिदमाकारवृत्तेर्वारजतज्ञानत्वस्यांगीकारात्कथंरज
तज्ञानानुत्पत्तिःअपिचनत्ररजतस्योत्पत्तौतद्रजतंसर्वैरपिगृह्येतवहूनामिदमाकारवृत्तौसत्वामनावृतत्र

तुप्रतीतिबलादेवमदीयमिदंरजतंनभवतीतिव्यवहारंस्वर्गध्वंसस्नानात्स्वर्गोध्वस्तइतिव्यवहारवत्अन्यथात
दीयरजतवत्तदीयरजतत्वतिविद्यमानेपिइहतदीयरजतवत्त्नास्तीतिबुद्धेर्व्यधिकरणधर्मावच्छिन्नप्रतियोगि
वे०वि० ३० तावच्छेदकताकस्याप्यभावस्यसिद्ध्यापत्तेः एवमेवउत्तरोत्तरव्यधिकरणधर्मानादायनिषेधेऽनंताभाववैजा
त्यकल्पनाप्रसंगः तथाघटत्वावच्छिन्नेपटेपटत्वंनास्तीतिबुद्धेर्व्यधिकरणधर्मावच्छिन्नाधिकरणताकाभाव
स्यप्रद्घटत्वावच्छिन्नपटत्वावच्छिन्नेपटत्वंनास्तीतिबुद्धेर्व्यधिकरणधर्मावच्छिन्नाधिकरणतावच्छेदकताका
भावस्यचसिद्धिप्रसंगः तत्राप्युत्तरोत्तरव्यधिकरणधर्मानादायाधिकरणनिरूपणेनंताभाववैजात्यकल्पनाप्र
31 संगश्चयत्त्विदंमतं शुक्तौरजताभावोरजतत्वावच्छिन्नप्र तियोगिकएवसचपरमार्थः अतः प्रतियोगिस
मानसत्ताकोनेतिनतेनविरोधः नचपटेसोप्यभावोरजतविरोध्येवदृश्यतइतिवाच्यंरजतसादृश्यतदभा
वरूपविरुद्धधर्माध्यासेनतदुभयवस्तुभावयोर्भेदात् एवंचघटेरजताभावः प्रातिभासिकः नचप्रतियोगि
नःकल्पितत्वेप्रतियोगिसमानस्वभावत्वा दभावस्यसत्यत्वासंभवः प्रतियोगिविद्यमानतामात्रेणानुदु
पपत्तेः प्रतियोगिनःकल्पितत्वस्यैवाभावसत्यतापादकत्वाच्चेतिनन्नप्रतियोगिनोभावात्तभिन्नसत्ताकत्वे
पिप्रतियोग्यनुयोगिभावसंबंधाभावस्वरूपयोः प्रयोजकत्ववद्विरोधेपिप्रयोजकत्वस्यदुर्निवारत्वा राम ३०
ताविरुद्धधर्माध्यासादभावभेदइत्यपितुच्छंघटस्यापिपटसादृश्यतदभावाभ्यांभेदप्रसंगात्कालभेदेन

प्रपंचाभावस्य वास्तवत्वासिद्धेः नद्वितीयः वेदवाक्यत्वप्रकाशप्रसंगात् श्रुतावपि तत्त्वावेदकत्वबाधोक्तेः यदुक्तं रजते स
त्यपि सत्त्वावच्छिन्नरजतत्वाभावो न विरुद्ध इति तन्न घटो नास्तीति घटो नेत्यादौ घटत्वादेरिव रजतं नास्तीत्यत्रापि रजत
त्वस्यैव प्रतियोगितावच्छेदकत्वात् न च घटो नास्तीत्यादावपि सत्त्वमेव प्रतियोगितावच्छेदकं घटत्वस्यापि निषेधप्र
संगात् न च घटादौ सद्भेदप्रतीतेस्तत्र निषेधासंभवः भिन्नत्वे सत्यभिन्नसत्ताकत्वरूपतादात्म्यप्रतीतेरेव त्वदभिम
तत्वेन सद्भेदस्यैव प्रतीत्याभेदप्रतीतेरसिद्धेः यत्राधिष्ठानात्मकसद्वैशिष्ट्यस्य प्रतियोगिनि सत्त्वात् सत्त्वावच्छिन्नरज
ताभावः संसर्गावच्छिन्नप्रतियोगिकत्वेति प्रतियोगितावच्छेदकसत्त्वसमानस्वभावोभावः परमार्थ इत्युक्तं तद
पि न सत्त्वावच्छिन्नरजते सति तदभावासंभवात् न चाभावस्य प्रतियोगितावच्छेदकसमानस्वभावत्वेन सत्त्वाव
च्छिन्नरजताभावस्य परमार्थत्वान्न विरोध इति वाच्यं लाघवेनाभावस्य प्रतियोगिसमानस्वभावत्वस्यैव वाच्य
त्वात् अधिकरणधर्मावच्छिन्नाभावस्यासिद्धेः प्रतियोगिनि विद्यमाने तदभावासंभवात् न च प्रतियोगितावच्छे
दकावच्छिन्नेनाभावस्याविरोधः गौरवात् न चापनीतदंडे देवदत्ते दंडावच्छिन्नप्रतियोगिकदेवदत्ताभावानुपपत्तिः
इष्टापत्तेः दंडी नास्तीति देवदत्ते दंडाभावस्यैव प्रतीतेः स्वर्गी ध्वस्त इतिवत् ग्रस्तत्वाविशिष्टाभावो विषयस्तथापि
दंडपंतरप्रतियोगिकाभावः न चैवं मदीयमिदं रजतं न भवतीति प्रतीत्यनुपपत्तिः मदीयत्वस्यानिश्चये रजतत्वे
त्यैव प्रतीतेः रजतत्वस्यानिश्चये मदीयं नेत्येवमुभयसंदेहे मदीयत्वरजतत्वान्यतराभाववानित्येव प्रतीतेः एत

न्योन्याभावोपिद्वैतेनचैवमभावसांकर्यदोषःक्वचित्तस्यप्रामाणिकत्वात् घटस्यध्वंसप्रागभावत्वप्रागभावध्वंसत्वा
त्यंताभावात्यंताभावत्वानांपरैरभ्युपगमात् नचवाच्यंशुक्तिनिष्ठतयाऽभिमतोरजतत्वाभावोनाधिष्ठानात्मकः भ्रमत्वेत्वभा
वएवनसिध्येदितिपटाभावेपटोनास्तीतिबुद्धिवद्वैशिष्ट्यांशेभ्रमत्वेपिअभावस्वरूपेभ्रमत्वासिद्धेः वस्तुतोभूतलादेव
पिघटाद्यभावत्वेनतस्यैवभेदेमानाभावात् अन्यथाभूतलेघटसत्वानुपपत्तेः तत्कालेपितदभावस्यावरूपकत्वात्
अस्तिहिघटानयनात्पूर्वंभूतलेतदभावःसघटकालेपितत्रवास्तेःनित्यत्वात्किंपत्वाभ्युपगतिनात्रायोरयोगात्
नचसंबंधस्तयोस्तदानेतिवाच्यंपूर्वोत्तरकालयोरपितदभावापातात् जननविलयशीलस्वभावसंबंधस्याभा
वेऽसंभवात् स्वरूपद्वयस्यसर्वदासत्वात् एतेनसमयविशेषमपेक्ष्यस्वरूपद्वयंसंबंधइतिनिरस्तंस्वरूपयो
स्तत्समयाजन्यत्वात् तदनपेक्षणात् नचप्रतियोगिदेशान्यदेशत्वंसंबंधइतिवाच्यंतस्याप्यभावात्मकतयाकादा
चित्कत्वेसर्वदासत्वप्रसंगात् घटदेशस्यतद्देशतायोगात्ऽतएवभूतलाभावयोर्विशिष्टप्रतीतिजननयोग्यत्वंसंबं
धइत्यपास्तंघटकालेपियावद्वस्तुभावित्वाद्योग्यतायाःसत्वात्तुनिरूपंचाभावत्वंविरहैकस्वभावत्वंचात्यंताभा
वःप्रागभाववत्प्रतियोगिसमानकालीनोनस्यात् अनित्यध्वंसस्यात्यन्ताभावप्रतियोगित्वस्यतत्पदार्थत्वात्।
स्वजन्यविशेषणप्रवेशोनगौरवात् नियतानन्यथासिद्धतयात्यंताभावस्यापिजनकत्वसंभवात् ननुवस्त्वणो
प्यभावत्वेप्रतियोगिनोघटादेरपितदभावत्वात्जन्यत्वाच्चानित्यतास्यादितिचेन्नआरोपितस्यजन्याभावत्व।

वे०वि०
३२

32

राम
३२

विरोधपरिहारे देशाभेदेनापि सोस्तु अन्यथा घटाभावस्य पटसादेशूपत्तदभावाभ्यां भेदप्रसंगात् घटादौ शुक्तिरजताभावस्य प्राति
भासिकत्वमप्यबाधात्न्त्युक्तं न च समसत्ताकस्यैव विरोधित्वात् तदभावात् प्रतियोगिसत्त्वप्रसंगः त्तवाप्यभावाप्रतीतिदशायां
घटे रजतप्रसंगात् कारणाभावादेव न तत्र रजतं तदभावो वा प्रातिभासिक इति चेत्तन्न तुल्ययसत्त्वप्रसंगः परस्पराभावात्मक
भा०४ त्वात् उभयोर्वाभ्युपगमे रजताभावानभ्युपगमविरोधश्च किं च प्रतियोगिसमानसत्ताकस्यैवाभावस्य विरोधित्वे अवि
द्यानिवर्तेरविद्याविरोधाभावप्रसंगः॥ ॥यच्च मतं तत्र रजताभावो नाधिष्ठानात् भिद्यते अधिकरणभिन्नसत्ताक
प्रतियोगिकाभावस्यैवाधिकरणात् भेदात् न न च लाघवादधिकरणभिन्नप्रतियोगिकत्वमेव तत्र प्रयोजकमिति वा
च्यं तत्त्वावेदकाद्वैतश्रुतिविरोधात् [illegible] चाभावाद्वैतश्रुतिविरोधात् न चाभावाद्वैते न परासासंकोचकाभावात् ब्रह्म
णोनंतत्वानुपपत्तेश्च सत्त्याभावस्य दृग्विषयत्वे दृश्यत्वस्य व्यभिचारः न चेत्तद्ब्रह्मा सर्वज्ञं स्यात् अभावश्च न सिद्धे
त प्रतियोगिसमानस्वभावत्वनियमाच्च नाविरहात्माभावः सत्यः संभवति प्रतियोगितावच्छेदकं सत्वं न तत्समान
स्वभावोभाव इति गौरवं रजतमिह नास्तीति स्वस्वत्वो निषेधधीविरुद्धं च अतो रजतमिदमिति सत्यैक्यानुभवान्न सत्ता
भेदाननुभवाच्चाधिकरणैकसत्ताकस्याभावोधिकरणमेव घटादौ तु कैमेद प्रयोजकसत्वात् प्रतियोगिसमा
नस्वस्वभावो न्यएव रजताभावः न चाभावद्वैविध्यानुपपत्तिः यथा घटाभावे घटात् भेदः स्वरूपं पटादौ व्यतिरिक्ता
भावः तथात्रापि संभवात् एवं ध्वंसोपि द्विविधः अधिष्ठाने अधिष्ठानात्मा अन्यत्र तु ऽधिकरणात् भिन्नः प्रपंचा

वे॰वि॰
३२

33

नेहनानास्तीत्यभावाधिकरणत्वया ब्रह्मणः प्रतीतेर्नाधिष्ठानमभावः नचाद्वितीयश्रुतेः संकोचो दोषः ॥ तत्र नञ्जन्यानुरो
धात्तत्संकोचस्यावश्यकत्वात् सप्तम्यर्थबाधादपि हि संकोचमात्रमापाद्यं वस्तुतस्तु न संकोचः नद्वितीयं यस्मिन्नि
ति सप्तमीबहुव्रीह्याश्रयणे ब्रह्मणोऽद्वितीयं नास्तीति निषेधे एकसत्वाविरोधात् ब्रह्मपुनस्तदाक्षेपात् षष्ठीबहुव्री
हिर्वा किमपेक्षया द्वितीयं निषिध्यत इति द्वितीयावध्यपेक्षायामेकमेवेति तेनेह नानेति च विहितस्याभावस्यैव प्रतियो
गित्वयान्वयात् नचानंत्यश्रुतिविरोधः तस्या देशकालवस्तुपरिच्छेदविषयत्वात् वस्तुनापरिच्छेदश्चान्यस्मान्निकर्षश्च
त्वाद्वस्य भेदवाचित्वाभावात् तदभावोनंतशब्दार्थः अन्यत्तत्र परिच्छिन्नत्वापत्तेः सत्यादिवाक्यार्थ इति वदतो भेदनिषेध
परत्वोक्तिः कथमिव संगच्छते सत्यप्रतियोगिकभेदनिषेधपरत्वाभिधानात् संगच्छत इति चेन्न सत्यपदाभावात् तदभावे
पि ब्रह्मण एव तत्त्वावगतेः सत्यपदेनाभिधानात् अन्यत्र प्रतियोगिकभेदनिषेधासंभवात् सत्यप्रतियोगिभेदस्यैव निषेध्य
इति चेन्न देशापरिच्छिन्नभेदनिषेधसंभवात् यत्र विरहैकस्वभावोऽभावः प्रतियोगिसमानस्वभावं स्यात् प्रतियोग्य
भावेतत्प्रतियोगिकस्वरूपालाभात् अतोऽधिष्ठानमेवाभाव इति तन्न ब्रह्मणोऽप्येवं प्रपंचविरहत्वानुपपत्तेः यो हि
विरहस्वभावोऽन्यस्वभावश्च तस्य कथं प्रतियोग्यभावे तत्प्रतियोगिकस्वरूपलाभः नहि स्वभावांतरमात्रेण तत्स्व
भावोपपत्तिः तथा सति दिवदतस्य द्रव्यत्वादिस्वभाववत्वाद्वंध्यासुतपुत्रत्वस्यापि प्रसंगात् तस्मात्प्रतियोगिनोऽविद्य राम
मानतामात्रेण विरहैकस्वभावस्यापि सत्यत्वे वास्यात् प्रतियोगिनः सत्वाभावेन ब्रह्मणः प्रपंचविरहत्वाभावो ३२

प्रतियोगित्वस्यानित्यमात्रेसुलभतया धर्मिसमसत्ताकस्यैवतत्स्यानित्यत्वात्मकत्वात् तस्माद्विरहेकस्यचभावत्वं
चैतन्यस्यैवाभावः नास्तीतिबुद्धेरेकब्रह्मविषयत्वेनालाघवाच्चनानंताभावाः कल्प्याः प्रतियोगिसत्ताविरोधिनोऽभा
वत्वस्यपारिभाषिकत्वाच्च यद्यपिरजतत्ववत् घटस्यैकालिकनिषेधस्तत् प्रमात्वंप्रतिबंधकेसत्यपिकार्यंचप्रसक्त
तेनतथापितस्योभयसमाधेयत्वात् नतोदोषः अन्नयोपिप्रपंचोपशमःशिवोद्वैतःस्वप्रकाशमानंदरूपमभवत्य
त्वस्यसर्वमात्मैवाभूदित्याद्याः ब्रह्मणः प्रपंचाभावात्मत्वंदर्शयंतितथाचस्वानधिकरणानधिकरणत्वंताभा
वप्रतियोगित्वंमिथ्यात्वमुक्तंभवतिनचैतत्पारिभाषिकंसत्तोवृत्तिमत्तःस्वानधिकरणवृत्त्यत्यंताभावप्रतियोगि
त्वात्सत्येऽसंभावितस्यैवमिथ्याशब्दार्थत्वात् अत्यंताभावप्रतियोगित्वमात्रंसत्यमात्रेप्यस्तीतिद्वितीयानधिकरण
विशेषणंपरमतेवियदत्यंताभावेसिद्धसाधनात् स्वानधिकरणपदंनचस्वानधिकरणंस्वाभावःतदनधि
करणकाभावप्रसिद्धसएवेतितत्प्रतियोगित्वात् घटादेःसिद्धसाधनमितिवाच्यंस्वानधिकरणाधिकरणक
त्वाभावस्यविवक्षितत्वात् घटाभावस्यचपटवृत्तित्वात्स्वानधिकरणवृत्तिस्वाभाववृत्तित्वंवामिथ्यात्वंअ
वे०वि० भावस्य कदाचित्तदनधिकरणत्वं कुतः यदि घटसामग्रीसत्त्वाद्घटाधिकरणत्वमसत्त्वाद्घटानधिकरणत्व
५८ मिति तर्हि तत एव घटाभावानधिकरणत्वमिति पक्षेऽप्युपपन्नप्रतीतेर्वैलक्षण्यमुक्तं तत्र प्रतियोगिवैलक्षण्य
एवान्यथा देवदत्तपुत्रत्व यज्ञदत्तपितृत्वत्वयोरेकत्र विष्णुमित्रविषययोर्वैलक्षण्यप्रसंगात् नचैकस्मि
50 न्प्रतियोगिकत्वानुपपत्तिः लाघवेनैकस्योभयप्रतियोगिकत्वेऽपि क्वचिद्दर्शनमात्रस्याकिंचित्करत्वा
न्न्यायत्वात् किंच योपस्येमादितन्न घटत्वात्यंताभावस्य घटाभेदविरोधित्वेन घटभेदत्वात् तदीयभेदप्रयो
जकनिर्बंधस्तु व्यर्थः अभेदः प्रतियोगीति पक्षोऽपि निर्व्यूढः घटत्वस्यैवाभेदत्वात् तत्र वचनानामेवमाभ्र
यस्त्रीकाववकाशः (भेदप्रतियोगी निरूपितः।।) ।।धर्मोऽपि सुनिरूपः भेदः कुत्र वर्तते इति प्रश्ने कुत्रचिदित्युत्त
रस्य सुवचत्वात् भावेऽपि हि तथैव वाच्यं यदि क्वचिद्वर्तत इति ज्ञातैव वायं प्रश्नः अतः कथं तदेवोत्तरं स्या
दिति उत्तरानुपपत्तिरुद्भाव्येत तर्हि प्रश्न एवानुपपन्नः प्रयोजनाभावात् अधिकरणतावच्छेदकनियम राम
स्याभावे सम्प्रदर्शनात् संभवितन्निर्बंधो निर्निबंधन एव यत्र प्रतीयते तत्रेत्युक्तावपि न विरोधः ईदृशे ४९

रित्वन्तयोरप्यन्यतरस्याभावाविरोधित्वात् नहि दंडो घटजननयोग्योपि सर्वदा घटं जनयतीति किं चैवमसंसर्गाभाव
स्यानित्यत्वया घटसंनिधानदशायामपि घटात्यंताभावस्यात्रसत्वेन तद्दशायां घटाभावानधिकरणत्वासंभवात्
तत्प्रतीतेर्भ्रम घटाभावानधिकरणत्वं घटोपाधिकं यथा स्फटिके रक्तिमा जपोपाधिक इति कल्प्यते अथवा
रूमागतकाष्ठे लवणसंबंधात् लवणत्ववत् घटाभावानधिकरणे घटसंबंधात् भूतले साक्षादेव घटाभाव
नधिकरणत्वं संभवतीति नाद्यः एवमपि घटाभावस्य घटदशायां तत्र सत्वेन तद्दशायां घटाभावप्रतीतिप्र
संगात् यदि स्फटिकशुक्लतायाः स्वोपाधिसंसर्गादप्रतीतिः कल्प्यते तथापि घटदशायां घटाभावाधिक
त्प ९६ रणत्वप्रतीतिर्भ्रमो न स्यात् तस्मादभावस्यो...ति विनाशांगीकारेण वा अभावसंबंधस्य कादाचित्क
त्वांगीकारेण वा घटदशायां घटाभावानधिकरणत्वप्रतीतेर्निर्वाहः कार्यः न तूपाधिससंसर्गेण अ
त एव न द्वितीयः घटसंसर्गात् घटाभावानधिकरणत्वे सत्यपि घटाभावस्यापि विद्यमानत्वया घटद
शायां घटाभावप्रतीतिप्रसंगादेव किं च घटाभावे विद्यमाने तदनधिकरणत्वं ब्राह्मणपितुः संवाद
दारुत्वविगमे वह्निलवणत्वसंपादने घटेन घटाभावविनाशांगीकारे अभावनाशः संबंधनाशो
वा किं चैवं सति तत्तद्दोषात् सत्वानधिकरणे वह्निसंबंधाद् दारुत्ववदत्र नास्तीत्यत्र हेतुत्वमपि वन्हे रपि दा

भेदयोरेकज्ञानविषयत्वयाज्ञानयोः परस्परकार्यकारणभावासिद्धेः नच दूरस्थवनस्पत्योर्द्वित्वज्ञानप्रसंगः दूरस्थत्वादे
वभेदज्ञानाभाववत् द्वित्वज्ञानाभावस्याप्युपपत्तेः यच्च परस्पराभावस्यापि भेदरूपत्वादिति तन्न घटप्रतियोगिकभेदवा
न् पटः पटप्रतियोगिकभेदवान् घट इति हि तस्यार्थः तत्र भेदज्ञानस्य भेदज्ञानाधीनत्वाभावात् यदुक्तं द्वितीयभेदभेदत्व
ज्ञानं विना तद्विशिष्टज्ञानानुपपत्तिरिति तत्र किं भेदभेदत्वज्ञानयोर्भेदविशिष्टज्ञानहेतुत्वमभिप्रेतमुत तयोर्भे
दविशिष्टज्ञानविषयत्वं नाद्यः असिद्धेः द्वितीयस्त्विष्ट एव तत्र दोषाभावात् अत एव तृतीयोऽप्युपपन्नः यश्च भेदज्ञान
स्य तर्करूपभेदज्ञानाधीनत्वात् अन्योन्याश्रय उक्तः सोऽपि तर्कस्याभावग्रहहेतुत्वाभावादेव निरस्तः तत्तानिश्चयार्थं त
र्कापेक्षायां घटज्ञानादावपि तर्कसापेक्षत्वप्रसंगः किंचानवधारणात्मकज्ञानस्य प्रागुत्पत्तौ यश्च तर्काव
तारे सत्यवधारणात्मकज्ञानस्योत्पत्तौ को विरोधः यच्च तस्य एतस्मात् भेदसंशये व्यतिरेकनिश्चये च सत्येत
स्य तस्मात्तु भेदनिश्चयो नेति सार्वजनीनं अनन्तत्वे सैतस्मात् भेदनिश्चयः एतस्य तस्माद्भेदनिश्चये हेतुर्वाच्यः तथा च
भेदनिश्चये २० न्योन्याश्रय इति तन्न तत्र संशयस्य प्रतिबंधकत्वात् व्यतिरेकनिश्चयोऽपि तत्र प्रतिबंधकः अयं तस्माद्भिन्नो ने
ति ज्ञाने सति स एतस्माद्भिन्नो नेति प्रतीतौ संशयांसैव ग्राह्यव्यतिरेकनिश्चयत्वात्तत्त्वे सैतस्माद्भेदग्रहं प्रति राम
बध्नाति स संबंधिकपदार्थेषु सर्वत्रायमेव निर्वाहः अत एव देवदत्तस्य पुत्रो यज्ञदत्त इति ज्ञाने सति देवदत्तोऽपत्र ५०

वे॰वि॰
५०
51

णयत्रप्रतीयते तत्रेत्युक्तेः यत्र भ्रमी यते तत्रेत्युक्तावपि न विरोधः ईश्वरस्य यत्र तदभावप्रत्ययो नास्ति तत्र तदिति विवक्षितत्वात् मा
स्तु वा प्रधिकरणनिरूपणेन हानिः किमधिकरणमिति पृष्टे तत्रोत्तरं वक्तव्यमिति चेन्न किमयं लोके कामांसुखेन वस्तुमभाग
त्यपो गिरेशात् भिन्नदेशः क इति प्रश्नः तदा सुदर्शनाधिष्ठितदेश इत्युत्तरं यद्विच वा ध्यादन्यः सको देशो व्याधिदुर्भिक्षतस्करैरिति
प्रश्नः यत्राष्टमन्त्ररससिद्धो महाभागो महीयत इति उत्तरं नहि विशेषानाम्निलेशेऽपर्यप्रश्नो लोके कानामस्ति यदि वादि प्र
श्नः तदा घटः कुत्रास्ति कियत्परिमाणो वा रज्जुः कियत्पलपरिमिता इति प्रश्नस्योत्तरादानेपि घटसिद्धिवदिहाप्युत्तरादानेपि
भेदसिद्धेर्वैकल्पात् यच्चोक्तं घटेपि घटभेदज्ञानं भ्रमेवस्यादिति तन्न तत्र तत्संबंधस्य बाधितत्वात् न च स्वरूपस्यैव संबंध
त्वात् सर्वेषां स्वरूपाविशेषात् इदं स्वरूपं संबंध इदं स्वरूपं नेति नियामकाभाव इति वाच्यं संबंधोंतरंगी कारेपि तत्रायं
संबंधो नात्रेति नियामकाभावात् नायं स्वरूपसंबंधपक्ष एव दोषः इदं घटस्वरूपमिदं पटस्वरूपमिदं ब्रह्मस्वरूप
मित्यत्रापि नियामकाभावात् तत्स्वरूपाणामप्यसिद्धिप्रसंगात् प्रतीतिश्च सर्वत्र समाना यच्चोक्तं भेदधर्मित्वस्यानिरू
पण इदमस्माद्भिन्नमिदं नेति व्यवस्थाया आकस्मिकत्वप्रसंग इति तन्न निरूपणं पदिज्ञानं सिद्धमेव तत्रत्य पदवच्छेद
कोक्तिस्तदात्यंताभावस्य घटादेरप्यसिद्धिप्रसंगः तत्राप्यवच्छेदकानुक्तेः अत एव तत्ते या मयापि [?] मित्तिचे
त्तर्हि सत्यस्य वस्तुनोनुग त धर्मनियाम्यत्वं कुत्र दृष्टमायुष्मता प्रतीतिरपि सुनिरूपणीया परस्परं भिन्नो
इदमिदं न भवति प्रयमस्माद्भिन्न इत्यादीनां तत्प्रतीतित्वात् तत्रय दुक्तमापेक्षिकत्वं सा न भेदज्ञानाधीनमिति तन्न द्वित्व

वे०वि०
५२
52

घ्यभावोघटस्यस्वरूपमित्यादावित्यनानुपपत्तः यदुक्तंपटात्मकपटाभेदविरोधित्वाभावात्तद्घटस्यघटःपटभेदोनभव
तीतितत्रभेदस्याभेदविरोधित्वंकुत्रदृष्टमायुष्मतायेनैवंब्रवीषिविरोधस्यभवद्भिरेवांगीकारात्भेदइत्यत्रतुतोवि
रोधप्रतीतिरन्यविरोधोवाच्यइतिचेत्तर्हियथाप्रतीतिविरोधोंगीकार्यः यस्ययस्मादभेदःतस्यतस्माद्भेदोविरुद्धइत्यतो
घटस्वरूपंपटस्यपटाभेदःघटस्तुपटरूपोपिघटाद्भेदःअथापिघटस्यैवभेदःननुघटस्यघटोघटस्यपटाविरोधित्वेनदोषः
ननुयस्ययस्मादभेदस्तस्यतस्मात्भेदोविरुद्धइत्युक्तेरसंभवएवयस्ययस्मादभेदस्तस्यतस्मात्भेदस्याप्रसिद्धेर्विरोधे
ऽप्यानिरूपणादितिचेन्नतस्यतस्मादभेदेतस्माद्भेदस्यतत्प्रतियोगिकत्वाभावस्यैवविरोधरूपतयाविवक्षितत्वा
न्नतः पटात्भेदरूपेघटेपटप्रतियोगिकत्वाभावलक्षणविरोधोस्त्येवेतिनदोषःननुकथंपटप्रतियोगिकत्वाभावः
पटात्भेदइतिप्रतियोगित्वस्यैवाभिधानादितिचेत्नास्यतस्मात्भेदइत्यत्रयः षष्ठ्यर्थःसप्रतियोगित्वेनविव
क्षितत्वात्नचसप्रतियोगिभेदस्यनिष्प्रतियोगिस्वरूपत्वानुपपत्तिःसप्रतियोगियुत्रस्यनिष्प्रतियोगित्वेदत्त।
त्वानुपपत्तिप्रसंगात्नचधर्मधर्मिभावानुपपत्तिर्दोषःअनंतजलपरिच्छिन्नव्यावर्तत्वद्भेदत्वपत्रेवोपपत्तेःप
त्रस्वमतेोपपादनेनतत्परमतस्यैवसाधकंतथाहि अधिष्ठानसत्तैवाभेदइतियदुक्तंतेनघटत्वस्यघटात्भि
न्नतयातत्तादात्म्यरूपत्वेनसंभवतीत्येतत्दूषणमुक्तंप्रभेदात्तेताभावस्यैवघटपटयोभयनिरूपितभेदत्वा।

राम
५२

द्वापितेति ज्ञानं भूतले घटात्यंताभावप्रतियोगी घटे भूतलवृत्तित्वाभावव्यतिरेके तन्निष्ठप्रतिबध्य इति तत्राप्यन्योन्या
श्रयादत्यंताभावस्यापि साक्षित्वे घटत्वापत्तिः न चेष्टापत्तिः प्रत्यक्षप्रमाणविलोपापत्तेः भिन्न इत्यत्र मतुवर्थसंबंधप्रतीतावपि न
तस्य भेदज्ञानसाध्य ता अन्वयव्यतिरेकासिद्धेः यद्यन्वयव्यतिरेकौ स्यातां तत्कारणत्वं तथापि स्वयमेव साक्षिणा भेदज्ञानस्यकारणत्वं
युगपदेव भेदसंबंधयोर्भानांगीकारे जन्यज्ञानेनैव तत्त्वयाभानमंगीक्रियतां यथा च घटभिन्नः पट इत्यत्रानवस्थोक्ता सापि ना
स्यव विरुद्धधर्मज्ञानस्य भेदज्ञानसाध्यत्वे स्थूलोहं चंद्रः प्रादेशपरिमाण इत्यादिज्ञानानामनुदयप्रसंगात् यस्य भे
दज्ञानस्य विरुद्धधर्मज्ञानहेतुत्वे हेत्वन्यासः विरुद्धयोरेकत्रज्ञानासंभवादिति सच्चात्यंतासंगतः घटः पटाद्भिन्न इत्य
त्र घटपटयोरेव विशेषणविशेष्यभावज्ञानात् विरुद्धयोरेकत्र यात्राप्यमानयोर्ज्ञानासंभवविवक्षायामप्यसंगतिरे
व घटपटयोरेकत्रयाज्ञानासिद्धेः भेदे भेदव्यवहारस्य च स्वरूपमेव विषयः न च स्वेन संबंधासंभवः तथा सति घटस्व
रूपमित्यादिव्यवहारासंभवात् आश्रयाश्रयीभावो भिन्न इत्यत्र न विषयः किंतु स्वरूपसंबंधः स्वाभेदेपीति न विरोधः
भेदांतरांगीकारे वा किं बाधकं यावत्प्रतीति वस्त्वंगीकारे बाधकाभावात् घटे पटादीनेकप्रतियोगिकानंतभेदवत्
एकप्रतियोगिकानेकभेदसत्वेपि विरोधाभावाच्च प्रामाणिकस्यार्थस्य मिथ्यात्वकल्पनादपि हि तदनुसार्यर्थांतर
कल्पनमेव युक्तं अन्यथा पीनत्वेन रात्रिभोजनं न कल्प्येत तस्मादन्योन्याभावो भेद इत्यत्र न काचिदनुपपत्तिः केव
लाएं वा भेदः यत्र भेदप्रतीतिरबाधिता तत्संबंधि किंचित् केवलाद्वि एं स्वरूपमेव वा भेदः अभेदेपि विशेषणविशे

शो भिन्नाविति भ्रमः इति चेन्न तादृशाभ्यनुवृत्तनस्मैवाभेद इति ज्ञानवतां घटपटयोर्भेदज्ञानदर्शना

त् घटत्वमेव घटकलशाभेद इति ज्ञानवतां तु घटत्वज्ञाने सति घटकलशाभेदज्ञानं न भवत्येव किं

वे०वि० च दूरस्थवनस्पत्योरभेदव्यवहारस्य को विषयः आत्मसत्तैवेति चेन्न तयोरभेदज्ञानं प्रमा सा च दूरत्वदो

५२ षजन्या समीपगतस्य भेदज्ञानं भ्रमः स च दोषनिवृत्तौ जायत इति परिहासः दूरस्थवनस्पत्योरभेदव्यव

हारस्य मिथ्याभूतवनस्पतिस्वरूपमेवाभेदो विषय इति चेन्न सर्वत्र स एवाभेदोस्तु अतो भेदस्य श्रुतिरूपत्वा

53 द्भेदानुमानमप्रयोजकं॥ ॥नापि श्रुतिः तथा हि इदं ब्रह्मेत्यादिवाक्यं न तत्र प्रमाणं इदं सर्वं यदयमात्मे

त्यस्य बाधार्थसामानाधिकरण्येनरूपत्वे इमे देवा इति निर्दिष्टजीवबाधप्रसंगात् अभेदार्थत्वे भूता

नीति निर्दिष्टचित्तोप्यभेदप्रसंगात् तस्माच्चिदचिद्वाचकपदानां तत्प्रकारकपरमात्मपर्यन्तत्वेनैव प

रमात्मवाचिपदसामानाधिकरण्यं सर्वशब्दानां भगवत्पर्यंतत्वं ति विधूतराणां विदुषां सराष्ट्रनाभ त्य५

वत्सराष्ट्रमभवत् स इदं भविष्यतीत्यादिश्रुतिरीत्यनुरोधात् स्वस्वामिभावसंबंधादिभिरुप

चारतः सामानाधिकरण्येन निर्वाहः प्रतीयते स्वरूपाभेदप्रतीतिस्तु मानमीमांसापथभ्रष्टानामुन्मत्ता राम

नामेव भवति एतेन तेजोमयो मृतमयः पुरुष इति व्याख्यातं स एव मायापरिमोहितात्मेत्यत्र ५२

स्मिंश्चान्यो मायया सन्निरुद्धः प्रधानक्षेत्रज्ञपतिर्गुणेशः द्वात्मानावीशनीति देव एकः विद्याविद्ये ईश

गीकारेणघटत्वात्यंताभावस्यघटान्योन्याभावत्वसंभवःसमर्थितःभेदोविभागवदुभयनिष्ठइतियदुक्तंमस्तकत्त
तत्सर्वेभेदएकएववास्तुकिन्तुस्थित्वंभेदस्येवोपपादनात्किंचघटत्वात्यंताभावएवघटान्योन्याभाव
इतिव्यावहारिकमर्यादामनंगीकृत्यदुरध्यागमनंबुद्धिविध्वंसादेवएवंचभेदोप्यभेदमेवसाधयती
त्यसंगतंयच्चाधिष्टानमेवघटादेःपारमार्थिकंस्वरूपमित्युक्तंतन्नकिमत्रषष्ठीमुख्याऽन्यामुख्यामु नारणत्वं
ख्यात्वेघटत्वादिकमपिस्वस्वरूपंस्यादितितदभावःकुतोभेदोनस्यात्तदपरमार्थइतिचेत्तत्परमार्थस्वरू
पप्रतियोगिकएवभेदोस्तुकिंतवच्छियतेयदद्वयसामानाधिकरण्यपार्थाभेदस्येवनन्वर्थप्रतियोगि
त्वमनुभूयतइतियदुक्तंतन्नतथासतिनिषेधाधिकरणप्रतीतिप्रसंगात्घटःपटोनेत्यत्रघटःपटइ
त्यंशस्यघटपटाभेदोपस्थापनपरत्वेनघटइत्यंशस्यनिषेधाधिकरणानुपस्थापकत्वात्किंच
इहघटोनेत्यत्रापिइहघटइतिघटभूतलसंसर्गप्रतिपादयतन्निषेधःक्रियतइतिस्यात्तथाचवाये
स्त्यंनास्तीत्यारोप्यप्रसिद्धसंसर्गनिषेधःस्यात्तन्निरधिकरणनिषेधमप्यनुवन्नसदात्मस्वरूपमेवाभे
दइत्यप्यसंगतंघटःसन्पटःसन्इत्यभेदज्ञानाविरोधिनोघटपटयोर्भिन्नावितिज्ञानस्यतदभाव
गोचरत्वानुपपत्तेःनन्वियमनुवत्तसत्तैवाभेदइतिलौकिकानांज्ञानाभावादभेदाभावप्रतीतिरूपप
घतेयथावन्मतेघटकलशयोर्घटत्वमभेदइतिज्ञानाभावात्घटत्वरूपाभेदज्ञानेपिघटकल

उक्ताकारैः समानरूपमेवात्ममात्रं वदपतीत्यर्थः प्रबोधानंतरं किं देवत्वादिभेदप्रपंचोत्र निवर्तते येन स
वे॰वि॰ ५३ प्रबोधः सप्रयोजनः स्यादित्यत्राह प्रपंचोप शांतिर्देवत्वादिभेदप्रपंचोपशमो निविद्यते न तदा तत्र निवर्तते न
च भेदप्रपंचस्तत्र विद्यते किंतु देवत्वादिद्वैतमात्मनि मायामात्रमेवारोपविषयमात्रमेवास्मद्वैतस्य ज्ञा
नानंदात्मकत्वेनैकरूपत्वात्तस्य पारमार्थ्यादतः प्रपंचो न निवर्तत इत्यर्थः कथं तर्हि प्रबोधः सप्रयोजन इ
त्यत्राह विकल्प इति विकल्पः विपरीतः कल्पो भ्रमः यदि केनचित्कल्पितः उत्पादितः सन् निवर्तेत विनश्ये
तोत्र कल्पितो देवत्वादिभेदभ्रमो निवर्तते इति भावः विकल्पो वदातीति आप्तिप्रदर्शनपरं यथा पुनर्वंधस्त
154 शुक्तिरजतादिभ्रमस्य क्वाचित्कत्वात् एतदपेक्षया एवेयं प्रसिद्धिरित्याह उपदेशादिति उपदेशादात्मस्व
रूपे ज्ञाते द्वैतं न विद्यत इत्ययं वादः भ्रमनिवृत्तिनिवंधन इति भावः पूर्वत्र वहिःप्रज्ञो विभुर्विश्वोह्यंतःप्र
ज्ञस्तु तैजसः घनप्रज्ञस्तथा प्राज्ञ एक एव त्रिधा स्मृत इति विश्वतैजसप्राज्ञतुरीयाणां पादत्वं की
र्तितं पूर्वोक्तभेदत्रयं कामावस्थात्रये विश्वतैजसप्राज्ञनामकत्वमभिधाय उत्तरत्र सर्वं जनयति प्राणश्चेतोंशा
न्पुरुषः पृथगिति पादत्रयत्वेन कीर्तितान् जीवान्द्वैतेन कीर्तनाद्वैतपरैवेयमुपनिषत् पृथक् पृथक्
मूल इत्यर्थः प्रकरणादवस्थात्रयवतः प्रतियोगितया लाभः न च पृथक् जनयतीत्येव पृष्ठेन एण प्रस राम
क्रियाविशेषणं प्रयोजनाभावात् किमयं जीवाद्भिन्न उताभिन्न इति जिज्ञासयामत्रयेदि शुद्धेनेत्यादि ५४

तेयस्तुसोमइत्यादिभिर्जीवस्यमायावशपतायाः परमात्मनस्तद्भावस्यचावगमात्सएवेतिपदितश्च
वेनप्रकृतोजीवः परामृश्यतेस्वप्नेजीवइत्यत्रजीवशब्दः सइत्यनेनसंबध्यतेअनेनतस्यैवपाशव
धप्रकारउच्यतेस्वमाययेतिस्वगोचरमाययेत्यर्थः नतुस्वाधीनमाययेत्यर्थः जीवलोकःस्वाप्नमि
त्रादिलोकः तमोभिभूतइतितमसाभिभवेनज्ञानसंकोचात्परमात्मनिलीनोभवतीत्यर्थः जन्मांत
रेतिजन्मांतरारंभककर्मयोगवशात्स्वपितिस्मीयत्तेसकलः प्रबुद्धः अनेनस्वपितीतिनिर्दिष्ट
मरणप्रतिसंबंधिभूतजीवनंलक्ष्यतेपुरत्रयंजाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयंतत्तद्द्रष्टायांजीवा।
श्रयभूतप्र देहविशेषोवाशरीरमास्थायकरोतिसर्वमित्यनेनप्रसक्तेस्वातंत्र्यंवारयितुमाह
ततः सुजातमितिसर्वाधारेआनंदमयेसर्वस्ते यस्मिन्पुरत्रयोपलक्षितोजीवोलयंयातितत्तवएव।
स्पभोगोपकरणभोगस्थानरूपेणांतरबांतरवैजात्येनचविचित्रसकलमपिवस्तुजातंसुजातंसम्भोगव।
न्निष्पन्नंएतस्मात्तत्त्वइत्यादिनानिर्दिष्टात्परमात्मनः एतत्त्वेजगत्कारणत्वंविशिष्टोपादानत्वात्मकमि
त्तितत्त्वमसीतिवदुपसंहरतितत्त्वमेवत्वमेवतदितिएवमुपास्यमुपासकंचोक्त्वाअहंग्रहणोपासनमुप
दिशतिजाग्रदित्यादिअद्वयंअद्वितीयमितिसदृशद्वितीयनिषेधः अनादिमाययेत्यनादिसिद्धइदन्त
रप्रकृतिसंबंधाधीनदेहत्वाभिमानेनतत्तद्विवेकशून्योदेवोहंमनुष्योहमितिभ्रांतोयदातद्विवेक।
वान्भवतितदाजन्मादिविकाराणांसोपाधिकत्वपरिज्ञानेनस्वतःतच्छून्यत्वादेवादिभेदमयरूपन

वहरन्नास्ते मायय्यैवेति ग्रवनारथ्यं तदेवं च प्रकृतिं स्वामवष्टभ्य संभवाम्यात्ममायये तु पवं हितं मेदे च प्रसक्तं तावत्प्रमाणान
चकरणासंभवः मनस एव करणत्वात् यदुक्तं प्रमाणसहकारित्वान्मनो न प्रमाणमिति तन्न वामदक्षिणाद्यो व्यभिचारात् स्ववि
वे०वि० ५४ षयनिष्ठाभावप्रसक्तस्वविषयाभावप्रत्यक्षहेतौ परामर्शे व्यभिचारात् उपदेशसहकृतप्रत्यक्षजन्यावधारणज्ञानस्य च
द्रालोकादिसंशयनिवर्तकत्वस्वीकारात् तत्र प्रमाणद्वये व्यभिचाराच्च अप्रयोजकत्वाच्चेदेवदत्तो हि कंचित्कार्ययस्तद
त्तस्य सहकारी कंचित्कार्यनिरपेक्षकर्ता च दृश्यते तद्वदिहापि संभवात् तन्न च संन्निकृष्टार्थविषयशाब्दबोधादौ चक्षुरा
55 देरपि सहकारित्वप्रसंगः चाक्षुषत्वादिसंकरापत्तिश्चेति वाच्यं व्यभिचारे शाब्दबोधे चक्षुरादेरहेतुत्वात् न च ज्ञान १।६
मात्रे मानसत्वप्रसंगः मनोविषयसंन्निकर्षस्यापि मानसज्ञाने हेतुत्वात् न च मनसः करणत्वे शाब्दप्रमाणपरिशेषा
पत्तिः चक्षुरादेरालोकादिवत्सहकारित्वमात्रोपपत्तेः करणत्वे मानाभावादिति वाच्यं संन्निकर्षाभावेनाव्यापारत्वा
यामनसश्चाक्षुषादिज्ञाने करणत्वासंभवात् केन कं जिघ्रेत् केन कं पश्येदित्यादिश्रुत्या चक्षुरादीनां करणत्वसा
धकत्वाच्च न च निरवयवात्मनि ग्रव्याप्यवृत्तिसंयोगासंभवः आत्मनि व्याप्यवृत्तित्वेपि दोषाभावात् ग्रव्याप्यवृत्ति
त्वनियमस्य च सावयवमनोवृत्तित्वेनाप्युपपत्तेः यत्तु प्रत्यक्षयोग्यस्यानुपलब्धिः सात्र नास्तीति तन्न आत्मत्वेनैव
योग्यत्वात् न च परात्मनो ग्रहणप्रसंगः संन्निकर्षाभावात् मनसो वहिरस्वातंत्र्यात् अत एव न परमात्मनो ग्रहणप्रसं राम
गः काचकामलाद्युपहितत्वचक्षुष इव रजस्तमोभ्यामुपहतस्य प्रतिबंधादग्राहकत्वान्मनसानुविर्दिर्यताव ५५

प्राबल्याच्च विश्वादीनां त्रयाणामेकत्वकीर्तनेन तथा तुरीयस्य विश्वादिभिरभेदाकीर्तनेन च भेदः॥ ह्येतद्ब्र
ह्मायमात्मा ब्रह्मेत्यभेदः प्रतिपन्न इति चेन्न यच्चान्यत्त्रिकालातीतं तदप्योंकार एवेत्यादावेवाभेदं...
स्तुत्यर्थत्वावगमात् अन्यथा सर्वं ह्येतद्ब्रह्मायमात्मा ब्रह्मेति सामानाधिकरण्यपदद्वयस्य मिथो वैरूप्यप्रसंगात् ए
कं वा द्वार्थमितरद्भेदार्थमिति एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानामि
ति च सुषुप्तिस्थानस्यापि सूक्ष्माहंकारोपाधिकत्वस्य त्वयाभ्युपगमेन तस्य जगत्कारणत्वासंभवात् पूर्ववार
को सुषुप्तिस्थान एकीभूतः प्रज्ञानघन एवेति श्रुत्यंतरप्रसिद्धस्य ब्रह्मण एव तस्य प्रतिपादनादेकीभूत इत्यत्र प्रतियोगित
पालक्ष्यैव ब्रह्मैवाभिधीयते ननु अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव एकस्तथा सर्वभूतान्तरात्मा रूपं रू
पं प्रतिरूपो बभूवेति जीवस्य प्रतिबिंबरूपता प्रतीयते रूपत्वात्॥ सूर्यवाचीन तथा यथा ह्ययं ज्योतिरात्मा विवस्वानपो भि
न्ना बहुधैको निविष्टः उपाधिना क्रियते भेदरूपः देवः क्षेत्रेष्वेवमजोऽयमात्मा इति च तस्मात् जीवब्रह्मभेदः कथमिति
चेन्न अस्यां श्रुतीनां सर्वव्यापित्वतात्पर्यकत्वात् प्रतिबिंबदृष्टान्तोक्तिः अजीवत्वपरा चित्स्वं धर्मप्रयुक्तदोषाभावख्या।
पनाय निर्लेपत्वपरा बिंबस्थानजलस्यतया प्रतीयमानोऽपि सूर्यो तद्धर्मैर्न लिप्यते तत्र विद्यमानत्वात् तथा तु विद्य
मानोऽप्यविद्यमानकल्प इति विवक्षितं सर्वाणि भूतानीन्द्रियाणि विरजं देवताः कोऽवा अस्यास्ता मूढो मूढ इव बं

शब्दार्थः कश्चिदस्तीति ज्ञानमात्रेण तदन्योन्याभावग्रहः किं त्वतीन्द्रियत्वादिवैधर्म्यग्रहे स एवान्यस्तदा नियमेन वैधर्म्यग्र
हस्यापेक्षितत्वात् अनुमानमेव एतेन घटे मनस्त्वाभावग्रहोऽपि व्याख्यातः तत्राप्यणुत्वेन्द्रियत्वादिवैधर्म्यग्रहनियमात्
न चोक्तसामग्र्याभावग्रहे विलीनघृते गंधाग्रहदशायामपि तैलत्वात्यन्ताभावतैलभेदयोर्ग्रहप्रसंगः अत्यंतसादृश्येन वि
वै॰वि॰ ५५ शेषादर्शनदशायां संशयसामग्र्याः सत्त्वेन संशयस्यैवोत्पत्तेः न चाधिकरणप्रत्यक्षत्वाभावाद्घटाभावप्रत्यक्षत्वानुपपत्तिः
बाधिर्यमज्ञातवतो बधिरस्यैवानुमेयत्वात् तदधिकरणकाभावप्रत्यक्षे तु तदधिकरणप्रत्यक्षस्य हेतुत्वाद्वा यत्तु
56 यत्र यत्सत्त्वमनुपलब्धिविरोधी तत्र दूषणं तन्न यत्र कर्त्तृकप्रमाऽऽपादयितुं शक्यातं प्रतियोग्यपत्वमापादनं च
येन केनचिदेवं चापादकस्यैव व्याप्तिज्ञानमिति तत्तेनापाद्यप्रमाकर्त्तुरभावादनुमितिसंभवः यत्तु घटेऽतीन्द्रियप्रतियो
गिकाभावे प्रतियोग्युपलंभापादनं तत्संभवति तस्य धर्मिणो व्यवधानस्य तत्तापादकत्वादिति तन्नान्यायापादनाभावे
प्रतियोग्युपलंभापादकत्वस्य विवक्षितत्वात् तत्र घटे तदनुपलंभापादकसत्त्वेऽपि नास्ति नवा मनसि घटत्वापाद
नेऽस्ति प्रतियोगित्वव्याप्येतरसकलप्रतियोग्युपलंभकसमवधानस्य लीपानुपलब्धियोग्यानुपलब्धिरिति त
त्रापि न दोषः आत्मत्वेनैव मनोयोग्यत्वात् न चातीन्द्रियप्रतियोगिकाभावे प्रतियोग्युपलंभकाप्रसिद्धिः प्रतियोग्यु
पलंभकपदेन प्रतियोगिवृत्तिधर्मघटितधर्मावच्छिन्नकार्यतानिरूपितकारणताश्रयस्य विवक्षितत्वात् अस्ति हि राम
घटाभावप्रत्यक्षे भावचाक्षुषज्ञानत्वं कार्यतावच्छेदकं तदवच्छिन्नकारणमालोकः जन्यप्रत्यक्षत्वं कार्यतावच्छे ५५

ष्कृतेः केचित्तु जलपरमाणौ पृथिवीत्वाभावग्रहप्रसंगान्नेयं योग्यतेत्याहुः तन्न अधिकरणप्रत्यक्षत्वस्याप्यभावप्रत्यक्षहेतुत्वतया
तत्र तदभावादेव तद्ग्रहोपपत्तेः न चैवमनुद्भूतरूपस्याप्युद्भूतस्पर्शस्य स्पार्शनत्वापत्तेः तप्तवारिस्थवह्न्यादावभास्वररूपा
भावग्रहप्रसंगः प्रतियोगिग्राहकेन्द्रियेणाधिकरणग्रहणस्य कारणत्वात् न चैवं वायौ रूपाभावस्य चाक्षुषत्वप्रसंगः
दृष्टापत्तेः न चैवं चक्षुरन्वयव्यतिरेकानुविधानानुपपत्तिः चक्षुःसन्निकर्षस्य लिंगत्वात् सन्निकर्षे सन्निकृष्टे रूपा
ग्रहणे सत्यवश्यं हि तादृशानुपलब्ध्या रूपाभावानुमानं न च लिंगाग्रहेपि रूपाभावग्रहाद्रूपाभावः प्रत्यक्षमिति वाच्यं एवं
सति यस्य पुरुषस्यान्धकारे आघ्राणिकं वायुज्ञानं तस्य समनुपनीते पुरतः सन्निकृष्टे वायौ रूपाभावग्रहप्रसंगात् यदि
त्वचैवोपनयोपेक्षित इत्युच्येत तदा त्वचा कपाटाद्यवच्छिन्नादिभिः पुरतोऽज्ञाते वायौ रूपाभावाग्रहप्रसंगात् यदि
सन्निकृष्टज्ञानं कारणं तच्च त्वचान्येन वेत्यनियम इत्युच्येत तदा पृष्ठतः सन्निकृष्टत्वभ्रमे पुरतः सन्निकृष्टे वायौ
रूपाभावग्रहप्रसंगः यदि पुरतः सन्निकृष्टत्वज्ञानमपेक्षितमित्युच्येत तदा पृष्ठलग्ने वायौ तिर्यग्वलनेन रू
पाभावग्रहस्यासिद्धिप्रसंगात् यदि मुखाभिमुख्यमेव पुरतः शब्दार्थ इत्युच्येत तदा मुखाभिमुखत्वग्रहे सन्निचक्षुः सु ४
सन्निकृष्टत्वाभावभ्रमदशायां रूपाभावग्रहप्रसंगः यदि चक्षुरभिमुख्यग्रहणमपेक्षितं तत्सममेव न हि लिंगग्रहण ।
मुपयाद्रिति न्त्वेन्द्रियसन्निकृष्टत्वज्ञानं सहकारि प्रत्यक्षमात्रे अभावप्रत्यक्षमात्रे वा तदसिद्धेः नापि रूपाभावप्रत्यक्षे
नीलघटे पीतत्वाभावस्य तेन विनैव ग्रहणात् एतेन पिशाचान्योन्याभावोपि व्याख्यातः तस्मात् उभयसिद्धत्वात् नहि पिशाच

विशिष्टभेदोपलंभसंभवात् नित्यसर्वविषयापरोक्षत्वं चेश्वरस्यैतद्विशिष्टभेदस्योपलम्भेनैव युक्तं ज्ञाने सर्वविषयकत्व।
नित्यत्वभ्रमवत्तत्तद्भेदानुपलंभो नास्तीति तन्न तादृशभ्रमासंभवात् किं च सर्वविषयसाक्षात्कारवत्त्वस्य योगि
वे॰वि॰ ५६ भिः सर्वैरप्यनिर्दुःखत्वादिविशिष्टभेदस्यानुपलंभादीश्वरभेदः सिध्यतीत्युक्तं सोपाधिकस्याभेदो वामिति तन्न ताव
ज्जीवस्याणुत्वेन स्वतः परिच्छिन्नत्वया तदर्थमुपाधिसंसर्गस्याकल्पितत्वात् तच्चोत्क्रान्तिगत्यागतिश्रुतिभिः एषोऽणुरात्मा
चेतसा वेदितव्यः बुद्धेर्गुणेनात्मगुणेन चैव ह्यारागमात्रो ह्यवरोपि दृष्टः वालाग्रशतभागस्य शतधा कल्पितस्य च
५४ भागो जीवः स विज्ञेयः स चा नंत्याय कल्पत इत्यादिश्रुतिभिश्च सूत्रकारैरेव साधितं न च एषोऽणुरात्मेति परमात्म
न एवाणुत्वं दुर्दर्शत्वं प्रतिपाद्यते नञ्चक्षुषा गृह्यत इत्यादिनानंतरपूर्ववाक्ये प्रकृतत्वाद्वेदितव्यत्वलिंगाच्चेति वाच्यं।
यस्मिन् प्राणः पंचधा संविवेशेति यच्छब्दयोगेनैतच्छब्दस्य वक्ष्यमाणपरामर्शित्वात् न च तत्रापि परमात्मैव
प्रतिपाद्यत इति वाच्यं न हि यस्मिन्द्यौः पृथिवी चांतरिक्षमोतं मनः सह प्राणैश्च सर्वैरित्तिवत्सर्वाधारत्वमिह प्र
तिपाद्यते किं तु जीवासाधारणप्राणाधिष्ठितेंद्रियाधारत्वमतो जीवपरत्वमेवास्य युक्तं न च वेदितव्यत्वलिंगविरोधः
नियंतृनियाम्यवैलक्षण्यज्ञानस्यामृतत्वसाधनत्वात्तदविरोधात् कृच बृहच्च तद्दिव्यमचिंत्यरूपमिति परमात्मनो
महत्त्वमुक्त्वा एषोऽणुरात्मेति जीवे तद्वैलक्षण्यप्रतिपादनात् बुद्धेर्गुणेनेत्यत्र च बुद्धेर्गुणेनारायमात्रः स आत्मगुणेन महा राम
निति नार्थः सर्वव्यापित्वान्वयकल्पनाप्रसंगात् तथा हारत्वप्रसंगात् चैवेति समुच्चयार्थनिपातानन्वयाच्च एवं च बुद्धेर्गुणे ५६

दकंतदवछिन्नकारणमिंद्रियंजन्यविशिष्टज्ञानत्वंकार्यतावछेदकंतदवछिन्नकारणंविशेषणज्ञानंजन्यज्ञानत्वावछि
न्नंप्रतिमनःप्रभृतिजन्यत्वावछिन्नंतमेवप्रतिकालादिवायोरूपाभावसाक्षात्कारेतुरूपसाक्षात्कारत्वंकार्यतावछेदकंम
हत्वंकारणमित्यादिपिशाचान्योन्याभावग्रहेपिशाचत्ववत्तिधर्मोजातित्वंतद्घटितकार्यतावछेदकंजातिप्रत्यक्षत्वंतत्कार
णंयोग्यव्यक्तिवृत्तित्वमित्यादियद्वायापत्रप्रतियोगिव्यतिरेकप्रयुक्तानुपलब्धिःसातत्राभावग्राहिकाप्रसिद्धैवतत्घटेम
नस्त्वाभावग्रहेवायौरूपाभावग्रहेस्तंभेपिशाचान्योन्याभावग्रहेचनतुलजपरमाणौपृथिवीत्वाभावेवायावनुद्भूतरूपाभावे
आत्मनिधर्माभावेमनसिघटत्वाभावेवास्तितत्राधिकरणमहत्वाभावप्रतियोग्युद्भूतत्वाभाववादीनांप्रयोजकत्वात्पृथु
त्वंसहकार्यभावात्प्रतिबंधकाच्चानुपलंभसंभवात्नयोग्यानुपलब्धिरितितन्नाचार्योपदेशोनात्मस्वरूपप्रसदे
ईश्वरस्वरूपाभेदप्रत्यक्षत्वात्सहकारितदभावेपिअहंसोहमित्यनुपलंभात्तत्त्वात्मीश्वरत्वावछिन्नाभेदप्रत्यक्षेतदवछि
न्नाभेदप्रत्यक्षस्यकदाप्यसिद्धेःतत्सहकारित्वकल्पनात्श्रवणाद्यनंतरभावितत्पदलक्ष्याभेदप्रत्यक्षणएवाचार्योपदेशश्रव
णादीनांहेतुत्वस्वीकारात्अपिचयदिसर्वज्ञाभेदःस्यात्तदातत्प्रत्यक्षस्यावश्यकत्वेआचार्योपदेशादीनांसहकारि
त्वस्यैवानुपपत्तिःतत्तत्ज्ञानवदभेदस्यतेनतेनोपलभ्यमानत्वात्एतेनप्रतिबंधकादृष्टमित्यपिनिरस्तंयत्नीश्व
रत्वविकल्पेनानुपलब्धिदूषणंतत्रासुत्वावद्व्यणुककर्तृत्वंनचद्व्यणुकस्यातींद्रियत्वात्सुकृत्यभेदवत्तदभेदा
५२ नुलंभसंभवइतिवाच्यंअतींद्रियत्वेपिधर्मज्ञानामिधर्मिद्व्यणुकंजानामीतिवत्कर्तरैंद्रियकत्वेनतद्दि

वे॰वि॰
५१
58

संक्षयप्रसक्तवदेवश्रुतिप्रसक्तयोरन्यतराप्रामाण्यासिद्धेः मानांतरसंवादो हि प्रामाण्यमेव साधयति न तु तीयः मानां
तरसंवादस्य प्रामाण्याद्भावसहेतुत्वेन तस्य तात्पर्याभावहेतुत्वासिद्धेः मानांतरसिद्धार्थबोधने प्रयोजनाभावात् न त
त्प्रामाण्यमिति चेन्न प्रयोजनाभावे पि प्रसक्तादेः प्रामाण्यदर्शनात् न तु सर्वज्ञं भगवंतमारभ्याद्य यावत् स्वरव
र्णक्रमाभंगेन नियमाध्ययनाध्यापनधारणादिभिर्महता प्रयत्नेन प्रवर्त्यमानो वेदो लेशतोनर्थीभवि
तुमर्हतीति चेत् न जयादिप्रयोजनस्यापि श्रुतत्वात् न च तत्प्रयोजनं स्वाभाविकमर्थपरत्वे विहंतीति किं
च परमपुरुषार्थस्योपासनाप्रीतभगवदधीनत्वात् भेदबुद्ध्यभावे तदुपासनासंभवात् भेदबुद्धिः परमपु
रुषार्थोपयोगिनी भेदस्य प्रत्यक्षसिद्धत्वात्तस्यैवायं पुरुषार्थः स्यादिति चेन्न परमपुरुषार्थोपयोगिभेद
प्रतिपादनाविशेषे तस्यैवेति कुतो निर्णीयते अपि च भेदस्य प्रत्यक्षसिद्धत्वे पि कस्यचित् भेदप्रत्यक्षस्य बाधि
तत्वदर्शनेन जीवेशभेदप्रत्यक्षेप्यनाश्वासप्रसंगेन तन्निवृत्तये निर्दोषश्रुत्या भेदप्रतिपादनं युक्तमेव किंच
कुदृष्ट्यापादितभेदमिथ्यात्वनिरसनमपि प्रयोजनं घटत एव तदुक्तं आद्यः असत एवेदमग्र आसीदितिवा
दिनिरसनमपि हि दृश्यते किंच भेदवाक्यात् प्रतीत्योः द्वैतवाक्यप्रवृत्तिबाधनार्थं भेदश्रुतिभिस्तत्प्रतिपा
दनमपि किं न स्यात् किंच श्रुतिं विना सर्वनियंतुर्जगदुपादानस्य वस्तुनोनुपस्थितेस्तत्र स्वभेदस्य श्रु राम
त्यैव प्रतीतिः अपि च वैधर्म्यमेव हि भेदः तत्तच्च जीवे किंचित्ज्ञत्वदुःखाकरत्वादिरूपवैधर्म्यस्य प्रत्यक्ष ५१
भेदशास्त्रप्रवृत्तिवारणार्थमद्वितीयत्वश्रवणनियम इति त्वदुक्तरीत्यै वाद्वैतवाक्यापातप्रतीत्या श्रुति
या१

नेत्यनेन स्वरूपधर्मभूतज्ञानयोः सूक्ष्मत्वं प्रतिपाद्यते वा त्वागे स्वनंतरश्लोके स्वरूपतो गुणत्वं प्रतिपाद्यते न चात्मनो गु
णत्वेऽङ्गादंध्यप्रसंगः धर्मभूतज्ञानेनैव जगतः प्रकाशात् न च सर्वशरीरिणां सुखाद्यनुपपत्तिः तस्यैव धर्मभूतज्ञानस्य तत्तद्देह
देशमपि सुखादिविषयिणामेवावपत्तेः न च गुणत्वाद्ध्यत्ववृत्त्यसंभवः प्रज्ञा च तस्मात् प्रसृता पुराणी तदा सच्छरति प्र
ज्ञाद्वतेः पादादिवोदकमित्यादिना द्रव्यत्वावगमात् द्रव्यत्वेपि प्रभाया इव सजातीयद्रव्यांतराश्रितत्वेन तद् पृथक् ॥
सिद्धत्वदेशांतरव्याप्त्यादिकमुपपद्यते तदेतत् गुणाद्वा लोकवदिति सूत्रकैः रेरेवोक्तं तथा च शौनकवचनं यथा नेक्रि
यते नोस्य मलप्रक्षालनान्मणेः दोषप्रहाणान्न ज्ञानमात्मनः क्रियते तथ्यमाश्रितः स्वतः परिच्छिन्नत्वात् ननु दर्पो
पुवाधिकत्वनाश्रित्य वासोपाधिकः परिच्छेदः तथापि शरीरमेव परिच्छेदो बाधिः स्यात् दुःखादेस्तत्राभावात्
तदन्यत्वेनिर्दुःखादिभेदप्रत्ययस्य स्वरूपगोचर एव मतत्वात् कारणस्य परिच्छेदो वाधित्वम् तथापि भेदप्रतीतिर्न
तन्निष्ठमानाभावात् नाहमीश्वर इति सोपाधिकसामानाधिकरण्याच्च निरूपमितिचेत् स्थूलोऽहं जानामीति शरी
रोपाधिकसामानाधिकरण्येपि ज्ञातृत्वस्यात्मनिष्ठत्वात् तस्मात् भेदाध्यक्षप्रतीतेः स्वरूपगोचरत्वेन किं
चित्त्वाधकमिति ॥ ॥ श्रुतिरपि जीवभेदे प्रमाणं तत्रापयुक्तं मानांतरप्रसिद्धत्वादित्यादिना तत्र मानांतरसिद्ध
त्वात् भेदस्य न तत्र श्रुतिः प्रमाणमित्यत्र किमिदमप्रामाण्ये किं सापेक्षत्वं किं वा भ्रमजनकत्वं उतता पर्यभावः स्य २
नाद्यः पूर्वद्वयप्रत्ययोः श्रुतिप्रत्यक्षयोः समानविषयत्वामात्रेण परस्परसापेक्षत्वासिद्धेः न द्वितीयः पूर्व

द्वात्त्वज्ञानसंस्पीमननवमेतिष्ठोत्रियंब्रह्मनिष्ठं तन्निष्ठस्य मोक्षोपदेशादिस्यादिप्रयोगदर्शनादंतरशब्दो विनत्वप्रतिकोटिम्

नार्थपरो वाच्यः स च विच्छेदः तत्र त्वं परत्वं चानिरंतरं सांतरमित्यादिप्रयोगात् युक्तं अतो ब्रह्मोपासनान्मोक्षः तद्विच्छेदश्च

वे॰वि॰ ५८ संसार इति वाक्यार्थः नेह नानास्ति किंचनेत्यत्रापि नानाशब्दो विनार्थः विनइत्यनाना ज्ञेन सहेति सर्वेणाविनार्थे

मुत्पादनात् पृथग्विनांतरेणेतिहि रूढः नानाच वर्जनइत्यमरोक्ते अतस्तत्र ब्रह्मणः पृथग्भूतं स्वनिष्ठं वस्तु नास्ती

त्यर्थः अथ येन्यथातो विदुरित्यत्रापि न भेदज्ञाननिंदापरत्वं भूमविद्याया अभेदपरत्वस्याप्यर्थान्तरत्वसमर्थनेननि

रस्तत्वात् अतः स्वनिष्ठत्वेन ज्ञाते पुत्रमेवामुत्र पुण्यचितो लोकः क्षीयत इतिवत् अल्पलोककारणत्वेनोक्तकर्मवत्त्वपत्वा

59 रूपमन्यराजत्वस्यादित्यर्थः अथ योन्यां देवतामुपास्ते इत्यपि स्वातंत्र्यज्ञाननिंदापरं नचैवं लक्षणाप्रसंगः अहमस्मि

तिज्ञानं हि अहं बुद्धेः स्वपर्यवसायित्व एव स्यात [illegible] अतो हि बुद्धेः परमविशेष्यभूतब्रह्मपर्यन्तत्वा

भावात् न जानातीति निंद्यते तस्मात् पृथगात्मानमिति भेदज्ञानस्य मोक्षसाधनत्वोपदेशात् न केनापि वाक्येन तन्निंदा

संभवः अनंतरविरोधात् न भेदः अन्यथ इत्यपि न अहंहोहंहेऽस्मात् हृदस्य नियंतुर्दृष्टः एकत्वेन तादृशस्येश्वरस्य

निषेधात् अन्यथा प्रमाणांतरविरोधात् यथास्मिन् ग्रामे देवदत्त एव पुरुषो नान्य इत्यत्र पुरुषमात्रं न निषिध्यते किंतु ने

वंविधोन्यः पुरुष इति बुद्धिस्थस्वातंत्र्यादिविशिष्टपुरुषांतरं निषिध्यते किंच नान्योस्ति द्रष्टेत्येतावता द्रष्टृंतरनि राम

षेधसिद्धौ अतः शब्देन विशिष्टपरामर्शो विशिष्टस्य निषेधार्थ एव ननु समानद्रष्टृनिषेधेनान्यातोस्ति श्रोतेत्य ५८

त्वेपि कर्मसत्त्वय त्वस्यन्यत्वपाल्यत्वनियाम्यत्वशेषत्वशरीरत्वादिधर्माणां परमात्मनिनियामकत्वादिसर्वविधर्मा
णांच मानांतराप्राप्तत्वात्तेषामेव श्रुत्ते प्रतिपादनात्तन्नकश्चित् दृश्यो पद्रवः किंच कस्याभेदश्रुतेर्थानुवादत्व
याभेदेतात्पर्याभावउत्तेनतावद्वासुपर्णेतिश्रुतेः तत्रभेदप्रतिपादनस्यानन्यार्थत्वात् नापि समानेवृक्षइतिश्रुतेः विशोक
त्वानिमित्तदर्शनविषयताप्रतिपादनार्थत्वात् नापिपृथगात्मानमितिश्रुतेः भेदज्ञानस्यमोक्षोपायताप्रतिपादनार्थत्वात्॥
अन्योंतरआत्मानंदमय इत्यस्य सयएवंविदित्यादिनाभेदज्ञानान्मोक्षप्रतिपादनार्थत्वात् तस्मिंश्चान्योमाययासंनिरु
द्ध इत्यस्यापिपृथगात्मानमितिश्रुत्यनुरोधेनमोक्षापक्षातव्यार्थस्य प्रतिपादनार्थत्वात् एवं सर्वत्र सर्वेश्रीवाधिकत्वेनामि
ध्यानात् भेदेन शास्त्रप्रतिपाद्य इत्यपिनपरिच्छेदार्थमुपाधिकल्पनस्यानिरस्तत्वात्तयत्वप्रयोजनत्वात् भेदेनशास्त्रता
त्पर्यमितितन्नप्रयोजनस्योक्तत्वात् नयतु भेदज्ञानस्यविपरीतफलं श्रूयतइतितन्नासिद्धेः उदरमंतरंकुरुतइतिश्रुतेस्ता
वदेतस्मिन्नात्मनि उदरमपि अंतरं अल्पमपि अंतरं भेदं भेदाभेदमपिय: कुरुते अथतस्यभयं जन्मादिभयंभवतीतिना
र्थः यदाह्येवैष इतिपूर्ववाक्योक्ताभयहेतुप्रतिष्ठाप्रतिकोटिभूतोऽन्तरशब्दार्थो वाच्यः प्रतिष्ठाशब्दस्य चनैकमर्थः ल
क्षणायांसएवदोषः लाभार्थविंदतिधातुस्वारस्यं चाणकस्यचानित्यप्राप्तत्वाज्ञानलक्षणायावाच्यत्वात् सप्तम्यस्वा
रस्यंचब्रह्मणोऽस्य प्रतियोगित्वविवक्षायां तृतीयाप्रसंगः स्वप्रतियोगिकेक्याधारत्वविवक्षायां स्वतस्त्वाघ्रावः प्रतिष्ठा
शब्दोदृढसंबंधवचनः तस्यचोपास्योपासकलक्षणसंबंधविशेषपर्यवसानं युक्तं अतः प्रतितिष्ठतित्वस्यनित्यासि
प्रतिष्ठाशब्दस्याभेदपरत्वाभावात् नांतरशब्दोभेदपरस्तथासतिकरोतेर्ज्ञानपरत्वेनास्वारस्यंतस्माद्यमर्थः २ त्रुटिः

वे०वि०
५८

60

दस्यतच्छ्रवणमननादिकर्तृजीवपरत्वेनैवद्वासुपर्णेत्यत्राप्यभेदाज्जीवैक्यसिद्धिः तस्मादेतत्सद्भूताः किमत्रोविद्यतस्यपेत्वा
यांतन्निषेधतिनान्योतोस्तीतिनात्रकाचनभिदास्ती त्यत्रापितत्सिद्धाभेदेनप्राणवप्रशंसापरत्वान्नजीवेश्वराभेदसिद्धिः
द्वासुपर्णेतिजीवस्यद्वैयर्णेषुत्वाधुणरूपेरोहिकामुष्मिकफलः साधनेनाईश्वरस्यनिग्रहानुग्रहसंकल्पोसयुजोग्र
विनाभूतौसखायौलीलाविकरत्वभोगप्रदत्वाभ्यांपरस्परोपकारकौवृक्षमेकंदेहेनोभयोरेकवृक्षसंबंधला
भात्तउभयोरेकरूपसंबंधलाभाच्चसमानशारदः ततश्चजीवेनेश्वरेणापिशारीरद्वारीविभावः संबंधोलभ्यतेपिप्प
लशारदः पक्वत्वक्वचनोवैषयिकसुखमुपलक्षयतिस्वादुभुज्यमानमासक्तिप्रदंवैराग्यपस्पाजनकमितिमर्थः तत्त्वयं
मंत्रः पैंगिरहस्येअंतःकरणजीवपरतयाव्याख्यातः तयोरन्यः पिप्पलंस्वाद्वत्तीतिसत्त्वंअनश्नन्नन्योभिचाकशीतित्य
नश्ननन्योभिपश्यतीतिज्ञः तावेतौसत्त्वक्षेत्रज्ञाविति अत्रस्वाद्वत्तीत्येतदंतस्यवाक्यस्यसत्त्वपरत्वमनश्नन्नित्या
देः क्षेत्रज्ञपरत्वंचप्रतीयते नचसत्त्वक्षेत्रज्ञशब्दौजीवपरमात्मपरौ अंतःकरणजीवपरतयाप्रसिद्धत्वात् त
देतत्सत्त्वंयेनस्वप्नंपश्यति अथयोयंशारीरः उपद्रष्टासक्षेत्रज्ञइति पैंगिश्रुत्यैवतथाव्याख्यातत्वात् येनेतिक
रणत्वप्रतीतेः सत्त्वमंतःकरणंस्वप्नदृष्टृत्वात् क्षेत्रज्ञोजीवइति॥ उच्यते तेनतावत्जीवपरमात्मपरत्वमस्य
मंत्रस्यापवदितुंशक्यते अनेनमंत्रेणतुल्यार्थतयाप्रत्यभिज्ञायमाने समानेवृक्षे इत्यनंतरमंत्रेजीवपरयोः राम
प्रतिपन्नत्वात् अस्यमंत्रस्यतदेकार्थ्याच्चसमानंवृक्षंपरिषस्वजातेसमानेवृक्षेपुरुषोनिमग्नइत्येकार्थ्यंहि ५९

तेपि कर्मकर्तृत्वस्यनत्त्ववाल्पत्वनियाम्यत्वशेषत्वशरीरत्वादिधर्माणां परमात्मनि नियामकत्वादिसर्वविधर्म्मा
णां चमानांतरप्राप्तत्वात्तेषामेव श्रुतौ प्रतिपादनात्तत्र न कश्चित्तत्कृतो पद्रवः कोवेकस्याभेदश्रुतेर्मर्यानुवादत्त
याभेदतात्पर्याभावउक्तेनतावद्दासुपर्णेतिश्रुतेः तत्रभेदप्रतिपादनस्यानन्यज्ञानार्थत्वात् नापिसमानेवृक्षइतिश्रुतेः विशेषक
तानिमित्तदर्शनविषयताप्रतिपादनार्थत्वात् नापिपृथगात्मानंमितिश्रुतेः भेदज्ञानस्यमोक्षोपायताप्रतिपादनार्थत्वात्॥
अन्योंतरआत्मानंदमय इत्यस्य सयएवंविदित्यादिनाभेदज्ञानान्मोक्षप्रतिपादनार्थत्वात् तस्मिंश्चान्योमाययासंनिरु
द्ध इत्यस्यापिपृथगात्मानमितिश्रुतेस्तनुरोधेनमोक्षापतत्वकार्थस्यप्रतिपादनार्थत्वात् एवं सर्वत्रसर्वदोषोवाधिकत्वेनामि
ष्याचात्भेदोनशास्त्रप्रतिपाद्य इत्यपिनपरिछेदार्थमुपाधिकल्पनस्यनिरस्तत्वात्तस्य प्रयोजनत्वात् भेदेनशास्त्रता
त्पर्यमितितन्नप्रयोजनस्योक्तत्वात्तयत्तुभेदज्ञानस्यविपरीतफलं श्रूयतइतितन्नासिद्धेः उदरमंतरं कुरुत इतिश्रुतेस्ता
वदेतस्मिन्नात्मनि उतअल्पमप्यंतरंअल्पमप्यंतरंभेदंभेदाभेदमपियः कुरुतेऽस्यतस्यभयंजन्मादिभयंभवतीतिता
त्पर्यः यदाह्येवैषइतिपूर्ववाक्येतेन भयहेतुप्रतिष्ठाप्रतिकोटिभूतोऽन्तरशब्दार्थोवाच्यः प्रतिष्ठाशब्दस्यचैनेकमर्थः ल
दोणापांसएवदोषः लाभार्थविंदतिधातस्थारस्यंचाण्कस्यचनित्यप्राप्तत्वपात्तानलक्षणयावाच्यत्वात् सन्नमस्या
रसंचत्रजणेकप्रतियोगित्वविवक्षायांतृतीयाप्रसंगः स्वप्रतियोगिकेक्याधारत्वविवक्षायांसत्यध्याहारः प्रतिष्ठा
शब्दोदृढसंबंधवचनः तस्य चोपास्योपासकलक्षणसंबंधविशेषपर्यवसानं युक्तं ततः प्रतिष्ठितत्वस्यानित्यत्वासि
प्रतिष्ठाशब्दस्याभेदपरत्वाभावात् नांतरशब्दोभेदपरस्तथासति करोतेर्ज्ञानपरत्वेनास्वारस्यंतस्मादयमर्थः २ वुद्धिः

वे॰वि॰
५८

60

दृश्यत्वमवगमनतादिकर्ज्जीवपरत्वेयेनदृष्टृश्रोत्राद्यभेदाज्जीवैक्यसिद्धिःतस्मादेतत्सहृत्त्राःकिमन्योविद्यतइत्येपेता
यांतल्लिंगंच त्विनान्योतोस्तीतिनात्रकांचनभिदास्तीत्यत्रापितत्सिंहाभेदेनप्रणवप्रशंसापरत्वात्तज्जीवेश्वराभेदसिद्धिः
द्वासुपर्णेतितज्जीवस्यद्वैपर्णौपुण्यापुण्यरूपेयेहिकामुष्मिकश्रेयःसाधनेवाईश्वरस्यनिग्रहानुग्रहसंकल्पौसयुजौ
विनाभूतौसखायौलीलावतिकरत्वभोगप्रदत्वाभ्यांपरस्परोपकारकौवर्त्तमित्येकवचनेनउभयोरेकवद्भसंबंधला
भात्तउभयोरेकरूपसंबंधलाभायसमानत्वाद्वःतत्रजीवेनैवईश्वरेणापिशारीरत्वादीनिभावःसंबंधोलभ्यतेपिप्प
लत्वात्वःपक्ववद्वचनोवैषयिकसुखमुपलक्षयतिस्वाद्वत्तिअनुभूयमानमासक्तिप्रदंवैराग्यपस्यजनकमित्यर्थःअनश्नन्यं
मंत्रःपैंगिरहस्येंतःकरणजीवपरतयाव्याख्यातःतयोरन्यःपिप्पलंस्वाद्वत्तीतिसत्वमनश्नन्नन्योभिचाकशीतिज्ञ
नश्नन्नन्योभिपश्यतीतिज्ञःतावेतौसत्वक्षेत्रज्ञावितिअत्रस्वाद्वत्तीत्येतदंतस्यवाक्यस्यसत्वपरत्वमनश्नन्नित्या
देःक्षेत्रज्ञपरत्वंचप्रतीयतेनचसत्वक्षेत्रज्ञशब्दौजीवपरमात्मपरौअंतःकरणजीवपरतयाप्रसिद्धत्वात्त
देतत्सत्वंयेनस्वप्नंपश्यतिअथयोयंशारीरःउपद्रष्टासक्षेत्रज्ञइतिपैंगिरहस्येवतथाव्याख्यानत्वात्येनेतिक
रणत्वप्रतीतेःसत्वमंतःकरणंस्वप्नद्रष्टृत्वात्क्षेत्रज्ञोजीवइति॥ ॥ अनेनतावज्जीवपरमात्मपरत्वमस्य
मंत्रस्यापवदितुंशक्यतेअनेनमंत्रेणतुल्यार्थतयाप्रत्यभिज्ञायमानेसमानेवृक्षेइत्यनंतरमंत्रेजीवपरयोः राम
प्रतिपन्नत्वात्तस्यमंत्रस्यतदैकार्थ्याच्चसमानंवृक्षंपरिषस्वजातेसमानेवृक्षेपुरुषोनिमग्नइत्येकार्थ्यंहि ५८

नुपपन्नंब्रह्मणिश्रवणमननादेरसंभवात्जीवाभेदपरत्वे तु श्रवणादेर्जीवगतत्वाद्युक्तमेवऽदृष्टइति पूर्ववाक्येपि
जीवाभेदपरत्वादेवश्रवणादिकीर्तनमितिचेन्नऽमतोद्रष्टानास्तीत्यनेनास्यद्रष्टृत्वंप्रतीयते तदनिष्टंचनत्वऽमतःश्रोतास्त्व
रसंचद्रष्टृत्वमेवऽस्तियदास्याचारस्यच स्वरूपनिषेधेनत्वस्यस्वारस्यात्अभेदपरत्वेभवतीति किंभवितव्यं यःआत्मनितिष्ठन्
एषतआत्मांतर्याम्यमृत इतिचपूर्वंभेदप्रतिपादनेनस्वप्रकरणविरोधात् एषतआत्मांतर्याम्यमृत इतिवाक्यशेषविरोधात्
प्रतिपर्यायमेषतआत्मांतर्याम्यमृतइत्यस्मादेरणव्यतिरेककीर्तनेनकृत्स्नस्यापिप्रकरणस्यभेदतात्पर्यावगमेनमहा स५
स६ वाक्यतात्पर्यविरोधाच्चनेतद्वाक्यमभेदपरं नचैषतआत्मातेत्वात्मशारीरःस्वरूपपरः षष्ठ्याउपचरितार्थत्वप्रसंगात्
आत्मशरीरस्यापिशरीरप्रतिसंबंधित्वात् आत्मन्येवस्वारस्याच्च श्रवणाद्युपपत्तिःकथमितिचेत्पूर्वंहिप्रतिपर्यायंतदिदं
तत्त्वमुपपादितंतदपेक्षितंज्ञानंतंद्रष्टेत्यादिनाप्रतिपाद्यते पूर्वंयमात्मानवेदेतिब्रह्मवेदननिषेधात् ब्रह्मज्ञा
नात्मोदक्षस्यानुपपत्तिः एषतआत्मेत्याद्युपदेशवैयर्थ्यंचेतिशंकायां अदृष्टइत्यादिनानिषेधतात्पर्यमुच्यते
अदृष्टःरूपादिसाक्षात्कारागोचरःअचक्षुर्विषयइतियावत् अश्रुतःशब्दसाक्षात्कारागोचरःश्रोत्राग्राह्यइतिया
वत् अमतःमानसमननारब्धविचाराविषयःअप्रतर्क्यइतियावत् अविज्ञातःबुद्धिकार्याध्यवसायोविज्ञानंतदवि
षयःदुरध्यवसायः द्रष्टारूपसाक्षात्कारकर्ता श्रोताशब्दसाक्षात्कारवान् मंताविचार्यगोचरसाक्षात्कारवान् विज्ञाता
अध्यवसेयसाक्षात्कारवानित्यर्थः अन्यथाद्रष्टाश्रोतेत्यादेःश्रवणमननादिकर्तृपरत्वेअदृष्टश्रुतादिपदानां
तन्निषेधकत्वस्यावाच्यत्वात् द्रष्टव्यःश्रोतव्योमंतव्यइत्यादिश्रुतिबाधः एवंचनान्योतोस्तीत्यत्रापिश्रोतृमंत्रादिष

द्विमुच्यतएवेतिबुध्यमानाप्रतिबुध्यमानशब्दाभिहितयोश्चिदचितोःपरस्यक्षेत्रज्ञशब्देनाभिधानात्तत्रैवपंचविंशातितत्त्वा
निवर्गशब्देनोक्ताःतस्माद्वर्गादपवृत्तोपवर्गःक्षेत्रज्ञःशुचिरूपेदत्तकोबुध्यमानाप्रतिबुध्यमानयोःपरस्मादितितत्रैवा।
न्यदुदकंअन्यत्पुष्करपर्णंतथान्यत्क्षेत्रंअन्यःपुरुषःपंचविंशकःअन्यश्चास्मात्क्षेत्रज्ञइतिपुनश्चतत्रैवएवमासुरे
वे॰वि॰ ६० अन्यद्दुःखंअन्यःपुरुषःपंचविंशातितत्त्वंअन्योस्मात्क्षेत्रज्ञइतिपंचविंशात्परस्मिन्क्षेत्रज्ञशब्दप्रयोगात्सनत्कु।
मारनारदसंवादेचपशुपःपशुपतिपशूपंनमयशब्देचपशुपतिपशूपंतेपशुपपशुपत्वात्पशुपावशूपेनपशुपतइतिश्लोक
61 मुक्ताःप्रकृतिंक्षेत्रंक्षेत्रज्ञंचापरंक्षेत्रज्ञःषड्विंशातिकोनुपश्यतिनतुपंचविंशकःक्षेत्रज्ञःप्रकृतिर्वापरंक्षेत्रज्ञंपश्यती
तिप्रयोगाच्चअतएवात्मशब्दवत्क्षेत्रज्ञशब्दस्यजीवपरसाधारणस्यपंचविंशपरशब्दविशेषितस्यजीवपरमात्मविषयत्व
दर्शनाच्चयोस्यात्मनःकारयितातंक्षेत्रज्ञंप्रचक्षतेयःकरोतिकर्माणिसभूतात्मेतिचोच्यतइतिमानवप्रयोगाच्चतदेतत्स
त्वमितियेनकारणेनस्वप्नंपश्यतितेनकारणेनजीवद्रष्टार्थःअन्तःकरणपरत्वपक्षेपियेनेतिकरणपरत्वमनुपपन्नंप
रमतेन्तःकरणस्यकर्तृत्वाज्जागरदशायांजपाकुसुमवदात्मनितत्कर्तृत्वारोपनिमित्ततयाकथंचिदुपचारन्तःकरणत्वसं
भवेपिस्वप्नदर्शनेनकथंचित्करणत्वंस्वप्नदर्शनस्यसादिरूपत्वांगीकारात्अन्यथायमितिशारीरत्वाद्दृष्टत्वाच्चक्षेत्रज्ञस्य
र्थःयत्तुकरणेएवासुतृतीयाब्रह्मणश्चिदचिदुपादानत्वश्रवणादुपादानत्वस्यस्वाश्रयत्वरूपतयाजीवोपादान
त्वस्यतदीयज्ञानावस्थाश्रयत्वरूपत्वात्तत्रचजीवस्यघटकत्वात्परमात्मनिजीवगतस्वप्नदर्शनाश्रयत्वंप्रत्य राम ६०

प्रतीयते समानेव वृक्षे इत्यत्र च पुरुषो जीवः अन्तःकरणस्य पुरुषत्वाद्वाच्यत्वाभावात् शोचति मुह्यमानः पश्यति वीतशो-
क इत्यादिपदानामस्वारस्यप्रसंगाच्च अन्यं परमात्मानं ईशशब्देनाभिधानात् स्वविषयज्ञानेन वीतशोकत्वे तु नाच्च
न केवलमनंतरमंत्रे कार्य्या द्वासुपर्णेति मंत्रस्य जीवपरमात्मपरत्वं किंतु स्वाद्वत्ति अनश्ननन्निति भोक्तृत्वाभोक्तृत्व
श्रवणाच्च तद्वसीयते च तु श्रोत्रादीनां दृष्टत्वश्रोतृत्वादिवत् अन्तःकरणस्यापि करणत्वादेव भोक्तृत्वं न संभवतीति जी-
वस्य च क्षेत्रज्ञत्वे क्षेत्रं देहपारसंगद योऽशोभे वानन्तानंतोपपद्यते न लिंगिक्षतेः कोर्थः उच्यते सत्वं च देही जीवः ह्रवासुव्यव-
सायेषु सत्वमस्त्री तु जंतुष्ठितिनामानुशासनात् जंतुपरत्वावगतेः जंतुश्च चेतनः प्राणी तु चेतनो जन्मी जंतुजन्यशरीरिण इति ना-
मपाठात् वन्यान् विनेष्यन्ति च दुःसत्वानीति प्रयोगात् अनंतरसूक्तिपर्यायवादिविदे च पुनः सत्वं प्रकृतिजैर्मुक्तं यदाभिः स्यात् (
त्रिभिर्गुणैरिति दर्शनाच्च क्षेत्रज्ञशब्दस्यात्र परमात्मपरः अर्थांतरप्रसिद्धः कारणप्राणादिशब्दवत् अर्थानुपपत्तेः परमात्म-
परत्वोपपत्तेः विष्णोर्नामसहस्रमित्युपक्रमस्य क्षेत्रज्ञोऽक्षर एव चेति प्रयोगात् क्षेत्रज्ञं जानातीत्यवयवार्थस्य तस्मिन्नेव पुष्कलत्वा-
त्तमोत्स धर्मे ततः सत्वगुणपहीनास्तपरमात्मानमंजसा प्रविशंति द्विजश्रेष्ठ क्षेत्रज्ञं निर्गुणात्मकं सर्वावासे वासुदेवे क्षेत्रज्ञत्वं वि-
द्धि तत्वत इति तत्रैव विश्वमूर्धा विश्वबिभुजो विश्वपादाक्षिनासिकः एकश्चरति क्षेत्रेषु स्वैरचारी यथासुखं क्षेत्राणि च
शरीराणि ज्ञानानि च शुभाशुभे तानि वेत्ति स योगात्मा ततः क्षेत्रज्ञ उच्यत इति प्रयोगात् तत्रैव कपिलासुरिसंवादे ज्ञानाना-
मासुरे क्षेत्रं स्थाणुचिरूपेत्तकः वुध्यमाना प्रतिबुध्यमानयोः पश्यस्तत्वविदित्वा निरवयवमनामयमस्मा दुःखा

ब्रह्मणोऽनुशरीरे वस्थाने ह्यासुयोनिष्वत्र समानेव द्वा इत्यत्र च प्रतिपाद्यते जीवस्य परो धर्मो धर्मो ब्रह्मणो विद्या
तद्बंधो सयुजो पुंवद् बंधः तादात्म्यं सखा यो जीवेन ईश्वरः प्रसिद्धिं गतस्तेन च समः अनेनोपकारेण सखेव इतरपदा।
वे०टी० निसृष्टार्थानि पूर्व रवेंद्र वृद्धै वेदा विश्वमिदं वरिष्ठमिति ब्रह्मण स्सर्वात्मत्वे निर्दिष्टे भोक्तृभेदान्न ब्रह्मापि भोक्तृ
६ स्यादित्याशंकायामयं मंत्रः यत्संते यो ह्याविंबप्रतिविंबभूतजीवेश्वरौ अस्मिं शरीरे वर्त्तेते तयोर्मध्ये अन्यो बु
द्धिप्रतिविंबभूतः तद्भेदाध्यासात्तद्धर्माभिमानी प्रतिकर्मफलं भुंक्ते अन्यस्त एवात्मस्य न बुद्धितादात्म्य।
रहितः स्वरूपभूतचैतन्यात्मनाऽनश्नन्नभिचाकशीति भोगरहितः प्रकाशते भोगसाक्षी भवेदाध्यासाद्धिमा
त्रमित्यर्थः अनश्नन्नन्यः इत्यत्रान्यशब्दो जीवस्यैवानुपहितरूपपरः नत्वीश्वरपरः देवदत्तो वामेनाक्षाय
रूपनीमुक्ते नदित्तरेण दर्शनं निषेधवत्संपर्यायरीश्वरे तन्निषेध सिद्धेस्तदुक्तिवैयर्थ्यात् कथं भोक्तृजीवस्या
ज्ञानाद्युपाधिरहितं स्वरूपं आगंतुकस्य स्वरूपत्वायोगात् न च तत्स्वाभाविकं जीवस्येदानीं भोगविशिष्टत्वा
त् नहि दंडविशिष्टस्तदानीमेव दंडाभावविशिष्टो भवतीत्याशंक्य भोगस्य कल्पितत्वादधिष्ठानस्य का
लत्रयेऽप्यारोप्यशून्यत्वाद्दंडवैषम्यं नहि सर्पबुद्धि[illegible]गृहीता रज्जुस्तदानीमपि सर्परहिता न भवती राम
त्यभिप्रेत्याह समानेवृक्षे पुरुषः इति समाने विंबप्रतिविंबरूपजीवेश्वराश्रये शरीरे पुरुषो बुध्युपहि ६१

62

विघटकतया परमात्मनः स्वप्नदृग्निजीवस्य करणतया ऽपदेशो युक्त एव अस्मिन्पक्षे शारीर उपद्रष्टेत्यत्र उपद्रष्टृ
तदुपद्रष्टृत्वं २ त्वेवाऽत्तो द्वासुपर्णेति मंत्रो जीवपरमात्मपरः अत्र समानशब्देन जीवशरीरस्य परमात्मशारीरत्वप्रतिपादनात्तस्य च
भोगार्थत्वनिषेधात् अनंतरप्रसिद्धसर्वशारीरत्वप्रयुक्तमेवानच्छरीरत्वकीर्तनमित्यवगमात् पूर्वखंडे सर्वात्मत्वोक्तिः सर्व
शारीरत्वनिबंधना न तु स्वरूपतादात्म्यनिबंधनेति सिध्यति समाधीरः पाकमत्रा विवेशो निवाके पाकं वालेमोधीरः पर
मात्मा ऽसाविवेशोति जीवशारीरत्वं पुनरपि रूपकप्रतिपाद्यते का वेलौ सुपर्णौ ज्ञानाज्ञानयोः अत्र को हेतुरित्याह समानेव
द इति निमग्नः जलनिमज्जतेनेव तिरोहितस्वरूपः अनीशया प्रकृत्या ईश इति ईशानेत्यनीट् तृतीयैकवचनस्यैव संख्या
निकोयमनादेशः यद्वा गुरोश्च हल इत्यप्रत्यये भावे ईहेतिवत् अनीशा अनीशानं शोकनिवर्तनासामर्थ्यं कदा तर्हि शोकमोक्षो
भवतीत्यत्राह जुष्टमिति स्वस्मिन्प्रीतिमंतं भगवंतं तत्प्रसादेन यदा पश्यतीत्यर्थः आदिकर्मणि क्तः अस्य मीशमि
श्लो८ त्यत्रेश्वरेनास्य महिमानमिति वीतशोक इत्यत्र अपूयमाण इति शेषः संबध्यते तथा च इतीशमस्य महिमानं च प
श्यतीत्यन्वयः इति अकारवचनः अकारश्च द्वासुपर्णेत्यागुक्तनिर्येन्तत्वाय हतया मत्वादिः अपाय इहात्मान
मनुविद्य व्रजंत्येतेभ्य सत्यान्कामान् नितिवद् मर्धर्मिणो ऽस्यापत्वकीर्तनं समुच्चेत यंवलाचशाखा आहारः
अथवानरमानपरवरं तु अं विविदिषंति यज्ञेन दानेन तपसानाशकेनेत्यत्रेवानुषंगः यदेत्युक्ते स्तदावी
तशोको भवतीत्यर्थः पंचदशानाऽपानी मत्रभवंतीति कल्पनवत् यत्तु बिंबप्रतिबिंबभावेनाभिन्नयोर्जीव

१ भेदमात्रेशंकाऽऽश्चेतनसामानाधिकरण्यस्य बाधार्थत्वान्न तत्रशंकेति चेत्तथा सत्यत्रापि बाधबुद्ध्या शंका स्यात्तत्रा १

त्तिर्न सुषुप्त्यादावविसंवादो वा किंतु तत्कारणगुणप्रपाचयोस्तत्कारणज्ञानस्य च निरतत्वान्नाप्तोतीत्यती आह
यदा पश्यः पश्यते रुक्मवर्णमिति निरंजनइत्यविद्याराहित्योक्तिः परमं साम्यमित्यैक्यमाह अनंतसादृश्यपर्यै
वे॰वि॰ कत्वएव पर्यवसानात् भेदगर्भसादृश्यस्यानंतसमभ्याधिकभ्रदर्शनेन तत्समोऽस्त्यभ्यधिकः कुतोऽन्यः
६२ स्यादिश्रुतिस्मृतिभिर्निषिद्धत्वात् यथा विद्वान्नामरूपाद्विमुक्त इत्यादिना मुक्तो नामरूपराहित्यप्रतिपादनात्
सादृश्यायोगाच्च साम्यं समत्वं सर्वात्मत्वमिति वा तस्मान्नेताश्रुतयो भेदे प्रमाणमिति ।। ।। उच्यते सेगतिर
ताई स्तावदनुपपन्ना चेतनाचेतनसर्वज्ञत्वाभिहिते चेतनाचेतनगतास्सर्वे दोषा ब्रह्मणि प्रादुष्युरित्येवशंका स्यान्न
63 तु जीवाभेदार्थसामानाधिकरण्यबुद्धेत्तत्रापि तथैव स्यादिति उभयत्रशंको न्यितिरविशिष्टएकपदोपात्तयोश्चि
दचितोरेकत्राभेदार्थसामानाधिकरण्यमितरत्र बाधार्थमिति कुमतिः कस्यापि न जायत इति चिदचितोरात्मे
श्विशेषेणैवशंका स्यात्तत्र चनोत्तरमपमेत्र इति नैवं संगतिः किंतु पूर्वस्वेदेऽपास्यस्य द्वैरूप्यावस्थानोक्त्या जीव
स्योपास्यत्वशंकायां तद्वारतये उभयोर्द्वैरूप्यावस्थाने चिदेकस्य भोक्तृत्वादनुपास्यत्वमितरस्य भोक्तृत्वा
दिदोषविरहात्कल्याणैकतानतया ध्येकाशमानत्वाच्चोपास्यत्वमिति प्रतिपादनार्थं प्रवृत्तोयं मंत्रः। अ राम
जामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगाम ६२

तःनिमग्नः कर्तृत्वाभिमानवान् स्वरूपेणाप्रकाशान्निमग्नोऽत एव तत्कारणमोहाद्वतः अनीशया स्वस्यानंदरूपे
श्वरभावाप्रतीत्या शोचति विषयागमापायनिमित्तदुःखमनुभवतीति चानीशा ईश्वरत्वाभावस्तत्प्रतीययाहेतुत्वेनेति
दिक् ॥ ननु तद्प्रतिपत्तिरिति वाच्यं न तथा सति तस्य तदवमतेर्मुक्तावपि सत्वेन तदापि तन्निमित्तशोकप्रसंगादस्मन्म
तेऽपीदानीमपि तत्स्वभावादज्ञानमेवानीशा अत एव जीवेश्वराभेदसाक्षात्कारात्तन्निवृत्तिमाह जुष्टं कार्यकारणसंघाते
मु.५ सेवितं विवेकिभिस्तदात्मतया रहीतं यदाधिकारी नाविवेचनाच्छरीरत्रयात्तद्वपक्कभूतं त्रयरीरत्रयसाक्षितया
वगतं शोधितं त्वंपदार्थं ईशमीसं तत्पदार्थं ईश्वरमिति स्वात्मानं तत्पदार्थं साक्षात्करोतीति यावत्तदाऽस्यात्मत्वे
नावगतस्य महिमानमपरिच्छिन्नानंदात्मतां इति इति नांतरीयकतयानर्थनिवृत्तिं च दर्शयन्निवीतशोक इति ॥ अ
थवा विवेकवैराग्यादिभिः प्रक्षालिताशयमलैः सनकादिभिर्नैरंतर्येणात्मत्वेन सेव्यमानमनं कार्यकारण
संघातच्छिन्नलक्षणमीशं यदा पश्यतीत्यर्थः ननु यदा जीवादन्यं पश्यति तदा तस्य महिमानं प्राप्नोतीत्यर्थः तथा
सति जीवेश्वरतदुभयभेदज्ञानं मुक्तौ हेतुः स्यात् तथा च तमेव विदित्वाति मृत्युमेति नान्यः पंथा विद्यतेऽयना
येत्यादिश्रुतिविरोधः स्यात् किंच भेदे तस्य महिमानमेतीत्यनुपपन्नं [illegible] न्यदीयमहिमप्राप्त्यो ।
गात् तत्स्वस्य महिमानमिति कल्पनायां लक्षणाप्रसंगादत एव न स्तुतिमात्रपरतयापि व्याख्येयं संभवति मुख्या
र्थत्वं तत्परोक्षतापत्तश्च ब्रह्म वेद ब्रह्मैव भवतीति वाक्यशेषविरोधाच्च तत्त्वचनाना श्लोकस्तिर

वृत्त्यपेता। केचित्तु प्रतिपिपादयिषितवेद्याविमुखयकीर्तनवैयर्थ्यात्तस्मात्त्वदुक्तार्थउपक्रमविरुद्धः किंचान्यत्रात्मनः प्र
तिबिंबपर इत्युक्तं तत्तस्यैवान्यस्यान्तर्भुक्त इत्युक्ते आघातः स्वस्य स्वस्मादन्यत्वासंभवात् बुद्धितादात्म्यापन्नस्य
वे॰वि॰ ६३ रूपादन्यत्वमुच्यत इति चेन्न पूर्वेणान्यत्रादेः नतस्यानुपस्थितेः द्वितीयस्य तदन्यत्वपरत्वायोगात्तस्य मान्यपदे।
ननु बुद्धितादात्म्यविशिष्ट एवोच्यत इति चेदेवमपि स एवान्यस्मान्निति आघात एव स्वस्वरूपेणान्यत्वान्न आघात
इति चेन्न हि भोक्तृत्वतदभावयोरपि तथैवाघाताभावेदन्यस्यास्तीति अर्थमेकस्याज्ञानोत्पाद इतरानज्ञानस्या
64 र्थसिद्धत्वात्तस्यानज्ञानत्वं न वक्तव्यमिति पदुक्तं तन्न स्वादु पिप्पलमत्तीत्युक्ते इतरस्य स्वादुज्ञाननिषेधेऽपि नाश
नमात्रनिषेधः किंच पिप्पलमत्तीत्युक्ते [illegible]मत्तीत्युक्ते इतरः फलमत्तीत्यपि स्यात्तत्र पिप्पलस्या
न६ नीयं निकृष्टं भोग्यमेको भुंक्ते। अपरस्तु फलस्यानायं मुक्तं भोग्यं भुंक्ते इति प्रतीयते अन्नोऽनश्नन्निति सामा
न्यनिषेधस्सार्थः किंचोत्तरत्र समाने वृक्षे इत्यत्र इति पर्युपतीति प्रकृतविशेषणपरामर्शात् षष्ठीप्रतीत्या
शब्दोपस्थितानामेव परामर्शः स्यात् न त्वार्थिकस्य विलंबितप्रतीतिकत्वात् तत्रार्थिकस्याप्यनश्नन्नित्यपि पु
नरूपादानमुत्तरत्र इतीति परामर्शार्थं युक्तमेव समाने वृक्षे इत्यत्रापि संगतिरनुपपन्ना रूपभेदकथनेनैव शं
कायाः परिहृतत्वात् ननु बुद्धिगतसुखदुःखादिर्हि स्वरूप एव बाध्यस्यते तद्वच्च जीवस्य भोक्तृत्वमतः क
थं स्वरूपे तदभाव इति शंका स्यादेवेति चेन्न एवं मिथ्यात्वेन परिहारे पूर्वरूपद्वयोक्तिर्व्यर्था ब्रह्मणोऽपि भो राम ६३

वजीवेन ३

जोन्य इति पूर्वमंत्रे ऽजो ह्येक इति बद्धोऽभिधीयते यदि जहात्येनामिति मुक्तोऽभिधीयते तदा त्रिगुणात्मक प्रकृति त्यागे
न शोकतरणे क उपायः स्यादित्याकांक्षायां द्वा सुपर्णेत्यारभ्य वीतशोक इत्यंतेन यदा जहात्येनामिति परमात्मपरं भुक्तभो
गामिति भुक्तभोगामित्यर्थः तदा जहात्येनामेतत् कथमुपपद्यत इत्यपेक्षायां तत्संसर्गप्रयुक्तकार्याभावाभिप्रायाज्जहा
तीत्युक्तिरित्यभिप्रायेण द्वा सुपर्णेति शोकतरणे हेतुः क इत्यत्राह समाने वृक्ष इति एवमुत्तरमप्यनुपपन्नं त्वदु
अ ५ क्तशंकानिरासस्यान्योऽतिश्नन्नन्योऽनश्नन्नभिचाकशीतीत्येतावतैव सिद्धेर्द्वा सुपर्णेत्यादित्वदुक्तार्थस्य बा वैयर्थ्यात्प्र सक्तद्वासुपर्णेत्यादि ५
धकमेव तथाहि पूर्वत्र जीवब्रह्मणोरैक्यं प्रतिपादितं तदनुपपन्नं ब्रह्मणोऽपि भोगप्रसंगात् तच्चानुपपन्नं
श्रुत्यैव ब्रह्मणो भोगनिषेधादिति शंकायां तस्य जीवस्य विशिष्टरूपेण भोक्तृत्वमविशिष्टस्वरूपेणाभोक्तृत्वाभा
वोऽस्त्येतत्स्वरूपेण ब्रह्मैक्यमुपपद्यत एवेत्युत्तराभिप्रायकमिदं वाक्यमिति ह्युक्तं तथा च अन्योऽतिश्नन्नश्न
न्नन्योऽभिचाकशीति एतावन्मुक्तिर्लक्षणध्याहाराद्भोक्तृत्वोपाधिविनिर्मुक्तेति तात्पर्यवानपि नु शंकोत्तापि द्वा सुपर्णे
ति वाक्ये जागर्ति नो वेद्यावकाशः त्वयापि जीवब्रह्मणोर्द्वाविति निर्दिष्टत्वाद् उच्यते ऽन्योऽनश्नन्नन्य इति ब्रह्मणः
एवानशनमुच्यते तत्र पूर्वं ब्रह्मणो भोक्तृत्वाभावात् भोक्तृभेदेनोपपद्यत इति या शंका त्वया तां सा पुन। क्र २
७९ ता निश्चयरूपस्यैव तन्निवर्तकत्वात् तेन बाध इति नन्वस्वरूपमात्रेन वधारणासिद्धेः सद्द्वितीयत्वाद्द्वितीयत्वादावे
वस्त्वनवधारणं तद्विषयसंशयदर्शनात्तन्नवत्तत एवस्वरूपेऽप्यनवधारणमिति वकुं तत्र कं ऊर्द्ध्वंयं स्था
80 णुर्वा पुरुषो वेति स्थाणुत्वसंशये पूर्वन्नवधारणासिद्धेः अन्यथा स्थाणुरेवेत्युपदेशानन्तरमपि वनसाम्यादि।
संदेहदर्शनात् स्याणवधारणमपि न स्यात् तन्न यत्किंचित्संशयस्य सर्वत्र सुलभत्वात् क्काप्यवधारणं न।
स्यात् तस्मात् सप्रकारकसंशयनिवर्तकं ज्ञानं सप्रकारकमेव विचाराधीनमिति वाच्यान्निष्प्रकारकज्ञानासिद्धे
र्बाधः अत्र यदुक्तं समानप्रकारकज्ञानमेव संशयनिवर्तकं न तु समानविषयमिति मत्र पुरुषे दंडोऽस्ति न वेति।
संशयस्य दंडी पुरुष इति ज्ञानादनिवृत्तिप्रसंग इति तन्न न हि कोऽयास समानप्रकारकत्वं विवक्षितं तत्र थास
न्निस्थाणुर्वा पुरुषो वेति संशयस्य कुड्यत्वनिश्चयादनिवृत्त्यापत्तेः किंतु धर्मितावच्छेदकधर्मेणैव विवक्षितं तेन स्था राम
न संशयधर्मितावच्छेदकावच्छिन्नधर्मिताकसंशयकोटिविरोधिवैशिष्ट्य निश्चयः संशयविरोधी यथा ७९

रकाज्ञानादितिवाच्यं तस्यापि घटत्वादिप्रकारत्वात् न च तत्र धर्मत्वादिकं प्रकार इति वाच्यं तथापि घटत्वादिप्रका
रकत्वापाद्यस्य तथात्वात् असाधारणधर्मवानयं घटो घटत्वाद्यसाधारणधर्मवानयमिति ज्ञानात्तस्यापि विशेषात् इ
तितन्नत्वाप्यनुभूयमाने घटत्वेऽज्ञानासंभवात् न च तत्तानवधारणे सोनुभवः तथासति कथमसाधारणधर्म
वानयं वा सामान्यवान्नवेति संशयाभावः अतो नास्य घटत्वाज्ञानं अयं घटो नवेति संशयस्तु तद्विरोधिज्ञानाभा
वादेवोपपद्यते ननु किं तद्विरोधिज्ञानं न तावद्घटत्वप्रकारकं घटविषयकस्य सामान्यवानिति ज्ञानस्य तदवि
रोधित्वात् तत्प्रकारे सामान्यधर्माप्रकारकं तत्प्रकारकज्ञानं तत्कोटिकसंशयविरोधीत्युक्तेः सामान्यात्म
कघटत्ववानिति ज्ञानस्य विरोधितानस्यात् सामान्यधर्ममात्राप्रकारकत्वविवक्षायामपि सामान्यवानयं घट इति ज्ञा
नात् संशयनिवृत्तिर्न स्यादिति चेत् सामान्यधर्मानवच्छिन्नतत्प्रकारताज्ञानस्य तत्कोटिकसंशयविरोधात् सामान्य
वायं नेघटत्वस्यत्र च सामान्यधर्मावच्छिन्नप्रकारतायां सत्यामपि तदनवच्छिन्नापि प्रकारतास्ति किं च वाक्यस्य
स्वरूपमात्रपरत्वे लक्षणाप्रसंगः तच्चानुपपन्नं अनुपपत्त्यभावात् न च तात्पर्यानुपपत्त्या लक्षणा वाच्यत्व
शिष्टस्यैव बुभुत्सितत्वेन तात्पर्यगोचरत्वात् तस्मात्साध्यविकलो दृष्टान्तः सत्यादिवाक्ये विस्वरूपमात्रतात्पर्या
भ्रवणान्यथ्ययुक्तं भेदसत्त्वस्थापनेन स्यादेतावदिविशिष्टतात्पर्यकत्वनिर्णयात् मिथ्यात्वेपि व्यावहारिकसत्त्व
त्वादिविशिष्टबोधनसंभवात् न च तमेवविदित्वेत्यवधारणेनान्यज्ञानस्य मोक्षसाधनत्वासंभवः तदर्थस्यमा

धीत्यर्थकं विशिष्टविषयाज्ञानं सप्रकारकज्ञाननिवर्त्यं केवलविषयं तु केवलज्ञाननिवर्त्यं न तु तद्गोचरं वै-
शिष्ट्यविषयकज्ञाननिवर्त्यं मूलाज्ञानं च चैतन्यमात्रगोचरमिति न तन्निवर्तको विशिष्टज्ञानादेरिति तन्मूला
वे० वि० ज्ञानस्य चैतन्यावरकत्वात् सिद्धः मूलाज्ञानस्य चैतन्यावरकत्वे हि तस्य मोक्षमनु वर्तेः घटः स्फुर
८० तीत्यादिव्यवहारायोग्यतायाः सर्वदा सत्त्वेन सार्वलौकिकव्यवहारोच्छेदप्रसंगात् न च विशिष्टव्यवहारे सत्यपि
स्वरूपमात्रव्यवहाराभावात् तद्व्यवहारायोग्यतारूपावरणप्रयोजकं मूलाज्ञानमिति वाच्यं विशिष्टस्वरूपव्यव-
81 हारदशायां स्वरूपमात्रव्यवहाराभावस्य विशिष्टव्यवहारसामग्रीप्रयोज्यतया तस्यावरणानपेक्षत्वात् अन्य
थाघटादिसमूहालंबनानंतरं समूहालंबनव्यवहारे सति तदानीं घटमात्रगोचरव्यवहाराभावेन तत्राप्यावर
णकल्पनाप्रसंगात् विशिष्टस्वरूपगोचरव्यवहाराभावदशायां तु सर्वदा ज्ञानं प्रवृत्तिनिमित्तविशिष्टविषय
तया स्वरूपमात्रगोचरतदभावादनुपपन्नाः तत्तत्सामग्रीकालीनता तद्व्यवहारायोग्यतारूपावरणंक
थं स्यात् लक्षणया स्वरूपमात्रगोचरव्यवहाराभावस्तु सर्वेषामपि पदानां वाक्यानां च विशिष्टविषयत्वमुत्पत्ते
रेवयद्वालं प्रकारो नाम विषयमात्रं किं वा विशेषणं व्यावर्तकं वा भासमानवैशिष्ट्यप्रतियोगी वा आद्ये ममखंड
ज्ञानस्यापीति न बाधः न द्वितीयः चित्रगुरिति ज्ञानस्य निष्प्रकारकत्वप्रसंगात् गवान्तरावशेषणत्वात् न रा० म०
तृतीयः अभेदपक्षादावभावात् न किंच आवृत्तिबोधहेतुज्ञानविषयस्वरूपेण आवर्तकविषयज्ञानं सप्रकारं ८०

त्वेन समानविषयत्वेन निवर्तकत्वं तथा प्रागेवोक्तं ननु विरोधिवैशिष्ट्यज्ञानस्य निवर्तकत्वे भ्रमेऽपि यदिति ज्ञानात्
संशयनिवृत्त्यापत्तिः न च सामान्यधर्मानवच्छिन्नप्रकारताकत्वमपि विरोधिविशेषणं पुरुषे दंड इति ज्ञानस्य दंडी
न वेति संशयनिवर्तकत्वाभावापत्तेरिति चेत् न सामान्यधर्मानवच्छिन्नविषयविभाजकोपाधिविशिष्टत्वस्य वि
रोधिनि विवक्षितत्वात् विषयविभाजकोपाधिश्च विशेष्यत्वप्रकारत्वादिः नन्वेवमपि दंडी पुरुष इति ज्ञानमनिवर्तकं
स्याद्दंडत्वस्यापि सकलदंडवृत्तेः सामान्यत्वात् न च संशयकोटिद्वयसाधारणधर्म एव विवक्षितः दंडी न वेति संशय
स्य द्रव्यत्ववानित्यनेनाप्यनिवृत्त्यापत्तेः न च संशयकोटिविरोधितदितरसाधारणधर्मो विवक्षितः द्रव्यत्वं तु दंडाभा
वकोट्यविरोधि कुंडलादिसाधारणमिति वाच्यं सुवर्णे तैजसत्वपार्थिवत्वसंदेहदशायां द्रव्यत्वसाक्षाद्व्याप्यजा-
तिमानिति निश्चयस्यानिवर्तकत्वात् तस्याप्युक्तरूपत्वादिति चेत् न विरोधितावच्छेदकेतरधर्मस्य सामान्यधर्मपदे-
न विवक्षितत्वात् विरोधितावच्छेदकं च दंडी न वा दंडत्वं गमयं घट इत्यत्र घटत्वत्वमित्यवधेयं विरोधिता च संश-
यकोटितावच्छेदकावच्छिन्नप्रतियोगिताका विवक्षिता तेन द्रव्यत्वस्यापि यत्किंचिद्विरोधितावच्छेदकत्वा-
द्भ्रमवानिति निश्चयस्य न दंडी न वेति संशयनिवर्तकत्वशंकावकाशः अयमत्र निष्कर्षः तद्धर्मावच्छिन्नप्रति-
योगिताकसंशयकोटिनिरूपितविरोधितावच्छेदकेतरधर्मानवच्छिन्नविषयविभाजकोपाधिविशिष्ट-
त्वसंशयकोटिविरोधिवैशिष्ट्यनिश्चयस्तद्धर्मभिन्नधर्मानवच्छिन्नकोटिताकतद्धर्मकोटिकसंशयविरो-

पादकत्वाभावात् अत एवोक्तं समस्तानानंदात्मेदस्याव्रह्मत्वप्रभावेन ब्रह्मणस्तदात्मत्वेन चाव्याप्याप्तिभावेन न स्वलक्ष
णत्वात् वस्तुनः स्वरूपलक्षणस्याव्यावर्तकत्वात् अन्यस्य च तस्याभावात् सत्याद्यात्मत्वमेव स्वरूपलक्षणं युक्तं जगत्का
वे॰वि॰ ८१ रणत्वादेः कल्पितस्य वास्तवस्वरूपत्वानुपपत्तेः न च सत्यत्वादीनां धर्मत्वाभावे लक्षणत्वानुपपत्तिः असाधारणध
र्मस्यैव लक्षणत्वादिति वाच्यं एवं परिभाषायां प्रमाणाभावात् यद्विषयत्वेन ज्ञानस्य व्यावर्तकतात्तल्लक्षणं तद्वि
षयस्य स्वरूपमपीत्युक्तमिति स्वरूपमपि लक्षणमिति तत्र जगत्कारणत्वादीनामपि स्वरूपव्यावर्तकतया
82 लक्षणत्वात् स्वरूपात्मकलक्षणमनावरूपकं तदभावे वाधकाभावात् न वा स्वरूपस्य लक्षणत्वं संभवति त्र
साधारणधर्मत्वाभावात् यद्विषयत्वेन ज्ञानस्य व्यावर्तकतात्तल्लक्षणं तद्विषयस्य स्वरूपमपीति चेत् तन्न स
त्यत्वादिसंबंधविषयतयैव ज्ञानस्य आवर्तकत्वात् अन्यथा सत्यपदादेव जड्व्यावृत्तिसिद्धौ ज्ञानपदवैयर्थ्यं
स्यात् यदि च ज्ञानपदादेव जड्व्यावृत्तिः तदा ज्ञानत्वादिसंबंधविषयतयैव ज्ञानस्य व्यावर्तकत्वमिति न स्वरू
पविषयत्वेन व्यावर्तकता तन्मात्रप्रश्नोत्तरत्वं वासिद्धं तत्र तावत् प्रश्नादर्शनेन विशेष्यासिद्धिः न च वाक्यत्वे
न तदनुमानं व्यभिचारात् तन्नाप्युत्तरत्वेनान्योन्याश्रयात् प्रश्नसत्तिमुत्तरत्वसिद्धिः कल्पनायामपि सत्यत्वादि
विशिष्टवस्तुपरसत्यादिवाक्यानुसारेण प्रश्नस्य विशिष्टपरत्वेनैव कल्पनाद्विशेष्यासिद्धिः अत एव यदुक्तं राम
उत्तरस्यानंतवस्तुपरत्वात् प्रश्नोऽपि तथैव कल्पयितुमुचितः न त्वसाधारणधर्मविषयः अनंतत्वं ह्यभावा ८१

उक्तवस्तुतो व्यावर्त्तकविषयं नाद्यः तेनैव ज्ञानेन व्यावर्त्तकस्य तथात्वेनाग्रहणात् नान्त्यः पराभिमतनिर्विकल्पकेऽस्म
दभिमताखंडत्वस्यासिद्धत्वात् काशेन तस्य तत्त्वात् प्रत्यक्षस्य एव स्वमहिम्नाज्ञरुद्ध्यावर्त्तकत्वात् न चतुर्थः लाघवेन सविषय
कत्वस्येव सप्रकारत्वस्य शब्दार्थत्वात् किं च भासमानवैशिष्ट्यप्रतियोगित्वेन तद्विषयज्ञानं सप्रकारकं चेत् स्वस्यैव स्ववि
षयत्वापत्तिः वस्तुतो भासमानवैशिष्ट्यप्रतियोगित्वं प्रकारत्वं चेत् विशेष्यस्यापि तदापत्तिः किं चाभावविशिष्ट
ज्ञानस्यापि निष्प्रकारत्वापत्तिः स्वरूपातिरिक्तवैशिष्ट्यस्य तत्राभावात् अभावस्य भूतलादिसम्बन्धो नाप्रतियोगित्वात्।
स्वाप्रतियोगिकत्वाच्च भासमानत्वं च किं भानविषयत्वमात्रम् उत विशेषणविशेष्यसंबंधविषयाभासमानत्वं प्रत्यास
त्तिं विना भासमानत्वं वा नाद्यः प्रमेयमिति ज्ञाने विश्वस्य प्रकारत्वापातात् द्वितीये यदि विधा प्रकारस्तदात्मा
श्रयः अन्यस्त्वप्रसिद्धः न तृतीयः अयं घट इति प्रत्यक्षे घटत्वस्य व्याप्तेः सन्निकर्षादेव तत्सन्निकर्षप्रतीतेः प्रमेय
मिति ज्ञाने च घटत्वादेः प्रकारत्वे तत्संशयाभावप्रसंगः तदंशे तत्तत्तानवधारणमिति चेन्न तर्हि किं प्रकारत्वे।
नाखंडज्ञानस्यापि सत्तानवधारणात्मत्वेन संशयादिनिवर्त्तकत्वसंभवात् प्रकारत्वशब्दार्थस्तु विषयत्वमिति त
न्नानुभवविरोधात् अनुभूयते हि दंडी पुरुष इति प्रत्यये पुरुषे दंड इति प्रत्यये च दंडादेर्विषयतायां समानायामपि को
ऽपि विशेषः स एवास्माकं प्रकारत्वादिः अनुभवापह्नवे च सविषयत्वमेव न सिध्येत् तस्मात्सत्त्वादिवाक्यस्याखंडा
र्थत्वानुपपत्तेर्बाधः असिद्धिश्च लक्षणवाक्यत्वं तावदसिद्धम् असाधारणधर्मस्येव लक्षणत्वात् तन्मते च तत्प्रति

वे०वि० हेतुत्वं पदार्थगोचरत्वात्कथं विषयः तत्र हि कतम आत्मेति प्रश्नस्योत्तरतया योऽयं विज्ञानमय इत्यादि वाक्यं श्रूयते ॥ ॥
८२ स च प्रश्नोऽनज्ञातस्य प्रायः आत्मनः कत्वादि तित्नस्तु तमप्रत्ययेन प्रश्नस्य जातिविषयत्वप्रतीतेः न च जात्यसिद्धिः
आत्मनां बहुत्वस्थापनात् अत एव प्रश्नानुभेदासिद्धे प्रश्नस्य स्वरूपस्य निर्धारितत्वाच्च अहमिति प्रतीयमाने स्वरू
पे संदेहविपर्ययाभावात् देहादितादात्म्यकोटिरेव हि तत्र संदेहः ननु तन्मात्रजिज्ञासानिवर्तकत्वात् कथं विव
क्षितं जिज्ञासानिवर्तकत्वं च तद्योग्यत्वं समादि वाक्ये प्रश्नाभावेऽप्यत दस्येवेति न स्वरूपासिद्धिरिति चेत् नास्मि
न् ज्योतिर्मण्डले कश्चन्द्रो वर्तते तत्र च प्रत्यक्षे गोवज्जानामि अयं चन्द्र इति तु नजानामीति अस्मिन् ज्योतिर्मण्डले
83 कश्चन्द्रः त्वमेव ब्रूहि अयं चन्द्र इति प्रश्ननिरूपणेन प्रकृष्टप्रकाशत्वादितत्र ज्योतिर्व्यक्त्यसाधारणतद्धर्मा
वच्छेदेन चन्द्रशब्दवाच्यत्व निर्द्धारयिषारूपत्वस्यैव जिज्ञासायाः प्रतीतेः जिज्ञासाया वाच्यताविषयत्वं च
जिज्ञास्यान्तराभावात् व्युत्पन्ने चन्द्रपदस्य प्रश्नादर्शनात् प्रकृष्टप्रकाशश्चन्द्र इत्यादिवाक्य इत्युत्तरेणापि जि
ज्ञासानिवृत्तिदर्शनात् अतत्त्वगोचरनियं दादौ सर्वत्र समानाधिकरणप्रयोगस्यैवदर्शनेन तत्तत्पदवाच्यता
यां तत्पदप्रवृत्तेर्निरूढलक्षणाम्लत्वाच्चाद्वा नन्वेकं पदविशेष्यस्यैव जिज्ञास्यत्वं वक्तव्यं जिज्ञास्यत्वं
च जिज्ञासाप्राधान्यं तच्चाज्ञातत्वं अतः स्वरूपस्यैवाज्ञातत्वं वक्तव्यमिति चेन्न किं शब्दविशेष्यज्ञानस्य क्व राम
पि प्रश्ने असदर्शनात् कश्चन्द्र इत्यादौ विशेषणानिर्धारणमेव हि प्रतीयते प्रकृष्टप्रकाशो वा तत्सोत्तरस्यो ८२

प्रतियोगित्वमंतशब्दस्य परिच्छेदवाचिनोऽभावपर्यवसानात् तत्पदनान्योन्याभावापेक्षसंसर्गसंभवः न च ध्वंस
एवांतः अभावत्वे सत्युत्पत्तिमत्त्वरूपध्वंसत्वस्य शक्यत्वे गौरवात् नगरांतः सीमांत इत्यादावंतत्वेनाभावविप्रयो।
गाच्च अस्तु तर्हि संसर्गाभाव इति चेत् न संसर्गाभावत्वस्यैकस्याभावात् नानार्थत्वापत्तेः अन्योन्याभावातिरिक्ता
भावत्वेनानुगमे गौरवादिति तत्तद्भेदस्य प्रामाणिकत्वादनंतशब्दस्याभावप्रतियोगित्वपरत्वासिध्या देशा
द्यपरिच्छेदमात्रपरत्वात् अंतशब्दस्य च नाभावमात्रमर्थः इह घटाभाव इतिवत् इह घटांत इत्यप्रयोगात् न
गरांतस्सीमांत इत्यत्रापि अवयवविशेष एवांतशब्दः प्रयुज्यते माघे तोटकिनोऽन्तादिवशे त्यत्र आदिश्रुति
संबंधित्वयांतशब्दप्रयोगात् समासांतः समासावयव इति व्याख्यानाच्च अभावपरत्वे गयंसीमांत इत्यप्रयोगा
पातात् इह सीमांत इति प्रयोगापाताच्च नगरस्याप्येपि नगराभावस्य सत्त्वेन नगरांत इति प्रयोगप्रसंगाच्च अ। न
स्तु वाऽभावपर्यवसानमंतशब्दस्य तथापि न तत्स्वारस्यानुरोधेन वाक्यतात्पर्यनिर्णयः उपक्रमोपसंहारस्थ। क्रम
सत्यादिपदानां प्रवृत्तिनिमित्तविशिष्टाभिधानस्वारस्यात् समानाधिकरणवाक्यस्यानेकप्रवृत्तिनिमित्त।
विशिष्टैकार्थाभिधानस्वारस्याच्च तदनुरोधेनानंतपदस्यैवार्थवर्णनस्योचितत्वात् न ह्येकपदानुरोधेनो
पक्रमोपसंहारस्थानां बहूनां पदानां वाक्यस्य च स्वारस्यभंगो युक्तः किंचैवमुत्तरानुसारेण प्रश्नस्य स्वरूप
मात्रपरत्वं साधयता कथं प्रश्नानुसारेणोत्तरस्य स्वरूपमात्रपरत्वं साध्यते यत उत्तरं प्रश्नोत्तरत्वादिति

वे०वि०
८३
84

श्रिहेतुत्वं ब्रह्मविदाप्नोति परमिति प्रतिज्ञाय ब्रह्मपदार्थस्य विदित्युक्तवेदनप्रकारस्याप्राप्तौ तूक्ता श्रि॥
प्रकारस्य परशब्दार्थस्य चानिर्णयात् वाक्यार्थप्रतीत्यनिष्पत्तौ तत्सिद्धये तदेषाभ्युक्तेति पूर्ववाक्यविवरण
रूपत्वमुत्तरवाक्यस्य प्रतिज्ञाय सत्यज्ञानादिमंत्रेण सत्यज्ञानानंतात्मकं ब्रह्म हृदयगुहावकाशे य उपास्ते स स
मस्तकल्याणगुणात्मकं ब्रह्मानुभवतीत्यारभ्यायते ऽतोऽनेन मंत्रेण पूर्ववाक्यविवरणरूपेण सत्यत्वादि वि
शिष्टब्रह्मपदमुपात्तमिति गृहीतयुक्तत एवं कर्मत्वाद्यनेकार्थप्रतिपादकस्यास्य मंत्रवाक्यस्य निर्विशेषस्वरूपपर(
त्वमत्यंतासंगतं यदुक्तं व्याकरणादिभिरवगतत्वहृत्तस्यैवासति संकोचकप्रमाणे निरवधिकत्वस्यैव युक्तत्वेन
सर्वात्मतायोग्यत्वमेव तदिति प्रागवगतसामान्यावेदितविशेषस्वरूपैः सत्यज्ञानादिवाक्यैः सत्यज्ञाना(
नंतात्मना प्रतिपाद्यते तेषां भेदे ब्रह्मणः सर्वात्मत्वायोगात् तेषां च श्रुतिन्यायसिद्धत्वान्न घटादेरिव तेषां(
मिथ्यात्वेनापि सर्वात्मत्वसंभव इति तत्तत्र सर्वात्मतायोग्यत्वं बृहत्त्वमित्ययुक्तं न हि लोके एकात्मत्वयोग्य
मणुद्यात्मकत्वयोग्यं बृहत् त्र्यात्मकत्वयोग्यं ततोऽपि बृहदिति न्यूनसंख्याकवस्त्वात्मकत्वयोग्यादधिकसंख्या
कवस्त्वात्मकत्वयोग्यं बृहदिति व्युत्पत्तिरस्ति येनैवमुच्येत सार्वात्म्यविरोधेन सत्यत्वादीनां तात्पर्यमित्यप्यसंगतं
मिथ्यात्वेन तदविरोधात् तच्च मिथ्यात्वे श्रुतेस्तत्र तात्पर्यासंभवः ज्योतिष्टोमादिवाक्यवदुपपद्यते: न च श्रुतेरतत्त्वा
वेदकत्वप्रसंगो दोषः ज्योतिष्टोमादिवाक्यवदेवोपपत्तेः विशेष्यस्वरूपमादाय तत्त्वावेदकत्वसिद्धेश्चत्यतो वेत्यादि

राम
८३

वादित्तिणस्यावाशारवागस्योवाप्रासादसमीपस्योवेत्यादिरूपेणप्रश्नवाक्यस्यविवरणदर्शनात् एवंचकिं
शब्दोयुगपद्बोधनासंभवान्निर्धारितानेकविशेषणव्यावर्तनाबोधयति अतःसर्वत्रकिंशब्दार्थविशेषणाव
छेदेनविशेषणांतरसंसर्गस्यैवाज्ञाततात्कस्मादित्यत्रप्रकृष्टप्रकाशश्चावच्छेदेनचंद्रपदवाच्यत्वविशेषण
संसर्गाज्ञानमस्त्येवगेहेकःदेवदत्तोवायज्ञदत्तोवेत्यादिष्वपिदेवदत्तत्वाद्यवच्छेदेनभूतलरूपविशेषणसं
सर्गस्याज्ञानमस्त्येव अप्रयोजकत्वंचयदुक्तंनचाप्रयोजकत्वंप्रनिर्णीतेहिब्रह्मपदार्थेवाक्येनतत्संसर्ग
स्यप्रमापयितुमशक्यत्वात्तन्निर्णयश्रवणमानांतरेणलौकिकत्वात्सत्यादिवाक्यादेवपदार्थभूतत्तत्प्रतिप
त्तौतेनैवपुनस्संसर्गप्रतिपादनस्यविरम्यव्यापारप्रसंगेनायोगात् तन्न वृद्धिशालीब्रह्मपदार्थइतिव्याकर
णादिनानिर्णीतत्वात्तत्संसर्गनिष्ठंवाक्यमितिचेन्न तावताब्रह्मत्वमात्रंपदार्थइतिसिध्यत्तिनैतावतीतत्प्र
तीतिःपर्यवसन्नाबृहत्वस्यलोकेबहुविधस्योपलंभात्तत्तद्विशेषाकांक्षणात्तत्रान्वयप्रतियोगितावच्छेदक
विशिष्टतयाउपलंभेसत्येवपदानामन्वयबोधकत्वेनब्रह्मणोजीवादिव्यावृत्तरूपेणप्रतीतौतत्संसर्गबो
धनायोगादितितन्नविशिष्टकृत्यसिद्धौविशेष्यस्वरूपलक्षणयाग्रसंभवात्किंचव्याकरणेनप्र
वृत्तिनिमित्तनिष्कर्षःकुतोनस्यात् किंचबृहत्वविशेषानिर्धारणेपिब्रह्मविदाप्नोतीत्युक्तब्रह्मशब्दार्थः
कइत्यपेक्षायांसत्यज्ञानानंतत्वविशिष्टंब्रह्मशब्दार्थइत्यवगमेकोविरोधः युक्तंचैतत् ब्रह्मशब्दस्यप्र
वृत्तिनिमित्तस्यबृहत्वविशेषस्याप्रतीतावपित्वदुक्तासंकोचन्यायेनबृहत्तमात्रमतिप्रसक्तमितिबुद्धिसहकृतेन /अनुटी२

मेव किंत्वेकपदार्थैकदेशस्यैकेनैव पदेन सिद्धेः पदांतरवैयर्थ्यं आकांक्षाभावादाकांक्षानुपपत्तिश्च न चान्वया
ननुभावकत्वघटिताकांक्षालक्षणे त्वयपदेन तात्पर्यगोचरत्वमेव विवक्षितमिति वाच्यं स्वरूपस्यैव वाक्य
वे०वि० तात्पर्यविषयत्वेन बोधनस्य एकस्मादपि पदात् संभवेन पदांतरानपेक्षत्वात् अननुभवस्य पदांतरव्यति
८४ रेकप्रयुक्तत्वासिद्धेः न च पदत्वेन स्मृतिहेतुत्वादेकं पदं स्मारकमेव नानुभावकमिति वाच्यं अनेकपदस्या
पि स्व स्वार्थस्मारकमात्रत्वात् यथा गौरश्व इत्यादिषु न चाकांक्षादिसामग्रीसत्वे तदनुभावकमिति वाच्यं ए
कपदस्यापि सामग्रीसत्वेन प्राप्त्यापत्तेः न च तत्राकांक्षाभावात् सामग्र्येव नेति वाच्यं संसर्गपरत्वाभावे आकां
85 क्षाया एवानपेक्ष्यत्वात् अत एव पदसमभ्याधिकाभावादित्येतदप्युपपन्नं संसर्गस्यैव वाक्यार्थत्वेन तत्सप्र
तियोगिद्वयसापेक्षस्यैकमात्रप्रतियोग्युपस्थापकेनैकेन पदेनानुभावयितुमशक्यत्वात् लक्षणायां
च न पदांतरापेक्षा तात्पर्यानुपपत्तेरेव लक्षणाबीजत्वात् एकैकस्मादेव पदात् लक्षणासंभवात् किंचानुभवा
र्थं पदांतरापेक्षायामव्युत्पन्नपदसमभिव्याहृतादपि पदात् स्वरूपानुभवप्रसंगः न चाव्युत्पन्नपदापेक्षेति वा
च्यं पर्यायपदाद्युत्पन्नादनुभवप्रसंगात् न च व्युत्पन्नभिन्नप्रवृत्तिनिमित्तकपदापेक्षेति वाच्यं तादृशप
दांतरार्थप्रतीतिर्हि स्वरूपप्रतीतौ न कथंचिदप्युपयुज्यते किंच सत्यं ब्रह्मेत्येतावतोपपत्तौ पदांतरवैय्य राम
र्थ्यं न च ज्ञानादिभेदसंशयनिरासार्थं ज्ञानादिपदमिति वाच्यं ज्ञानाद्यात्मकस्वरूपावधारणस्य जातत्वे ८४

वाक्यात्ब्रह्मपदार्थनिर्णयेपि न कश्चिद्विरोधः यन्मदुक्तं कल्पितजगत्कारणत्वविशिष्टे श्रुतेस्तात्पर्येण संभवती
ति तच्च उक्तरीत्या मिथ्याभूतजगत्कारणत्वपरत्वे बाधकाभावात् किंच विशिष्टपरत्वेन तदभिमताद्यस्सर्वज्ञः इ
त्यादिवाक्यात् बृहत्वात् बृंहणत्वाच्चेत्यादिनिर्वचनादेव वा ब्रह्मपदार्थनिर्णयसंभवात् न कोपि दोषः यच्चैतस्मा
त्तिरिक्तेऽपुरुषार्थे श्रुतितात्पर्यायोगात् स्वरूपमात्रपरत्वमिति तन्न पुरुषार्थसाधनत्वस्यैव श्रुतेर्वाच्यत्वात् तत
स्य च ब्रह्मज्ञानोपादानमुखेन संभवात् स्वयमपुरुषार्थस्यापि ज्ञानतया पुरुषार्थसाधनस्य वस्तुनः प्रतिपाद
नेन पुरुषार्थपरत्वसंभवाच्च न च ब्रह्मविदाप्नोति परमिति ब्रह्मस्वरूपज्ञानस्यैव मोक्षसाधनत्वावगमा
त्तदतिरिक्तस्य ज्ञानस्य मोक्षसाधनत्वमिति वाच्यं बृहत्त्वविशिष्टज्ञानस्यैव तथात्वावगमात् अथोऽन्येतमेवं
विद्वानिति विशिष्टज्ञानस्य मोक्षहेतुत्वोक्तिविरोधात्॥ ॥इति कृत्स्नतर्कपराहतिः॥ भिन्नपदार्थसंसर्गबोधकं हि
वाक्यं स्वरूपमात्रपरत्वे तद्भङ्गः न च वाक्यस्य संसर्गबोधकत्वनियमासिद्धिस्तथा सति ज्योतिष्टोमादिवाक्या
नामपि संसर्गबोधकत्वाभावापत्तेः समानाधिकरणवाक्यमपि अभेदबोधकमिति सार्वजनीनं किंच
वाक्यार्थमात्रस्य लक्ष्यत्वपक्षेऽवच्छेदकतया पदार्थानामस्य वयैवोक्तत्वात् इत्यपि सत्यज्ञानाद्यभेदरू
पवाक्यार्थे पदार्थानामवच्छेदकतयाभाने स्यात् अभेदेन संसर्गो नापि वाक्यार्थ इत्युक्तावपि एकस्मि
न्विशेष्ये प्रकारद्वयवैशिष्ट्यबोधनमेव समानाधिकरणवाक्यकृत्यमिति स्वरूपमात्रपरत्वमसंगतं।

पिकल्पितज्ञानत्वादिविशिष्टवाचिनो ज्ञानादिपदस्य विशेष्यलक्षकत्वसंभवान्न ज्ञानाद्यात्मकस्वरूपसिद्धिर
पि युक्ता ॥ ॥ उक्तं तत्त्वमस्यादिवाक्यमखण्डार्थं परस्परनिरूपितकार्यकारणभावानधिकरणद्रव्यगोचर
समानाधिकरणवाक्यत्वात् सोयं देवदत्त इति वाक्यवत् द्रव्यत्वरूपाद्यन्यतमविवक्षितं मतद्वयसाधारणं त
त्वरूपादिगोचरे नीलमुत्पलमिति समानाधिकरणवाक्ये व्यभिचारवारणाय प्रमेयं द्रव्यमित्यत्र व्यभिचारवा
रणाय कार्यकारणभावानधिकरणेति दण्डी पुरुष इति प्रयोगे च न द्रव्यवाचकयोर्दण्डपुरुषयोः सामाना
धिकरण्यमिति न व्यभिचारः अन्यथा दण्डः पुरुष इति स्यात् इति प्रत्ययस्तु संबंधविशिष्टमाह तद्वद्दण्डि
ज्ञानमित्यपि प्रयोगस्यमुख्यार्थत्वात् द्रव्यमात्रसंबंधप्रवृत्तिनिमित्तं हि द्रव्यगोचरमिति इति प्रत्ययार्थसंब
धस्तु रूपादिसाधारणः सोयमित्यत्र तत्पदार्थस्तु नानेति न दृष्टान्ते असिद्धिः न चैवमपि द्रव्यं घट इति प्रयोगे।
जातिद्वयसामानाधिकरण्यनिष्ठे व्यभिचारः तदुभयार्थस्य द्रव्यस्यैकत्वेन कार्यकारणद्रव्यगोचरसमानाधिक
रणवाक्यत्वस्य सत्त्वात् न च यथा मद्रव्यं इति बुद्धिर्घटस्यमत्वाश्रयतादात्म्यविषयत्वं यान्यथासिद्धेति न घट
स्यमद्भेदः एवं द्रव्यं घट इति धीरपीति न घटो द्रव्यत्वाश्रय इति पदार्थयोः परस्परनिरूपितकार्यकार
णभावराहित्याभावात् व्यभिचार इति वाच्यं तत्कारणस्यैव तस्यापि द्रव्यत्वस्य व्यवस्थापकगुणवत्त्वादेस्स राम
त्वेन तदाश्रयत्वादिति चेतस्मत्वं घटो द्रव्यं तद्भावानमपि द्रव्यमेवेति न पदार्थयोः कार्यकारणभावरा। ८५

वे०वि०
८५
86

ननत्वसंज्ञापासंभवात् किंचानंतपदस्य भेदमात्रनिषेधकत्वेन ज्ञानभेदस्यापि निषेधात् ज्ञानाद्यात्मत्वस्य तत्र एव सिद्धिः यो
ऽपि ताप्यखंडार्थत्वेनुपपन्ना न च तात्पर्यविषयार्थाबाधो योग्यता वंद्व स्वरूपस्य वधिर्या बाधितत्वेन प्रकृष्टादिवा
क्यस्यायोग्यत्वप्रसंगात् कचिदबाधस्त्वयोग्यस्याप्यस्ति से च न संसर्गस्य जलेबाधाभावात् किं च वाक्यार्थस्यैकत्वे
उद्देश्यविधेयभावोनुपपन्नः ज्ञानाज्ञानयोरेकत्रायोगात् यत्तु यच्छिद्रं न न खपिति वत् यत्सद्ज्ञानमानंदमनंत
ब्रह्मेति भेदभ्रमादेव उद्देश्यविधेयभावोपपादकप्रसिद्धउपसिध्युपपत्तिरिति तन्न तत्र खंडेव न नाभिधत्त इति स्व
रूपभेदाभावनिश्चयेपि खंछिद्रं न भवतीति जायमानो भ्रमः छिद्रज्ञानवाच्यत्वावच्छिन्नभेदविषय एवं एवं बाध्यः
स च वाच्यत्वविशिष्टाभेदोपदेशादेव निवर्तते प्रकृतेपि ज्ञानं न स्वरूपात् भिन्नमिति निश्चयेपि आनंदभिन्नं न वे
त्यादिभ्रमः आनंदत्वाद्यवच्छिन्नभेदविषय इति आनंदत्वादिविशिष्टाभेदोपदेशादेव निवर्तते किं च सत्यादि
वाक्यस्य सर्वपदानां लक्षकत्वे ब्रह्मणो भेदेकप्रमं नंतशब्दविरोध उद्भाव्येत न च लाक्षणिकमप्यनंतप
दं भेदेन विरुध्यते कथं वा ब्रह्मणः सत्यज्ञानाद्यात्मत्वे इयं श्रुतिरुपपन्ना स्यात् न हि सत्यादिपदलक्ष्यस्य सत्या
द्यात्मत्वं गंगादिपदलक्ष्यस्य गंगात्वाभावात् यदि आकं विशिष्टवाचिना सत्यादिपदेन वाच्यैकदेशस्यैव चेत
न्यस्वरूपस्य घटोऽनित्य इत्यत्र घटस्येव लक्ष्यत्वादिति तन्न विशिष्टैकदेशलक्षणायामपि ज्ञातत्वानंदत्वा
दीनामिवानंतत्वरूपविशेषणस्यापि कल्पितत्वोपपत्या ब्रह्मणि सत्यभेदाविरोधित्वात् अनंतानाद्यात्मके

तस्मिन्नेव व्यभिचारः किंच यत्रैवमेकपदविशेषणस्य पदांतरार्थान्वयेपत्ताभावो विवक्ष्यते तत्र हि तत्र स्य पदां
तरार्थविशेषणत्वात् साधनवैकल्यं साध्यवैकल्यं च पदद्वयोक्तं किं सोयमिति पदद्वयं तत्तेदंते एकवृत्ती इति
बोधयति ३ तत्सोयमित्येव प्रतीत्याकारः वाक्यतात्पर्यविषयीभवति इति नाद्यः तदिदं ज्ञानविषयो तत्तेदंताविशिष्ट
ज्ञातकत्वेन ३ तत्स्वरूपतद्विशेष्यकबोधस्यासंभवात् अप्रयाभेदवाचिपदाभावेन एकत्वरूपाभेदस्य वाक्या
दन्येनानुपस्थितेः ननु वाक्यमेवाप्रयाभेदं प्रतिपादयतु तत्तेदंतयोस्तात्विकतामपि बोधयतीति चेन्न विरम्य व्यापा
रप्रसंगात् तत्तेदंताश्रयस्याभिन्नयोरेव सिद्धत्वात् न चैव देवदत्तवत्तित्वमेव बोधयतीति वाच्यं देवदत्तद्वयाप्र
तिबोधितदुपपत्तेर्वाक्यात् भेदभ्रमातिरिक्तिप्रसंगात् वृत्तिपदाभावाच्च द्वितीये पदितात्पर्यकल्पनं लाघवेन विशेष
णीभूताभेदस्य एव तदस्तु अपि च समानाधिकरणवाक्यतया भेद एव तात्पर्यं तत्र च विशिष्टाभेदो विशेषणा
योरप्यन्वयो वाच्यः पदार्थैकदेशे त्वन्वयाभ्युपगतेः विशेषणयोरभेदाभावे तत्तदवच्छेदकतया नीलगुणोत्पलत्वा
योरिवान्वयो वाच्यः अवच्छेदकत्वं चावच्छेद्यान्यूनकालीनत्वमेव ज्ञोक्तादेरप्रियावद्दृष्टभाविते न गोपिंडाव
च्छेदकत्वान्न तत्राव्याप्तिः ननु पद्धतयाज्ञानत एव यद्वत्वयधीत्वत्वं उपलक्षणस्याप्यवच्छेदकत्वेन विशेषणा
त्वप्रसंगात् न हि काकवत्तयाज्ञानं विना काकवद्देवदत्तगृहमिति धीर्भवति न वा तत्संशयादिनिवृत्तिः त
त्रावच्छेदकत्वं न तत्तेदंतयोरस्ति तयोरभेदान्न्यूनकालीनत्वाभावात् अनीलव्यावृत्तापायाभेदमात्रं वाक्या

वै॰ वि॰ ८६

87

राम ८६

हित्वं न च वाक्यार्थप्रतीति विषयपदार्थयोर्न कार्यत्वादिकमिति वाच्यं तस्य हेतुत्वेनाविवक्षितत्वात् नित्यपरमाणोरप्रा
माणिकत्वेन तज्ञो चरवाक्येन व्यभिचारः औपाधिकभेदवत्पदार्थकसमानाधिकरणवाक्यत्वात्
तिवाक्यवदिति वा प्रयोगः परस्परनिरूपिताधाराधेयत्वानभिमतपदार्थसमानाधिकरणवाक्यत्वात् सोयं
देवदत्त इति वाक्यवदिति वा न चरत्वं तस्य साधवैकल्यं सोपमितिपदद्वयलक्षितदेवदत्तैक्यस्य तेन प्रतिपादना
त् इति तत्र प्रथमहेतौ अयं घट इति वाक्ये व्यभिचारः तत्र वादिद्वंत्वस्यापि नानात्वात् नास्तिकत्तिलो देशः शार्करिलो
देशास्सिकताश्रयं देश इत्यत्र व्यभिचार इति तत्र देशो लुविलजाति देशो प्रत्यपत्य नियतत्वात् एवं तारकिता
दयो द्रष्टव्याः द्वितीयहेतुरप्ययुक्तः कुंभत्वं परिच्छिन्नमित्यत्र व्यभिचारात् कुंभत्वस्य कुत्तभिदोपाधिकभेद
वत्त्वात् न च पदार्थतावच्छेदकावच्छेदेन च परस्परार्थनिरूपितोपाधिकभेदवत्त्वं विवक्षितं अतः कुंभत्वं परि
च्छिन्नमित्यत्र न व्यभिचारः नापि मठाकाशं घटाकाशमाश्रय इत्यत्राद्याश्रयपदार्थतावच्छेदकस्य मठाकाशे
विसत्वादिति वाच्यं सूर्यः सूर्यकभेदभ्रमदशायामेव जलसूर्यः करसहस्रशालीति वाक्ये व्यभिचारात् किं
च यावद्धर्मनोपाधिकव्यक्तिभेदं शीकारात् तव समानाधिकरणवाक्यमात्रे हेतुसत्त्वाद्व्यभिचारः प्रवृत्तिनिमि
त्तधर्मभेदात् औपाधिकभेदवद्विशेषणत्वेप्यर्थं च प्रसिद्धि जीवब्रह्मभेदस्य स्वाभाविकत्वात् तृतीयहे
तुरप्ययुक्तः दंडी देवदत्त इत्यत्र व्यभिचारात् न तन्नु दंडदेवदत्तयोराधाराधेयभावोस्तीति चेत् तर्हि भांतो दीरिते

वे०वि०
८१

सर्गत्पूर्नकालीनत्वात् किंच विशिष्टभेदावच्छेदकत्वरूपान्वयः प्रतिपाद्यत इति विवक्षितं उत वस्तुतोस्तीति नाद्यः पदार्थ
स्य वाक्यार्थेनान्वयानुपपत्तेः किं च एकपदार्थस्य सर्वस्य इतरपदार्थेन एकरूपान्वयस्तत्त्वापि नास्ति विशेषणयोरभे
देनान्वेनेयात् न द्वितीयः कथंचिदन्वयमात्रं तु अस्मन्मते एव सुवचं विशेषणयोः सामानाधिकरण्येन विशेष्ययोरप्य
भेदेनान्वयात् न तु विशेषणयोर्न कथंचिदप्यन्वयसिद्धिः अभेदावच्छेदकत्वेनाभेदमात्रान्वयसिद्धेः अभेदप
दार्थतावच्छेदकयोरवच्छेद्यावच्छेदकभावप्रतीतेः अभेदस्य प्रकारत्वविशेष्यत्वान्यतरप्रसंगाच्च अवच्छेद्यावच्छे
दकभावसंसर्गप्रतियोगिभूताभेदस्य वाक्यबोध्यत्वायाविरम्य व्यापारप्रसंगाच्च न द्वितीयः नीलावलाकेति भे
दोक्तो नीलत्वस्यावच्छेदकत्वासिद्धेः किं च विशेष्ययोरभेदे भासमाने विशेषणयोरभेदभानाभावे पितृदवच्छे
दकतयान्वयो वा अद्दृष्टस्य विशेष्ययोरभेदे भासमाने तदभेदान्यूनकालीनधर्मस्यैव भानं तन्न्यूनकालस्येति
कल्पितार्थः अयं च नियमो निर्निबंधनः यदपीदमुक्तं विशिष्टं विशेष्यादन्यदेवान्यथा देवदत्त अयमिदानीं दंडीनभ
वतीति प्रतीतिविरोधात् न च सा दंडाभावविषयैव तदसोमाभावस्यतद्विषयत्वे तद्विशिष्टकाले पि तद्धीप्रसंगात् अत्यं
ताभावस्य च भेदस्य अविषयत्वात् कदाचिद्दंडसंबंधाश्रयेतदसंताभावयोगाच्च कालभेदेन कस्मिन्न प्यविरोधइ
ति चेत् न याप्याश्रयभेदाभावेन तद्योगात् अन्यथा आश्रयस्वरूपस्यैवाभावसंबंधत्वात् प्रतियोगिकालेप्यभाव राम
प्रसंगात् तदुद्दाम्युपगमे चागतं विशिष्टस्यान्यत्वं एवं दंडी नास्तीति प्रतीयमानो भावो यदि देवदत्तप्रतियोगिकस्तर्हि ८१

88

र्थ इत्यखंडार्थता अभेदस्य न संसर्गः इत्युक्तं पदार्थानधिकविषयत्वेपि वाक्यस्य वर्णितरीत्या न तत्तत्तानिश्चयस्या
धीभेदभ्रमनिवृत्तिश्चोपपद्यते भेदोपाधिपरामर्शपूर्वकभ्रमभेदानधिगते तत्तत्संज्ञायानिवृत्तेः नचैवं दंड्यं
नासीदित्यादावपि विशिष्टाभेदेन स्यादिति वाच्यं इष्टापत्तेरिति तन्नाभेदमात्रस्याबुभुत्सितत्वेन तत्तेदंताश्रयाभे
देनान्वयपर्यवसानेन तत्तेदंतयोरुपलक्षणत्वमिति वाच्यं वस्तुतोपसत्तेदंताश्रयवस्तुन्यभेदमात्रस्य प्रागेव निश्चितत्वस्या
जिज्ञासितस्य तात्पर्याविषयत्वात् पदार्थैकदेशेन्वयाव्युत्पत्तिरित्यप्यनुपपन्नं तत्रैवान्वयव्युत्पत्तेः सर्वस्यापि वाक्य
ध्व६ स्य एकपदप्रतिपन्नविशेष्य परपदप्रतिपन्नविशेष्यसंसर्गबोधकत्वनियमात् अन्यथा समानाधिकरणं
व्यधिकरणं च रूपमेव वाक्यं लक्षकं स्यात् यदुक्तं विशेषणयोरभेदाभावे तदवच्छेदकतयान्वयो वाच्य
इति तत्र यद्यवच्छेदकतयान्वयो विशिष्टप्रतीतौ प्रकारतया भानं तदस्त्येव तदन्यस्य चनावारकं किंचित् य
दुक्तमवच्छेद्यान्यूनकालीनस्यैवावच्छेदकत्वमिति तदपि न दंडी पुरुष इत्यत्र दंडस्यानन्वयप्रसंगात् किंच
किं प्रमाणमात्रेप्यावर्तकानां यदुक्तावच्छेदकतयान्वयस्वभावादेवं कल्प्यते उत अधिकरणवाक्यस्वाभा
व्यात् समानाधिकरणवाक्यस्वाभाव्याद्वा नाद्यः प्रत्यक्षादिषु न्यूनकालीनस्यैव विशेष्यप्रतीतेः न द्वितीयः
दंडाभाव इत्यादावभावसंबंधन्यूनकालत्वाद्दंडस्य न तृतीयः दंडी भोक्ता इत्यादौ दंडादेर्वाक्यार्थभोजनसं

विरोधांगीकारे हि न राजाज्ञानिबंधनः अपितु प्रमाणनिबंधनः तच्च प्रमाणं भावाभावयोर्विरोध इव तयोर्देशका
लभेदेनाविरोधेऽपि तुल्यं प्रमाणान्तिलघने च देशकालभेदेऽपि तयोः सिद्धिर्न स्यात् प्रतियोग्याश्रये अभावासंभवे
वे० वि० च कालत्वलक्षणोपाधिभेदादौपाधिकभेदांगीकारेऽपि कदाचित् प्रतियोग्याश्रये तस्मिन् कथमभावः स्यात् न ह्यौ
८८ पाधिकभेदांगीकारमात्रेण कादाचित्कं प्रतियोग्याश्रयत्वमपि गच्छति किं च स्वाभाविकभेदस्यैवान्यत्र भावा
भावाधिकरणयोर्दर्शनादौपाधिकभेदांगीकारेऽप्यभावो न स्यात् लाघवेन भेदमात्रस्यैवाविरोधप्रयोजकत्वे
च दंडसंसर्गदशायामेव कुंडलविशिष्टभेदस्य सत्वाद् दंडाभावः स्यादेव यथाप्रमाणं कालोपाधिकभेदस्यैवाविरो
89 धहेतुत्वांगीकारश्च लाघवेन कालभेदस्यैव तत्प्रयोजकत्वकल्पनं युक्तं यदुक्तं आश्रयस्वरूपस्य संबंधत्वात् प्र
तियोगिकालेऽभावप्रसंग इति तन्न यथाप्रमाणं कालविशेषस्यैव तत्संबंधत्वात् अन्यथातिव्याप्तेः न ह्यौ
पाधिकभेदांगीकारमात्रेणाश्रयस्वरूपमभावमनुगच्छति येन प्रतियोगिदशायां संबंधो न स्यात् न च देवदत्तव
ति दंडी नास्तीति प्रत्ययो विशिष्टभेदसाधकः देशकालभेदवत् प्रतियोगिनि प्रतियोगितावच्छेदकाभावस्य भा।
वाभावाविरोधहेतुत्वात् तथा च प्रतियोगिनः प्रतियोगितावच्छेदकसंबंधकाले प्रतियोग्यभावयोरेकाधिक
रणाभावनियमो विरोधः किं च तत्वमसिवाक्यस्यैकप्रातिपदिकार्थमात्रपर्यवसाने पदार्थशोधकवाक्या राम
भ्यामेव तदर्थस्य सिद्धत्वान्महावाक्यवैयर्थ्यं ननु महावाक्यं विना न जीवब्रह्मणोरभेदबोधस्तं विना च न। ८८

कथंतद्वतितदभावःस्यात्अत्यंताभावप्रतियोगिनोरेकदैकत्राविरोधात्नन्वेवंतदातत्प्रतियोगितावछेदकावछिन्नोना
स्तीतिवाच्यंअभावस्यप्रतियोगिना सहैवविरोधात्विशिष्टस्यविशिष्टानन्यत्वपक्षेत्वदुक्तमवस्थायोगात्तत्
स्माद्विशिष्टयोर्भेदात्नतयोरैक्यप्रतिपादनेसंभवतिअत्तोदंडयंधूमवान्वह्निमान्इत्यभेदप्रतिपादनेसंभव
तितत्त्वमसिसोयमित्यत्रतुनसंभवतिविशेषणयोरभेदावछेदकतयाधूमाग्न्योरिवान्वयासंभवात्तस्माल्ल
क्षणयावाक्यमखंडार्थमितितन्नविशिष्टस्यविशेष्यादनतिरिक्तत्वासिद्धेःतथासतिदंडसंसर्गदशायामपिनायंदंडी
तिप्रत्ययप्रसंगात्विशिष्टयोरपिभेदांगीकारात्दंडकुंडलसंसर्गदशायांदंडीकुंडलीनेत्यपिप्रयोगप्रसंगा
त्समानाभावाच्चनविशिष्टभेदःत्वदुक्तानुभवस्यकालविशेषावछिन्नविषयत्वात्विशेषणात्यंताभावस्य
कादाचित्कंसंबंधंसाधयेत्ननुविशिष्टभेदंकालविशेषावछिन्नविषयत्वादेवनहिविशिष्टस्यविशेष्य
भेदःकादाचित्कःअत्यंताभावस्यचभेदबुद्धिविषयत्वेनकिंचिनबाधकंघटात्यंताभावाभावप्रतीतेर्लाघ
वानतिप्रसंगाभ्यांघटविषयत्वकल्पनवदिहापितन्नएवात्यंताभावविषयत्वकल्पनात्अत्यंताभावस्य
प्रतियोगिसमानदेशत्वंकालभेदेनोपपद्यतएवान्यथाप्रतियोगिकालेप्यभावस्यविरोधात्देशांतरेप्य
भावोनस्यात्देशभेदस्याविरोधहेतुत्वेयथाप्रमाणंकालभेदःकथंनविरोधपरिहारकःभावाभावयो

न्वेवं तत्त्वावेदकतानस्यादिति चेत्तर्हि किमात्मेति स्वरूपमात्रबुभुत्सायां प्रवृत्तानां वाक्यागमानामपि तद्वीत्यात्म
स्वरूपमात्रपरत्वात् तत्त्वावेदकत्वप्रसंगः तत्प्रवेद्यानां तत्त्वावेदकत्वमितरेषामिति व्यवस्थानस्यात् नेवं
तेभ्योऽज्ञत्वपरिछिन्नत्वभेदादिसंशयनिवृत्तेरन्ये त्वदभिवृत्तेर्व्यवस्थिति चेत्तर्हि सखंडार्थत्वेपि तत्त्वावेद
वे॰वि॰ ८७ कत्वविरोधः वस्तुतस्तु सखंडार्थत्व एवउक्ततत्त्वादेकत्वसंभवः स्वरूपमात्रावधारणस्य वाक्यागमेऽज्ञा
तत्वेपि सत्यत्वानित्यत्वभेदसंशयाद्यनिवृत्तेः यत्तोक्तमखंडार्थत्वाभावे वाक्यं निर्विषयं स्यादिति तन्न समाना
धिकरणवाक्यस्य विशिष्टाभेदविषयत्वात् दंडी घटकारणं धूमवान्वह्निमानित्यादौ त्वदुक्ततादात्म्यादे
रभावात् तथापि तस्य विशिष्टाभेदविषयकत्वकल्पनाच्च सच्चाभेदस्संसर्गस्तदन्यो वेत्यन्यदेतत् इति प्रथम
त्रानिष्कर्षः अधिकरणवाक्यानां समानाधिकरणे प्रविष्टः नीलमुत्पलं दंडी पुरुष इत्यादीनां च यथा प्र
माणं सखंडविषयत्वमंगीकृत्यापि सत्यादिवाक्ये तत्त्वमस्यादिवाक्ये चाखंडार्थत्वमंगीकृत्य तत्साधनाय प्रकृ
ष्टप्रकाशवाक्ये सोयं देवदत्तवाक्ये वाखंडार्थत्वं साधयतः कोभावः किं मीपनिबद्धस्य प्रधानार्थस्य सत्यादिवा
क्याखंडार्थत्वं विना दुरूपपादत्वात् अखंडार्थत्वसाधकाभावे पिकाशंकुशंतावत्तव्यापि प्रयोजनगौरवा
त्प्रमाणविरुद्धमप्यखंडार्थत्वं साधनीयमित्यभिप्रायः अथ यावस्तु न स्याद्दृष्टत्वा तत्तत्पांगीकार्यमिति वा राम
द्यः साधकाभावेन स्वात्मानमलभमानमर्थमुपजीवतः प्रयोजनस्यैव परित्याज्यत्वात् किं च तत्र योः ८९

बंधनिवृत्तिरिति चेन्न स्वरूपातिरिक्ताभेदासिद्धेः अभेदबोधाभावेपि सत्यादिवाक्यजन्यब्रह्मस्वरूपाधिष्ठा
नतत्त्वसाक्षात्कारेण विद्यानिवृत्त्या बंधनिवृत्तेः महावाक्यं विना भ्रमसंशयनिवृत्तिर्न जायत इति चेन्न अभेदा
वधारणे सति तद्योगात् स्वरूपस्यावधारितत्वेन तदभिन्नस्यानवधारणसंभवात् स्वरूपस्य पदार्थशोधकवा
क्यैर्नैवावधारणात् ननु तत्त्वमस्यादिवाक्यार्थज्ञानं मोक्षसाधनमिति सामग्रीविशेषाधीनज्ञानस्य मोक्ष
साधनत्वावगमात् महावाक्यवैयर्थ्यमिति चेत् अंतर्मुखसाधुसमर्थितं प्रपंचमिथ्यात्वं प्रपंचस्य सामग्रीविशे
षजन्यज्ञाननिवर्त्यत्वे सत्यत्वाविरोधात् ज्ञानस्य निवर्तकतया विरोधिविषयत्वनिबंधनत्वेहि मिथ्यात्वसिद्धिः
अप्रयोजकत्वं च न चैकधैवानुद्रष्टव्यमिति श्रुतिविरोधः किमनया श्रुत्या अभेदेन ज्ञानं विधीयते उत स्वरूप
मात्रज्ञानं नाद्यः नीलोत्पलादाविव सखंडार्थ्याविरोधात् न द्वितीयः संख्यायाविधार्थैवेति धाव? त्वयस्य विधा
यी विधानात् विधायकस्य धर्मपरत्वात् न च ब्रह्मणि द्रष्टव्यप्रकारस्यापि विवक्षितत्वात् द्वैतमते विरोध इति वाच्यं
नेह नानास्ति किंचनेति प्रकृतस्य प्रपंचस्य परमात्मशरीरत्वेन द्रष्टव्यत्वं न तु स्वतंत्रतयेत्येवंपरत्वात् अन्यथा
ब्रह्मैव द्रष्टव्यमित्येतावता सिद्धौ एकधेत्यस्य वैयर्थ्यात् जीवब्रह्मत्वविशिष्टाभेदज्ञानस्यैव भ्रमसंशया
दिनिवर्तकत्वात् तस्यैव तन्मूलाज्ञाननिवर्तकत्वात् जीवब्रह्मस्वरूपेणात्यंतिकभेदेपि स्वाभाविकभेद
स्यासंभवात् तथा अभेदज्ञानासंभवः पुनश्चेत् तत्स्वरूपज्ञानमात्रस्य पदार्थस्वरूपशोधकैर्नैव जातत्वात् न

त्वमपि गौरवात् । न्यायाहि चंद्र इत्येवोत्तरं स्यात्प्रकृष्टप्रकाशपदं न प्रयुज्येत यदि चंद्रपदमात्रान्न स्वरूपा-
वधारणोपपत्तिः किं तु प्रकृष्टप्रकाशसमभिव्याहारादेवेत्युच्येत तर्ह्यनुमन्नप्रकृष्टादिपदस्यापि प्रकृष्ट-
वे॰वि॰ प्रकाशवाक्यार्थस्वरूपावधारणप्रसंगः यदि व्युत्पत्तिरपि कारणमवधारणे न हि प्रकृष्टस्य प्रकाश इत्य-
९० र्थभ्रमेऽपि अवधारणप्रसंगः पदावधारणे बहुव्रीह्यर्थप्रतीतिरपेक्षितेत्युच्येत तदा प्रकृष्टप्रकाशचंद्रपद-
योर्भिन्नविषयत्वभ्रमेऽप्यवधारणप्रसंगः यदि पदद्वयस्याप्येकार्थगोचरत्वज्ञानमपेक्षितमित्युच्येत तर्हि
प्रकृष्टप्रकाशपदसमभिव्याहारव्युत्पत्तिबहुव्रीहिपदद्वयैकार्थनिष्ठत्वज्ञानानामपेक्षितत्वे प्रकृष्टप्रकाश-
त्वचंद्रत्वोभयप्रकारकैकविशेष्यकज्ञानेनैवावधारणमिति पर्यवसानान्नाखंडार्थतासिद्धिः प्रकृष्टप्र-
काशचंद्रपदाभ्यां तत्तद्विशिष्टार्थोपस्थितौ सत्यामनंतरं तत्पदाभ्यां लक्षणया स्वरूपोपस्थितौ सत्यामे-
वावधारणमिति मनोरथमात्रत्वात् तन्मात्रप्रश्नोत्तरत्वं च पदद्वयस्य पदद्वयोरसिद्धमित्युक्तमेवं अत एव भूमा-
निद्योतिधांरूपाणि सम्यगवधृतानि प्रचंद्रः क इति चंद्रपदवाच्यत्वाभिप्रायेण पृच्छति प्रकृष्टप्रकाशश्चं-
द्र इत्युक्ते पुनस्सोमः क इति पृच्छति न च शब्दभेदादर्थभेदः कस्यापि रोचेत तद्भेदेऽपि उभयमनवधृतं वा स्यात्।
मवधारणानवधारणव्यवस्थातो नोपाधिकभेदमात्रेण तदनुपपादनात् किं चेदमत्र विवेचनीयं क- राम
श्चंद्र इति प्रष्टुश्चंद्रपदप्रयोगनिमित्तभूतं चंद्रपदतदर्थयोः संबंधज्ञानं कीदृशमिति तदुत्तरवाक्यगतचं- ८०

91

जनंन तावदद्वैतसिद्धिः अनेन वाक्येन विशिष्टार्थोपस्थापनेऽपि मिथ्यात्वश्रुत्यनुरोधेनाद्वैतसिद्धेरवैकल्यात्
ननु वाक्यजन्याधिष्ठानतत्त्वसाक्षात्कारस्याविद्यानिवर्तकत्वात् तस्य चातत्त्वविषयत्वे निवर्तकत्वासंभवात् स्व
रूपमात्रगोचरत्वस्यावश्यतया तज्जनकवाक्यस्यापि तथात्वं युक्तमिति चेन्न अधिष्ठानत्वेऽपि साक्षात्कारस्ये
वाविद्यानिवर्तकतया तन्मात्रगोचरत्वस्य गौरवेणाप्रयोजकत्वात् देवदत्तीयत्वभ्रमरूपेण शुक्तिज्ञानेन र
जतभ्रमनिवृत्तिदर्शनात् चरमसाक्षात्कारस्य तत्तदवच्छेदकवृत्तिविषयत्वावश्यंभावेन तत्त्वविषयत्वस्यावर्ज
नीयत्वाच्च एतेनाज्ञानकार्यगोचरावभासेन कथमज्ञाननिवृत्तिः तथा सति रजतज्ञानाच्छुक्तिज्ञाननिवृत्तिप्र
संगादिति निरस्तं वृत्तेरज्ञानकार्यत्वात् तदवभासेनाज्ञाननिरासाच्च किंच तदज्ञानकार्यगोचरज्ञानस्य हि तद
ज्ञाननिवर्तकत्वासंभवः न च सत्यत्वादिगोचरज्ञाननिवर्त्यं तज्ज्ञानकार्यगोचरं सत्यत्वादेर्मूलाज्ञानकार्यत्वात्
एवं तत्पदार्थप्रकारकारणत्वं त्वंपदार्थभूताहमर्थश्च न देवदत्तीयाज्ञानकार्यं न भेदगोचरत्वेन हि भेदभ्रम
हेतुत्वज्ञाननिवर्तकतोक्ता एवं च तदधिकविषयत्वेऽपि न काचित्क्षतिः वस्तुतस्तु यादृशरूपेणोपस्थिते भेद
ग्रहस्तद्रूपविशिष्टरूपेणोपस्थिताभेदग्रह एव भेदभ्रमनिवृत्तिसंभवः नाद्वितीयः स्पष्टं तेऽखंडार्थत्वासिद्धेः
तन्मात्रप्रश्नोत्तरत्वं तत्साधकमिति चेन्न तात्पर्योत्तरत्वेऽपि प्रष्टव्यविषयत्वे बाधकाभावात् उत्तरवाक्यस्यानि
जन १ ज्ञासितावधारणैकत्वमेव हि अज्ञानसंशयजिज्ञासानिवर्तकत्वे प्रयोजकं न त्वजिज्ञासितार्थागोचर

पदानांपदार्थैकदेशान्वयबोधकत्वमेवव्युत्पत्तिसिद्धंघटंवर्णयेत्यादौघटत्वस्यापिक्रियान्वयविवक्षायामपिन
दर्शनत्वस्यपदांतरार्थेनान्वयः अतत्त्वार्थैकदेशान्वयोस्त्ववएवंचपदद्वयेनापिस्वरूपलक्षणायायद्यभे
दोबोध्यतेतदाएकदेशान्वयासिद्धेर्व्युत्पत्तिभंगः किंचामिलितेनस्वरूपलक्षणायामपिलक्ष्यार्थस्यमुख्यार्थसं
वे०वि० ९२ बंधितयाप्रतीतिरस्तिनवानचेत्स्वरूपविशेषप्रतीतिनियमस्याकस्मिकता अस्तिचेत्तस्याः शाब्दत्वपरि
त्यागोनिर्निबंधनः तस्मान्निरंतरसंचितदुरितसंचयाखंडलक्षणांगीकारेनिमित्तमित्युपचितपुण्यामन
स्यंते कथंतर्हितत्त्वमसीतिसामानाधिकरण्यं अहोनुखलुविस्मयनीयमिदंचोद्यंयत् अखंडार्थता
भावस्यैवसामानाधिकरण्योपयोगित्वेपितस्यैवतदुपयोगित्वाभ्रायाएतहीत्या दोषः भिन्नप्रवृत्ति
92
निमित्तानांशब्दानामेकस्मिन्नर्थेवृत्तिर्हिसामानाधिकरण्यं अखंडलक्षणायांकथंतत्संभवः मुख्या
र्थबोधनदशायामेकार्थकत्वंचवर्तत इतिचेत्तत्रएकार्थबुद्धेःप्रवृत्तिनिमित्तद्वयविषयत्वस्यैवसामानाधि
करण्यप्रयोजकत्वात् अन्यथाविषंभुंक्ष्वेतिवाक्यस्यार्थवादानांचसामानाधिकरण्यप्रसंगात् नत्वेव
मपिसिद्धांतेकथंसामानाधिकरण्यंजीवब्रह्माभेदानंगीकारात् इतिचेदुच्यते अनुप्रविश्यव्याकरवा
णीति अनुप्रवेशस्यव्याकरणहेतुत्वंश्रुतंतच्चनामरूपयोः स्वयंपतित्वएवसिध्यतितत्रनाम्नः स्वय राम
पतित्वस्याभिधायकत्वेनयातदेवाग्निस्तद्वायुस्तत्सूर्यस्तदुचंद्रमाइत्यादिच श्रूयतेब्रह्मैववाचः ६१
भिन्नप्रवृत्तिनिमित्तकत्वलक्षणंदृश्यायां ५

द्रपदाज्जायमानंचंद्रपदार्थज्ञानंकीदृशमितिचेतन्नतावत्तद्व्यवहाराधीनचंद्रचंद्रपदप्रवृत्तिनिमित्तोभयप्रम
त्तमूलसंकेतग्रहनिमित्तंस्मरणंतथात्वानुत्पत्तिरिहेप्रसक्तिरेः ततश्चकुत्रचित्प्रवृत्तेतोमद्रुपदमर्थाभिधानत्वमभि
त्तिसंकेतग्रहमूलंस्मरणंतथाचचंद्रपदंप्रमर्थाभिधानत्वममितिपूर्वानुभवमूलज्ञानज्ञानस्मृतिरेवप्रमेयचंद्रपदप्र
योगनिमित्तंननुगामानयेत्यादाविवार्यव्यवहारेहेतुरनुत्पत्तिग्रहः ननु कथमिवस्वरूपविवक्षयाप्रयोगेचंद्रप
दप्रयोगः कथंचतेनस्वरूपप्रश्नः कथंचउत्तरवाक्यगतचंद्रशब्देनचंद्रपदमुत्पत्तिविधुरस्यचंद्रत्वप्रकारकोवा
स्वरूपमात्रगोचरोवाप्रत्ययः तस्मात्चंद्रपदवाच्यत्वगोचरत्वमेवप्रश्नोत्तरयोरुपपन्नंतत्रव्याख्यानविवक्षया
तत्पदप्रयोगश्चाभिधानकोशादिषुबहुलमुपलभ्यः यन्तुनत्वमस्यादिवाक्येकिंचिदुच्यतेऽनौपाधिकभेदनिरा
सेनस्वरूपाभेदबोधनएवावधारणसिद्धिरितितन्नऔपाधिकभेदाभावप्रतीतेर्निरासपदेनविवक्षायानात्र
तत्संभवः तद्बोधकपदाभावात् स्वरूपाभेदप्रतीतौऽनपेक्षितंचौपाधिकभेदाभावज्ञानंघटकलशौपाधिक
भेदज्ञानेसत्येवस्याकाशस्वरूपाभेदप्रत्ययदर्शनात् किंचयदुपाधिकमपि तभेदप्रत्ययस्तदुपाधिविशिष्टानु
वादेनाभेदोपदेशात्वयहिभेदस्यौपाधिकत्वमभेदस्यस्वाभाविकत्वंज्ञायतेऔपाधिकभेदप्रतीत्यभावोनिरास
शब्दार्थः ननु तत उपाधिप्रतीतौऔपाधिकभेदप्रतीतिप्रसंगात्उपाध्यगोचरत्वमभेदप्रतीतेर्वाच्यमित्यपि
नऔपाधिकभेदप्रतीतेः स्वरूपाभेदप्रतीत्यविरोधस्यौपाधिप्रतीतेस्तदुपयोगस्यचोक्तत्वात् किंच

के

दैवतैक्यं ४

प्रादुर्भ्युः साध्यमतेऽश्रुतिस्मृतिप्रतिपन्नजगदुपादानत्वभंगः गुणव्यतिरेकेण गुणान्निराकृत्यापि निर्गुणवादनिराकरणमिथ्या
द्योदोषाः प्रादुर्भ्युः भेदाभेदमतेतत्योर्विरोधाद्देवगर्भस्वाव: पूर्वोक्तदोषाश्च विशिष्टाद्वैतवादेनुभेदाभेदघटकश्रु
तिस्मृतीतिहासपुराणब्रह्मसूत्रादिसर्वप्रमाणस्वारस्यमिति॥ ॥देवतापारम्यविषयेवेदान्ताचार्यैरनुगृहीतं श्री
वे०वि० मैकैवत्रिकसमधिकत्वानुल्यतैक्यं त्रयाणामत्रैश्वर्यमित्याद्यनिपुणभणितीराद्रियंतेनसंतः अयंपतेरेककं
९२ दैस्तदनुगुणमनुष्यासमुखोक्तिमिश्रश्रीमन्नारायणोनः पतिरखिलतनुर्मुक्तिदोमुक्तभोग्य इतिश्रुति
पुराणभणितीरित्यनुगृह्णतामयंभावः स्वात्मैक्यं तावदनुपपन्नं यस्यात्माशरीरं नित्यो नित्यानांचेतनश्चेतना
नां स उत्तमः पुरुषः उत्तमः पुरुषस्त्वन्यः दासभूताः स्वतः सर्वे ह्यात्मनः परमात्मनः इत्याद्यनंतप्रमाणव्याको
पात् बद्धमुक्तव्यवस्थानुपपत्तेर्ब्रह्मणो नित्यमुक्तत्वश्रुतिविरोधात् पूर्वोक्तदोषप्रसंगाच्च देवतैक्यं चानुपपन्नं
नं दैवतानां परमं च दैवतं सत्त्वात्मकं गात्मत्यादेवताः नारायणस्यचांगानि सर्वदेवानि चाभवत् यो यो यां यां त
नुं भक्तः श्रद्धयार्चितुमिच्छति तस्यतस्याचलां श्रद्धां तामेव विदधाम्यहं सतया श्रद्धयायुक्तस्तस्याराधनमीहते॥
लभतेचततः कामान्मयैवविहितान्हितान् नतुमामभिजानंति तत्वेनातश्च्यवंतिते इत्यादिविरुद्धप्रमाणविरोधा राम
त्. परब्रह्मणस्त्रिमूर्त्यतिरेकः त्रयाणां तुल्यत्वात्तेषामेकं चतुर्मुखं शिवं वा पारम्यमिति पक्षाश्चानुपपन्नाः॥ ९२

परमंव्योमइतिचननास्मसर्ववचसांप्रतिष्ठायत्रशाश्वतीवचसांवाच्यमुतमंसर्वशब्दाभिधेयत्वंसर्वांतर्यामिकत्वतःननुस
र्वस्वरूपत्वात्सर्वभिन्नोयतोहरिः इत्यादिचस्मर्यते अतएवउत्तरत्रापनीयेनहीदंसर्वंनिरात्मकमितिसात्मकत्वमु
क्तंआत्मैवेदंसर्वमितिसामानिकरणेननिर्देशःकुतःशरीरवाचिशब्दानांशरीरिपर्यंतत्वंचदृपतेतन्याःए यद्|
सिद्धधर्मवाचिनांधर्मिपर्यंतत्वमपिप्रपंचस्पब्रह्मशरीरत्वंतदपृथक्सिद्धत्वंचश्रुत्यनुग्राहकंअतस्तस्मदंजगत्
कारणत्वयोगिब्रह्मपरंत्वंपदंजीवयोगिब्रह्मपरंअतस्सामानाधिकरण्पसामंजस्यमिति॥ ॥इत्यद्वैतविद्यावि
जयेअद्वैतखंडार्थत्वभंगः॥ ॥एवमद्वितीयेस्वाभाविकानवधिकातिशयासंख्येयकल्याणगुणगणौघमहार्णवेनिखि
लजगदुदयविभवलयलीलेभगवतिपुरुषोत्तमएवाद्वितीयश्रुतीनांतात्पर्यमितिसिद्धं अथमतान्तर्निष्कर्षः मायिमतेभे
दश्रुतीनांयस्यात्माशरीरमित्यादिजीवशरीरत्वजगदुपादानत्वप्रतिपादकश्रुतीनांनानात्वास्मृतीतिहासपुराणागम|
सूत्राणांब्रह्मणादीनांचाप्रामाण्यमद्वैतवाक्येपिपदार्थसंसर्गरूपवाक्यार्थानंगीकाराद्प्रामाण्यंवहुषुवदेषुलक्ष
णनिर्गुणश्रुतीनांश्रुतिस्मृतिभिरेवहेयगुणसत्वादिविषयत्वेनवगतेपिकल्याणगुणानामपिनिषेधकल्पनयाऽखि
लहेयप्रत्यनीकेपरस्मिन्ब्रह्मणिदुर्निर्वहाज्ञानाश्रयत्वतत्तिरोधानजन्ममरणविविधविचित्रयातनादिसक|
लहेयास्पदत्वकल्पनयाचनिरंतरसंचितानंतदुरितसंचितस्वकीयपरब्रह्मप्रद्वेषाविष्करणमत्याज्यंतदोषाः

इमाः प्रजाः प्रजायन्ते दिव्यो देव एको नारायणः एको ह वै नारायण आसीन्न ब्रह्मा नेशानः ब्रह्मविष्णुरुद्रेन्द्रास्ते स
र्वे संप्रसूयन्ते ललाटात्क्रोधजो रुद्रः अजायमानो बहुधा विजायते स उ श्रेयान्भवति जायमानः इच्छागृहीता
भिमतोरुदेहः नैव गर्भत्वमापेदे नयोन्यामवसत्प्रभुः समस्तचेष्टयरहितं तविष्णुस्वयंपरमंपदं अनुब्रह्मास्ते सम
वे॰वि॰ स्तास्तु देवाद्याः कर्मयोनयः प्रजापतिं च रुद्रं चाप्यहमेव सृजामि वै तौ च मां न विजानीते मम मायाविमोहि
९२ तौ ब्रह्माद्यास्सकला देवा मानुषाः पशवस्तथा विष्णुमायामहावर्तमोहांधतमसावृता इत्यादि बहुप्रमा
णविरोधात् त्रैयन्तैरेकं कण्ठैरित्यनेन तं त्वौपनिषदं पृच्छामीति त्वौपनिषदं पुरुषं विद्धि यमंधसारूपभो।
विष्णुरूपः सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति विष्णुर्नामा स वेदेषु वेदान्तेषु च गीयते।
ये च वेदविदो विप्रा ये चाध्यात्मविदो जनाः ते वदन्ति महात्मानं कृष्णं धर्मं सनातनं नारायणपरा वेदाः वा
सुदेवपरा वेदाः वेदैश्च सर्वैरहमेव वेद्य इत्याद्यर्थसंग्रहीतः नः पतिरखिलतनुरित्यनेन ईशानो भूत।
ऐश्वर्यं भव्यस्य इन्द्रो राजा जगतो य ईशे धाता दधातु नो रयिमीशानो जगतः पतिः धातुः प्रसादान्महिमानमीशं राम
यः परस्स महेश्वरः न तस्येशे कश्चन ईशः सर्वस्य जगतः प्रभुः प्रीणाति सर्वस्य प्रभुमीशानं सर्वस्येशानः ८३

नारायणपरंब्रह्मतत्वंनारायणःपरः पुरुषान्नपरंकिंचित्साकाष्ठासापरागतिः यस्मात्परंनापरमस्तिकिंचित्तस्मा
न्नःपरंनान्यदणीयसंहि नतस्येशोकश्चनपतिंविश्वस्यात्मेश्वरंनतत्समश्चाभ्यधिकश्चदृश्यतेनत्वत्समोस्त्यभ्यधिकः
कुतोन्यःमतः परतरंनान्यत्किंचिदस्तिधनंजयनवासुदेवात्परमस्तिदैवतं नदैवंकेशवात्परं विष्णुरेवपरंब्रह्म
त्रिभेदमिहपठ्यते नारायणःपरंब्रह्मपन्नगाशनवाहनः वासुदेवःपरंब्रह्मपरमात्मापरात्परः नारायणाभिधा
नस्यब्रह्मणःपरमात्मनः वदंतियत्तत्वविदस्तत्वंयज्ज्ञानमद्वयं ब्रह्मेतिपरमात्मेतिभगवानितिशब्द्यते वासुदे
वपरेतत्वेसब्रह्मासशिवः सब्रह्मासईशानःब्रह्माचनारायणः शिवश्चनारायणःविकपादापब्रह्मणः पु
त्रापयतोजगत्तेअग्रस्तेयन्मणःब्रह्मवैब्रह्मणोपुष्करेसृजतंयन्नाभिवःप्रादभवन्महात्माप्रजापतिर्विश्वसृ
ड्विश्वरूपः नारायणाद्ब्रह्माजायतेनारायणाद्रुद्रोजायते सर्वाणिभूतानिनारायणादेवसमुत्पद्यंते नाराय
णात्प्रवर्तंतेनारायणेप्रलीयंते तस्मात्तमससंजायतेतमसोभूतादिः भूतादेराकाशमाकाशाद्वायुःवायोरग्निः
अग्नेरापःअद्भ्यःपृथिवीतदंडंसमभवत्पृथिव्यप्सुप्रलीयते आपस्तेजसिलीयंते तेजोवायौलीयतेवायुराका
शेआकाशमिंद्रियेष्विंद्रियाणितन्मात्रेषुतन्मात्राणिभूतादौलीयंते भूतादिर्महतिलीयते महानव्यक्तेलीयते
अव्यक्तंदरेलीयते अक्षरंतमसिलीयते तमःपरेदेवएकीभवतिनेवेह किंचनाग्रआसीत्तस्मामूलमनाधार

म २